Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

RIKSANGRAHA

OR

A UNIVERSITY SELECTION

OF

VEDIC HYMNS

WITH

The Commentary of Sâyanâchârya.

BY

VISHNU GOVIND BIJÂPÛRKAR. M. A.,

LATE PROFESSOR OF SANSKRIT, RÂJÂRÂM COLLEGE,

KOLHÂPUR.

Price 2 Rupees.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ṚIKSANGRAHA

OR

A UNIVERSITY SELECTION

OF

VEDIC HYMNS

WITH

The Commentary of Sâyaṇâchârya.

EDITED WITH NOTES

BY

VISHNU GOVIND BIJÂPÛRKAR, M. A.,

LATE PROFESSOR OF SANSKṚIT, RÂJÂRÂM COLLEGE, KOLHÂPUR.

SECOND EDITION.

PRINTED AND PUBLISHED

BY

TUKÂRÂM JÂVAJÎ,

PROPRIETOR OF JÂVAJÎ DÂDÂJÎ'S "NIRṆAYA-SÂGAR" PRESS.

Bombay.

1907.

Price 2 Rupees.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(Registered under Act XXV of 1867.)

[All rights reserved by the publisher.]

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

DIgitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

DEDICATED

TO

R. G. BHÂNDÂRKAR,

M. A., PH. D., C. I. E., HON. M. R. A. S., &c., &c.,

LATE VICE-CHANCELLOR OF THE UNIVERSITY

OF BOMBAY

as a token of deep devotion and

profound respect

BY

ONE OF HIS PUPILS AND ADMIRERS.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

PREFACE.

The present work was undertaken with no higher aim than to afford some assistance to my young friends preparing for the B. A. Examination of our University. As I proceeded in the work the difficulty and the magnitude of the work began to stare me in the face and I would have given up all thought of editing these hymns, but

अनारम्भो हि कार्याणां प्रथमं बुद्धिलक्षणम् ।
प्रारब्धस्यान्तगमनं द्वितीयं बुद्धिलक्षणम् ॥

The importance of the study of the Vedas can hardly be exaggerated. To a Hindu in particular the study of the Vedas is essential, for they are the basis of all his religious beliefs, and even all his social practices are referred to them. Rightly or wrongly all the customs he is called upon to revere have been said to have derived their authority from the Vedas. All his acts and all his beliefs, at any rate the acts and beliefs of all with whom he has to deal in this world so far as his social life is concerned, are incapable of being thoroughly understood and estimated without an attempt to trace them back to their accredited source, the Vedas. If an educated Hindu is to fulfil the high and noble function of leading his countrymen to a better state of things in the matter of belief and conduct, he must understand and explain how his society has come to be what it is, what are the phases of it that may be called primitive and pure and what the accretions of later and corrupt ages. For all this and more he cannot afford to be ignorant of the oldest treasures of his country.

To the student of history the Vedas are an invaluable help. They are the oldest productions of man and as such entitled to the veneration of all people of whatever creed or nation. They introduce us to a state of human life which is not described to us by any chronicler. The songs of the Vedic Ṛishis are an inexhaustible mine, to work in which is itself a delight, irrespective of the direct results to be got at from that labour. A minute analysis, however, of the utterances of the Ṛishis, as preserved in the Vedas, enables us to collect a fairly reliable historical material of the state of life and manners in the Vedic days. The inferences drawn in this way have been noticed in the notes, as much for the information of the students

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

as for directing and encouraging them to exercise their own critical faculty in similar directions to bring out other facts of the same type.

This leads us to the third benefit that we derive from the study of the Vedas and that is an insight into the oldest poetry of mankind. The simple thoughts of the Ṛishis, their worldly concerns and the homely expressions they use, and the pure devotion of their hearts—all this is peculiar to the Vedic poets. Their very childishness is particularly charming.

But the greatest use of the Vedas is to the student of philology. Sanskṛit is so far considered to be the oldest language known to have produced an extensive literature, and no body requires to be told that a new light altogether was thrown on the western world by the so-called discovery of this classical language of India. Hosts of scholars have devoted their days and nights to its study and are working revolutions in all branches of antiquarian research. But the science of Etymology has received wonderful assistance and has given birth to a child which bids fair to engross the attention of all the world. Unknown at first, despised later on, tolerated at present, philology will be fast embraced by all those that take interest in man and his concerns. The most important part in this gigantic work of unearthing the buried secrets of man's speech will be played by the study of the Vedas. It is certainly not very honorable that the Hindus, the children of the soil should be idle spectators standing on the beach, while the Europeans, with the thousand and one disadvantages attending their honest efforts, should take a fearless plunge into the ocean of this honourable work. No greater service has been done by our University than by making it impossible, for every student of Sanskṛit that comes to it, to take the Arts-degree without having tasted of the living spring of the Vedas. It is surely strange to study the literature of the dead language and to go without having read the smallest portion of the literature of that language when it was spoken as a vernacular.

A general review of the ancient Literature.

There are four Vedas—Ṛigveda, Yajurveda, Sâmaveda and Atharvaveda. Each of these has its Samhitâ, Brâhmaṇa and Sûtra, and Prâtis'âkhya.

1 The Samhitâ of the Ṛigveda consists of the songs of the anci-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ent bards of India. These are simple compositions in the shape of prayers and praises addressed to the powers of nature in a deified form. In the primitive stages nothing is more likely than that nature should exercise a powerful influence on the mind of man by means of its grand phenomena. The grandeur and beauty joined with the tremendous outbursts of natural phenomena coming upon the puny creature with an unexpected suddenness can have no other effect than that of creating a feeling of helplessness and total submission. He must first of all save himself from all that is around him. He was thus struck with awe for everything, deified it and poured out his heart in prayers and praises addressed to it. He performed sacrifices in honour of one or more of these phenomena at a time. New verses were sung on the occasion of sacrifices. This period, when came out spontaneously the heart-pourings of these earlier inhabitants of this Planet, is the first stage of Vedic literature. In this we find at times, speculations on the abstract questions of human existence, the end and aim of human life and the creation of all this wide expanse by which man is surrounded. The prayers offered are very simple and the requests made are very modest. Let us have good sons, plenty of rain, abundance of wealth, freedom from vice, spacious residence, disappearance of enemies. This is the burthen of the prayers. These are the characteristics of a large portion of the Ṛigveda Samhitâ.

2 The next Samhitâ is the Yajurveda Samhitâ. Some of the hymns of the Ṛigveda are used in sacrificial rites. The officiating priests have to repeat some other formulæ to accompany the performance of the rite. These are embodied in Yajurveda. The Ṛigveda verses are recited by the Hotṛi, while the other formulæ which are in prose are repeated by the Adhvaryu who performs almost the whole manual work at the sacrifice. Thus for instance he repeats इषे त्वा when he cuts the branch.

3 Just as the Ṛigveda is the Veda of the Hotṛi priests and the Yajurveda of the Adhvaryus, so there is a third class of priests that have a whole Veda for themselves. These are the Udgâtṛi priests. Their Veda is the Sâmaveda. It is not a separate composition but mainly a selection from the Ṛigveda. These hymns of the Ṛigveda are chanted by the priests in particular modes of singing. One hymn is chanted in more than one or two different airs. This is the earliest music belonging to the Aryans of India.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

4 The fourth is the Atharvaveda. This Veda is least taken care of from the remote times. It has little connection with the sacrifices, and hence perhaps appears to be not allowed within the pale of the sacred revelation as early as the other three Vedas. The Âtharvaṇa is similar in character to the Ṛigveda. There are hymns—prayers and praises of deities. The only difference is that the Âtharvaṇa has a stamp of a more modern age when Brahmanical hierarchy had established itself though perhaps not in that rigour which characterises it in still more recent times. Some of the hymns that are here, occur in the 10th Mandala of the Ṛigveda which is the latest. These hymns are out of harmony in Ṛigveda while in the Âtharvaṇa they speak of the present and are quite appropriate. There are in the Âtharvaṇa some original hymns, but they seem to be looked upon as the production of lower families. These must have received recognition as the fourth Veda with great difficulty. This Veda has no share in any sacrifice.

Now we come to the second stage of Vedic literature, namely, the Brâhmaṇas. Between the Samhitâs and the Brâhmaṇas a long period must have elapsed. The Brâhmaṇas are specially concerned with the conduct of the sacrifices. They enter in certain places into linguistic questions. Sometimes they light on philosophical speculations, but the chief object of the Brâhmaṇas is to fix the ritual.

1 The Brâhmaṇas of the Ṛigveda are two—the Aitareya and the Kaushîtaki. Both deal with sacrifices. They explain the use of particular hymns on particular occasions by legends that gave rise to the hymns. These two Brâhmaṇas of the Ṛigveda do not differ much. The same matter is dealt with in both with a different arrangement. The Kaushîtaki seems to be the later of the two. It describes many sacrifices among which the Soma is the chief, while the Aitareya deals with the Soma sacrifice only. The Ṛigveda Brâhmaṇas only touch upon those parts of the sacrifices with which the Hotṛi priest has to do anything. These Brâhmaṇas are therefore the handbooks of the Hotṛi priests.

The word Brâhmaṇa is sometimes used in a wider sense and then it includes a literature called Upanishads. These works deal with the considerations of the secrets of the soul of man and the mystery of this Universe. Other portions of the Brâhmaṇas are the Âraṇyakas distinguished from Brâhmaṇas proper by the fact that

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

they (the Âraṇyakas) are to be repeated in the forests and not in houses. The Âraṇyakas mark a period of advancement in human thought. At present the Âraṇyakas are repeated only in temples. There are five Âraṇyakas attached to the Aitareya Brâhmaṇa.

2 Yajurveda is of two kinds–Taittirîya and Vâjasaneya or the Black and White. The Mantras are the same in both. There is a difference between the Yajurveda and the Ṛigveda. Ṛigveda contains only the hymns which are to be used at the time of the sacrifices. The Yajurveda contains the Mantras or the formulæ as well as the guidance in the matter of the ritual. Thus the portion which ought properly to be put into a Brâhmaṇa is put in the Yajurveda.

This is, however, with regard to the Kṛishṇa Yajurveda. When Yâjnavalkya promulgated the White Yajurveda, he separated the Mantras from the Brahmanical portion. The Brahmanic portion thus disengaged is incorporated in the S'atapatha Brâhmaṇa and contains a variety of speculations and legendry accounts. It goes without saying that the S'atapatha Brâhmaṇa gives directions only to the Adhvaryu priests in matters of ritual. This contains descriptions of sacrifices and As'vamedha among them. This also contains an Upanishad called the Bhṛihadâraṇyaka which is of a purely speculative and legendery character. This is a very great work and must have been in composition for a very long period by a variety of writers in a variety of places.

3 The Brâhmaṇas of the Sâmaveda seem to be of later date than the S'atapatha. They are for the guidance of the Udgâtṛi priests. These are of later date, for they mention temples and deities of human functions. Sâyaṇa and Kâtyâyana say that they are eight in number and in these eight accents are not marked.

There were many schools in which the Vedas were learnt by heart. There were no written editions published so as to prevent difference in readings. They were orally transmitted. The members of one school had their own recension. This gave rise to what are called Charaṇas or S'âkhâs. These S'âkhâs are interested in the propagation and preservation of their own recensions. They had their own code of sacrificial rites. These are the Brâhmaṇas. They explained in their own way the occasions on which hymns were composed. They criticized the opinions of the different Charaṇas. Thus the Kaushîtaki has opposed some opinions of the Tâṇdya Brâhmaṇa. The Charaṇas that do not see anything wrong in the Brâhmaṇas of their

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

neighbouring Charaṇas often accept their Brâhmaṇas. The Kaushîtaki has united the S'âkala and the Bâṣhkala S'âkhâs. Still in the different parts of the country there were many Charaṇas and there were many Brâhmaṇas. The literature of this class grew to a fearful extent and the study of this whole mass became in time a difficult thing. Their practical use was for sacrifices, and therefore a new mode of compressing that much—as will be enough for sacrifices—came into being. This gave rise to the Sûtra literature. Various Brâhmaṇas on every Veda were consulted and the Sûtras were substituted for the Brâhmaṇas in matters of ritual. Every Veda thus had its Sûtras just as it had the Brâhmaṇas and the Samhitâs. Thus sprang the Kalpa or ceremonial Sûtras for each Veda.

1 For the guidance of the Hotṛi priests the Sûtras were composed by Âs'valâyana. These Sûtras are for the Ṛigvedins of S'âkala, Bâṣhkala and other S'âkhâs. This we are to gather because he teaches the use of hymns that do not occur in the present recension of Veda that we have, that is of the S'âkala S'âkhâ. The sacrifices are the same, still certain Prayogas differ. It is said that before Âs'valâyana Sûtras were composed, the Kaushîtakî S'âkhâ used Sânkhyâyana Sûtras for the ritual of the Hotṛi. It is asserted that Sânkhyâyana Sûtras are prior to those of Âs'valâyana, though Sânkhyâyana Brâhmaṇa which is only another name for Kaushîtaki Brâhmaṇa is later than the Âs'valâyana or the Aitareya Brâhmaṇa. So says Hiraṇyakeshî.

2 The Sûtras for the Adhvaryu priests are composed by Kâtyâyana. These are adopted by Kâṇva and Mâdhyandina S'âkhâs of the Cohite Yajurveda.

3 The Sûtras for the Udgâtṛi priests are composed by Lâtyâyana. These were adopted by the Kauthuma S'âkhâ. The Sûtras adopted by the Râṇâyaṇîya Charaṇas called Drâhyâyaṇa Sûtras, are like Látyâyana Sûtras.

Besides the Kalpa Sûtras for the sacrificial ritual there are other Sûtras for other small sacrifices and some sundry ceremonies. These are Âs'valâyana Gṛihya Sûtras for the Ṛigvedins for such ceremonies as Upanayana, S'râvaṇi, Vais'vadeva; २ पारस्करकात्यायनगृह्यसूत्रs for शुक्लयजुर्वेदिन्s; ३ गोभिलगृह्यसूत्रs for सामवेदिन्s; &c.

Later on the Sûtra style was adopted for other than sacrificial purposes such as scientific and philosophical.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

As the Vedas—the hymns—were to be used in the sacrifice, they had to be learnt by heart. The Brâhmaṇas taught the uses of the Mantras, gave directions as to when particular formulæ were to be repeated. There was in like manner a literature that laid down rules for the modulation of voice, for the accent and emphasis, that laid down rules of saṇdhi, that, in fact, gave every guidance in regard to the recitation of the Vedas. Occassionally they touched on questions of grammar, but that was not the chief aim of this literature. This literature is called the "Prâtis'âkhyas." As there were various recensions of each Veda differing with the different Charaṇas and S'âkhâs, there were Prâtis'âkhyas corresponding to each of these. They were all written for this practical purpose. They fix the texts of the Vedas for the study and preservation of which, injunctions are given in these. In this manner we can detect the alterations effected by a later hand.

Notwithstanding the fact that there were as many Prâtis'âkhyas as there were Charaṇas, we have only at this day one Prâtis'hâkhya for each Veda. 'The style of these is free from cumbrous ornaments and unnecessary subtleties. It is their object to teach and not to edify; to explain not to discuss.'

1 The first Prâtis'âkhya is the S'âkala Prátis'âkhya by S'aunaka. He wrote for the S'âkalas but did not always like what they said. Still he excused them on the ground that they followed S'âkala Pitâ or S'akala. He himself however, did not bind himself to follow either. There is one of the S'âkala Prâtis'âkhyas as preserved by S'aunaka's pupils, who themselves formed a new Charaṇa under his name and are known as S'âunakîyas. This Prâtis'âkhya does not correspond to the edition of Ṛigveda that we have. What is true of this Ṛigveda Prâtis'âkhya is true of every other Prâtis'âkhya we have got, in other words none of the Prâtis'âkhyas corresponds to the edition of the Vedas in our hands.

2 The second is the Prâtis'âkhya of the Black Yajurveda. It quotes several Charaṇas of the Kṛishṇa Yajurveda such as Taittirîyas, Âhvârakas, Aukhîyas and Bhâradvâjins. Its grammatical terminology is less advanced and less artificial than that of the Prâtis'âkhya of the S'ukla Yajurveda.

3 The third is the Prâtis'âkhya of the Mâdhyandins a sub-division of the Vâjasaneyas—but really of the Kâtyâyanîyas. This shows considerable advancement in grammatical technicality. This Kâtyâyana and the Vârtikakâra on Paṇini are the same as Max Muller

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

thinks it. He could deal both with Vedic and ordinary language. He himself distinguishes between 'ॐ and अथ.' Some of the Prâtis'âkhya Sûtras are imperceptibly united with Pâṇini's text.

4 The fourth is the Pratis'âkhya called S'aunakîya Chaturâdhyâyikâ. The author of this is not the S'aunaka of the S'âkala Prâtis'âkhya. This is Atharvaṇa Prâtis'âkhya. Still the author may be one of the Charaṇas of S'aunaka. The grammatical terminology of this is far in advance of that of Kâtyâyana Prâtis'âkhya and seems to be later than this, since what Kâtyâyana says applies to this S'aunaka alone.

5 Sâmatantra may be taken to be Sâma Prâtis'âkhya. So says Max Muller who mentions this in the Charaṇavyûha.

In what goes above, little has been said about the 4th or the Âtharvaṇa Veda except about its Samhitâ and the Prâtis'âkhya. It is not separately used in ritual. It is the least taken care of by the Brâhmaṇas. Still it has the dignity of Veda and advantage of this has been taken by men who want to blow their own trumpet. With this Veda are associated a number of Upanishads or Âraṇyaka Brâhmaṇas. The original Upanishads are some twenty. Many are added afterwards in praise of the favourite deities of pushing men. Thus men have taken undue advantage of the sacred name of Veda and thus the Atharvaveda is tampered with as Dr. Bhândârkar once indignantly said 'in the most unconscionable manner.' There is a Khandobopanishad and there is an Allopanishad and there may be tacked on to this Veda tomorrow a Universityupanishad.

It is impossible to ascertain with any very great accuracy the dates of the several portions of this vast Vedic literature. It is beyond all doubt that the Ṛigveda is the oldest; but various portions of this Veda too, are to be ascribed to widely separated periods of time. The antiquity of the Vedas is and will continue to engage the brains and pens of eminent scholars of the West and the East, but so far as definite chronology is concerned, we are almost hopeless of having any. There are indications in the body of the hymns to refer some hymns to later and some to earlier periods. The principles of determining these are also varying and they are noticed in their proper place in the notes. Astronomical allusions, however, have been

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

made use of by critics to arrive at some chronological data. Prof. B. G. Tilak's conclusions seem to be accepted now by the majority of Vedic scholars. He arrives at the conclusion that the Vedic hymns are composed at three different periods, and the oldest may reach 6000 B. C. However reluctant some European scholars may be to accept the conclusions of Hon'ble Mr. Tilak's Orion, it will be very difficult for them to controvert these. We, who have in astronomical matters to depend on others, see no reason to demur to thankfully commend the intelligent labours of Prof. Tilak in this field. At any rate so long as his conclusions are unchallenged and unrefuted, we must refer the Vedas to an antiquity longer than Weber, Max Muller and many other European scholars are willing to allow.

There was a time in India when the Ṛigveda received the attention of the most intelligent people of the land. It must have become apparent to the reader how pains-taking the Hindus were in their study of the Ṛigveda, how jealous they were of any tampering with the text. Schools arose who put interpretations on the Veda in their own way. Individuals became famous for their extraordinary labours in that department. Altogether, there was, a brisk activity in this matter and we have to mourn at this distance the loss of that vast literature on this all important subject. We have, however, an idea of what it must have been from Yâska and Pâṇini, who quote a host of authors by name and also mention schools such as the Aitihâsikas, the Nairuktas, the Parivrâjakas, the Vaiyâkaraṇas, the Yâjnikas. Bad days came on India in the matter of literary advancement as in advancement along all other lines. Independent thought disappeared and more elaborate modes of study came into existence. Literature, like religion, became cold and formal. Theological and philosophical wrangling brought into being thoroughly antagonistic schools, all endeavouring in their own hair-splitting manner to establish the divine character of their own tenets. The old texts were all respected, but not studied in the simple spirit of the composers. Controversial elements were introduced and the pure fountain of the old philosophical literature was defiled by being turned to party purposes, till that inspiring literature was thrown aside and people began to think more of the artificial literature of later days than of the natural heart-pourings of the old Ṛishis and their devout followers. Re-action seems to have taken place in the kingdom of Vijayanagara, the sole centre of Brahmanical lore towards the close of

2

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

the middle ages in the Deccan. There, the Vedas and the Upanishads were again taken up in right earnest but the Paṇḍits, who were thoroughly imbued in the scholastic mode of thought, were little fitted to separate wheat from chaff. The tendency, however, was in the right direction and a longer life to that Hindu kingdom might have done something for the ancient literature of India. But it was no match for the growing Mahomedan power and the ancient literature of India had to wait for some centuries more. All honour to the Vaidikas, however, who have preserved the Vedas and Vedângas from destruction by an alien and unsympathetic, not to say a hostile race. At last a people, ambitious to connect themselves with the home of the Vedas and seeking to find information of their remote ancestors, have taken deep interest in this subject and during the last century more has been done for the Vedas by foreigners than by the people of this country. The grand work of an excellent edition of the Ṛigveda with Sâyaṇâchârya's commentary was undertaken and carried out, with the help of India's money, in a strange land and under most unfavourable circumstances. The work must indeed have been, as we see it actually described by Prof. Max Muller from time to time, quite an uphill ascent to all the people concerned. Within less than half the expenditure and with one tenth of the worry and trouble, the same work could have been done on the congenial soil of India. This does not mean any disparagement to the great Bhatta Mokṣha Muller, but a regret for the woeful neglect of duty on the part of our own people in the matter. In the intellectual no less than in the material world, we are allowing others not indeed to steal a march over us, but to push us back and tread us down quite in broad day-light. If we refer to the list of workers in the field of the Veda given at the end of Prof. Max Muller's Vedic hymns in the Series now well-known as 'the Sacred Books of the East,' we shall find nearly every European leading nation represented. It is not here possible nor necessary to mention their names and works, but we must be thankful to them for all their zeal and enthusiasm in the matter. Whereas, formerly Yâska quoted Gârgya, Kautsa, Aurṇavâbha and others, we have to quote Max Muller, Muir, Wilson and others, and this we believe is no small honour to these eminent scholars, of which they must be justly proud. It must not be supposed that there is no work remaining for future heroes that may desire to break a lance in the field. Much as has been done, more, much more can be and yet remains to be done.* The Veda has not been satisfactorily interpreted. The

* शिक्षा, व्याकरण, छंदस्, निरुक्त, कल्प and ज्योतिस्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

difficulties of Sâyaṇa the great commentator have not been all solved. His mistakes have not been all corrected. The light of collateral languages has not been thoroughly availed of; more particularly Zend has yet to be drawn upon. Dr. Haug has done good service in that direction, but others are not known to have followed him. There is no doubt that the Zend literature will aid the study of the Veda to a great extent. The two languages are quite akin to the pronouns, and particles, many words almost coinciding. As proof of this we shall give in our notes some of the Zend words. The present writer is very sorry that he has not been able to acquire a knowledge of that language decent enough to advance anything like sensible guesses of the meaning of Vedic passages by the light of its literature. He is convinced, however, that in cases of words used rarely in the Veda, a flood of light is likely to pour from that direction. The old Persians and the old Aryans have many things so common that they cannot but explain each other. Some of their deities, some of their customs, some of their rites and ceremonies and some of the names of their priests are so thoroughly identical.* For the present our students have to satisfy themselves with what Sâyaṇâchârya has done and what such eminent scholars as Prof. Max Muller, Williams, Colebrooke, Wilson, Whitney, Haug, Muir, and nearer home Dr. Peterson have done. It would be doing injustice to the memory of a gentleman of indefatiguable industry to omit all mention of the Vedârthayatna of the late Râo Bahâdur Shankara Pânduranga Pandit. The present annotator owes a deep debt of gratitude to all these, from whose works he has received very valuable assistance.

Before concluding this preface, I must express my profound sense of satisfaction that my revered teacher Dr. Bhândârker has very kindly permitted me to launch my first humble production into the world under his own encouraging auspices. It was no doubt a serious drawback that I could not do my work directly under his eye, so as to derive the benefit of his critical faculty and of his increasing familiarity with the German language. My thanks are due to gentlemen that have helped me in one way or the other, but they are particularly due to the Proprietors of the Nirṇaya-Sâgara Press, who alone in this presidency could have undertaken the publication of this work without any immediate prospect of pecuniary gain. My own object in taking this edition in hand is very modest and if that is accomplished to a certain extent, I shall feel myself amply rewarded.

* Dr. Haug's preface to the Aitareya Brâhmaṇa.

4th August 1895,
Rajaram College,
Kolhapur.

V. G. BIJÂPURKAR.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ऋक्संग्रहः ।

सायणाचार्यभाष्यसंवलितः ।

(मं० १ सू० २५)

१.

यच्चिद्धि ते विशो यथा प्र देव वरुण व्रतं । मिनीमसि द्यविद्यवि ॥ १ ॥

यत् । चित् । हि । ते । विशः । यथा । प्र । देव । वरुण । व्रतं ॥ मिनीमसि । द्यविऽद्यवि ॥ १ ॥

हे वरुण यथा लोके विशः प्रजाः कदाचित् प्रमादं कुर्वंति तथा वयमपि ते तव संबंधि यच्चिद्धि यदेव किंचिद्व्रतं कर्म द्यविद्यवि प्रतिदिनं प्रमिनीमसि प्रमादेन हिंसितवंतः । तदपि व्रतं प्रमादपरिहारेण सांगं कुर्विति शेषः ॥ यथा । लित्स्वरेणाद्युदात्तत्वे प्राप्ते यथेति पादांते । फि० ४. १५. । इति सर्वानुदात्तत्वं । मिनीमसि । मीञ् हिंसायां । इदंतो मसिः । पा० ७. १. ५८. । क्र्यादिभ्यः श्ना । मीनातेर्निगमे । पा० ७. ३. ८१. । इति ह्रस्वत्वं । ई हल्यघोरितीकारः । सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति वचनात्तिङ एव स्वरः शिष्यते । यद्वृत्तयोगान्निघाताभावः ॥

मा नो वधाय हत्नवे जिहीळानस्य रीरधः । मा हृणानस्य मन्यवे ॥ २ ॥

मा । नः । वधाय । हत्नवे । जिहीळानस्य । रीरधः ॥ मा । हृणानस्य । मन्यवे ॥ २ ॥

हे वरुण जिहीळानस्यानादरं कृतवतो हत्नवे हंतुः पापिहननशीलस्य तव संबंधिने त्वत्कर्तृकाय वधाय नोऽस्मान्मा रीरधः संसिद्धान्विषयभूतान्मा कुरु । हृणानस्य हृणीयमानस्य क्रुद्धस्य तव मन्यवे क्रोधाय मा अस्मान् रीरधः ॥ वधाय । हनश्च वध इत्यदंतो वधशब्दः । उञ्छादिषु पाठादंतोदात्तः । हत्नवे । हन हिंसा-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

गत्योः । कृहनिभ्यां क्नुः । उ० ३. ३०. । इति क्नुप्रत्ययः । धातोर्नकारस्य तकारः । जिहीळानस्य । हेडृ अनादरे । अस्माल्लिटः कानच् । द्विर्भावहलादिशेषह्रस्वचुत्वजश्त्वानि । एकारस्य ईकारादेशश्छांदसः । चित इत्यंतोदात्तत्वं । रीरधः राध साध संसिद्धौ । चङि णिलोप उपधाया ह्रस्वत्वं । द्विर्वचनहलादिशेषह्रस्वत्वसन्वद्भावेलाभ्यासदीर्घाः । न माङ्योग इत्यडभावः । हृणानस्य । हृणीङ् लज्जायां । अस्माच्छानचि पृषोदरादित्वादभिमतरूपसिद्धिः ॥

वि मृ॒ळी॒काय॑ ते॒ मनो॑ र॒थीरश्वं॒ न संदि॑तं । गी॒र्भिर्व॑रुण सीमहि ॥ ३ ॥

वि । मृ॒ळी॒काय॑ । ते॒ । मनः॑ । र॒थीः । अश्वं॑ । न । सम्ऽदि॑तं ॥ गी॒ःऽभिः । व॒रु॒ण । सी॒म॒हि॒ ॥ ३ ॥

हे वरुण मृळीकायास्मत्सुखाय ते तव मनो गीर्भिः स्तुतिभिर्विसीमहि विशेषेण बध्नीमः । प्रसादयाम इत्यर्थः । तत्र दृष्टांतः । रथीः रथस्वामी संदितं सम्यक् खंडितं दूरगमनेन श्रांतमश्वं न अश्वमिव । यथा स्वामी श्रांतमश्वं घासप्रदानादिना प्रसादयति तद्वत् ॥ रथीः । मत्वर्थीय ईकारः । संदितं । दो अवखंडने । निष्ठेति क्तः । द्यतिस्यतिमास्थामित्ति किति । पा० ७. ४. ४०. । इतीकारांतादेशः । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । गीर्भिः । सावेकाच इति भिस उदात्तत्वं । सीमहि । षिवु तंतुसंताने । व्यत्ययेनात्मनेपदं । बहुलं छंदसीति विकरणस्य लुक् । वलि लोपः । पा० ६. १. ६६. । यद्वा षिञ् बंधन इत्यस्माद्विकरणस्य लुक् । दीर्घश्छांदसः ॥

परा॒ हि मे॒ विम॑न्यवः॒ पतं॑ति॒ वस्य॑इष्टये । वयो॒ न व॑स॒तीरुप॑ ॥ ४ ॥

परा॑ । हि । मे॒ । विऽम॑न्यवः । पतं॑ति । वस्य॑ःऽइष्टये ॥ वयः॑ । न । व॒स॒तीः । उप॑ ॥ ४ ॥

हे वरुण मे मम शुनःशेपस्य विमन्यवः क्रोधरहिता बुद्धयो वस्यइष्टये वसीयसोऽतिशयेन वसुमतो जीवनस्य प्राप्तये परा पतंति पराङ्मुखाः पुनरावृत्तिरहिताः प्रसरन्ति । हिशब्दोऽस्मिन्नर्थे सर्वजनप्रसिद्धिमाह । परापतने दृष्टान्तः । वयो न पक्षिणो यथा वसतीर्निवासस्थानान्युप सामीप्येन प्राप्नुवन्ति तद्वत् ॥ पतन्ति । पादादित्वान्निघाताभावः । वस्यइष्टये । वसुमच्छब्दाद्विन्मतोर्लुगिति मतुपो लुकि टिलोपे ईयसुनो यकारलोपश्छांदसः । वसतीः । शतुरनुम इति ङीप उदात्तत्वम् ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कदा क्षत्रश्रियं नरमा वरुणं करामहे । मृळीकायोरुचक्षसं ॥ ५ ॥

कदा । क्षत्रश्रियं । नरं । आ । वरुणं । करामहे ॥ मृळीकायं । उरुऽचक्षसं ॥ ५ ॥

मृळीकायास्मत्सुखाय वरुणं कदा कस्मिन्काल आकरामहे अस्मिन्कर्मण्यागतं करवाम । कीदृशम् । क्षत्रश्रियं बलसेविनं नरं नेतारम् । उरुचक्षसम् बहूनां द्रष्टारम् । क्षत्रश्रियम् क्षत्राणि श्रयतीति क्षत्रश्रीः । क्विप् च । पा० ३. २. १७८. । इत्यादिना क्विप् दीर्घश्च । कृदुत्तरपदप्रकृतिस्वरत्वम् । नरम् । ऋदोरबित्यवंत आद्युदात्तः । करामहे । करोतेर्व्यत्ययेन शप् । उरुचक्षसम् । चक्षेर्बहुलं शिच्च । उ० ४. २३२. । इत्यसुन् । शिद्वद्भावात्ख्याञादेशाभावः ॥

तदित्समानमाशाते वेनंता न प्र युच्छतः । धृतव्रताय दाशुषे ॥ ६ ॥

तत् । इत् । समानं । आशाते इति । वेनंता । न । प्र । युच्छतः ॥ धृतऽव्रताय । दाशुषे ॥ ६ ॥

धृतव्रतायानुष्ठितकर्मणे दाशुषे हविर्दत्तवते यजमानाय वेनंतौ कामयमानौ मित्रावरुणाविति शेषः । तावुभौ समानं साधारणं तदिदस्माभिर्दत्तं तदेव हविराशाते अश्नुवाते । न प्रयुच्छतः कदाचिदपि प्रमादं न कुरुतः ॥ आशाते । अश्नोतेर्लिटि द्विर्भावहलादिशेषौ । अत आदेः । पा० ७. ४. ७०. । इत्यात्त्वम् । अनित्यमागमशासनमिति वचनादश्नोतेश्च । पा० ७. ४. ७२. । इति नुडभावः । वेनंता । वेनतिः कांतिकर्मा । सुपां सुलुगित्याकारः । प्रयुच्छतः । युच्छ प्रमादे । दाशुषे । दाशृ दान इत्यस्माद्दाश्वान् साह्वानिति क्वसुप्रत्ययो निपातितः । वसोः संप्रसारणमिति संप्रसारणम् । शासिवसिघसीनां चेति षत्वम् ॥

वेदा यो वीनां पदमंतरिक्षेण पतंतां । वेद नावः समुद्रियः ॥ ७ ॥

वेद । यः । वीनां । पदं । अंतरिक्षेण । पतंतां ॥ वेद । नावः । समुद्रियः ॥ ७ ॥

अन्तरिक्षेण पतताामाकाशमार्गेण गच्छतां वीनां पक्षिणां पदं यो वरुणो वेद । तथा समुद्रियः समुद्रेऽवस्थितो वरुणो नावो जले गच्छन्त्याः पदं वेद जानाति ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सोऽस्मान्बंधनान्मोचयत्विति शेषः ॥ वेद । विद ज्ञाने । विदो लटो वा । पा० ३. ४. ८३. । इति तिपो णल् । लित्स्वरेणाद्युदात्तत्वम् । द्व्यचोऽतस्तिङ इति संहितायां दीर्घः । वीनाम् । नामन्यतरस्यामिति नाम उदात्तत्वम् । पतताम् । शपः पित्त्वादनुदात्तत्वम् । शतुश्च लसार्वधातुकस्वरेण धातुस्वरः । नावः । सावेकाच इति षष्ठ्या उदात्तत्वम् । समुद्रियः भवार्थे । समुद्राभ्राद्धः । पा० ४. ४. ११. । इति घप्रत्ययः ॥

वेद॑ मा॒सो धृ॒तव्र॑तो॒ द्वाद॑श प्र॒जाव॑तः । वेदा॒ य उ॑प॒जाय॑ते ॥ ८ ॥

वेद॑ । मा॒सः । धृ॒तऽव्र॑तः । द्वाद॑श । प्र॒जाऽव॑तः ॥ वेद॑ । यः । उ॒प॒ऽजाय॑ते ॥ ८ ॥

धृतव्रतः स्वीकृतकर्मविशेषो यथोक्तमहिमोपेतो वरुणः प्रजावतस्तदा तदोत्पद्यमानप्रजायुक्तान्द्वादश मासश्चैत्रादीन् फाल्गुनान्तान्वेद जानाति । यस्त्रयोदशोऽधिकमास उपजायते संवत्सरसमीपे स्वयमेवोत्पद्यते तमपि वेद । वाक्यशेषः पूर्ववत् ॥ मासः । पद्दन्नित्यादिना । पा० ६. १. ६३. । मासशब्दस्य मासित्यादेशः । ऊडिदमित्यादिना शस उदात्तत्वम् । द्वादश । द्वौ च दश चेति द्वंद्वः । द्व्यष्टनः संख्यायाम् । पा० ६. ३. ४७. । इत्यात्त्वम् । संख्या । पा० ६. २. ३५. । इति सूत्रेण पूर्वपदप्रकृतिस्वरत्वम् । प्रजावतः । जनी प्रादुर्भावे । प्रपूर्वाज्जनसनखनक्रमगमो विट्प्रत्ययः । विड्वनोरित्यात्वम् । कृदुत्तरपदप्रकृतिस्वरत्वम् । प्रजा एषां संतीति । तदस्यास्त्यस्मिन्निति मतुप् । पा० ५. २. ९४. । मादुपधाया इति मतुपो वत्वम् । उपजायते । जनेः कर्मकर्तरि लट् । कर्मवद्भावादात्मनेपदं यक् । पा० ३. १. ८७. । जनादीनामुपदेश एवात्वं वक्तव्यम् । ६. १. १९५. । इति वचनादचः कर्तृयकि । पा० ६. १. १९५. । इत्याद्युदात्तत्वम् । तिङि चोदात्तवति । पा० ८. १. ७१. । इत्युपसर्गस्य निघातः । नच तिङ्ङतिङ इति निघातः । यद्वृत्तान्नित्यमिति प्रतिषेधात् ॥

वेद॒ वात॑स्य व॒र्तनि॑मु॒रोर्ऋ॒ष्वस्य॑ बृह॒तः । वेदा॒ ये अ॒ध्यास॑ते ॥ ९ ॥

वेद॑ । वात॑स्य । व॒र्तनि॑ । उ॒रोः । ऋ॒ष्वस्य॑ । बृ॒ह॒तः ॥ वेद॑ । ये । अ॒धि॒ऽआस॑ते ॥ ९ ॥

उरोर्विस्तीर्णस्य ऋष्वस्य दर्शनीयस्य वृहतो गुणैरधिकस्य वातस्य वायोर्वर्तनिं मार्गं वेद वरुणो जानाति । ये देवा अध्यासते उपरि तिष्ठन्ति तानपि वेद जानाति ॥ वातस्य । असिहसीत्यादिना तन्प्रत्ययान्तो वातशब्दो नित्त्वादाद्युदात्तः । वर्तनिं । वर्ततेऽनेनेति वर्तनिः स्तोत्रम् । पा० ६. १. १६०. । इति स्तोत्रवाच-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant Equipment Heritage Foundation, Jalgaon

कस्य वर्तनिशब्दस्यांतोदात्तत्वसिद्ध्यर्थमुञ्छादिषु पाठादस्य प्रत्ययस्वरेण मध्योदात्तत्वे प्राप्ते व्यत्ययेनांतोदात्तत्वम् । बृहतः । बृहन्महतोरुपसंख्यानमिति ङस उदात्तत्वम् । अध्यासते । लसार्वधातुकानुदात्तत्वे सति धातुस्वरः ॥

नि षसाद धृतव्रतो वरुणः पस्त्याःस्वा । साम्राज्याय सुक्रतुः ॥ १० ॥

नि । ससाद । धृतऽव्रतः । वरुणः । पस्त्यासु । आ ॥ सांऽराज्याय । सुऽक्रतुः ॥ १० ॥

धृतव्रतः पूर्वोक्तो वरुणः पस्त्यासु दैवीषु प्रजास्वा निषसाद आगत्य निषण्णवान् । किमर्थम् । प्रजानां साम्राज्यसिद्ध्यर्थं सुक्रतुः शोभनकर्मा ॥ निषसाद । सदिरप्रतेरिति षत्वम् । साम्राज्याय । सम्राजो भावः साम्राज्यम् । गुणवचनब्राह्मणादिभ्य इति ष्यञ् । ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वम् । सक्रतुः । क्रत्वादयश्चेत्युत्तरपदाद्युदात्तत्वम् ॥

अतो विश्वान्यद्भुता चिकित्वाँ अभि पश्यति । कृतानि या च कर्त्वा ॥ ११ ॥

अतः । विश्वानि । अद्भुता । चिकित्वान् । अभि । पश्यति ॥ कृतानि । या । च । कर्त्वा ॥ ११ ॥

अतोऽस्माद्वरुणाद्विश्वान्यद्भुता सर्वाण्याश्चर्याणि चिकित्वान् प्रज्ञावानभिपश्यति सर्वतोऽवलोकयति । या कृतानि यान्याश्चर्याणि पूर्वं वरुणेन संपादितानि । चकारादन्यानि यान्याश्चर्याणि । कर्त्वा इतः परं कर्तव्यानि तानि सर्वाण्यभिपश्यतीति पूर्वत्रान्वयः ॥ अद्भुता । शेश्छंदसि बहुलमिति शेर्लोपः । प्रत्ययलक्षणेन नपुंसकस्य झलच इति नुम् । नलोपः । चिकित्वान् । कित ज्ञाने । लिटः क्वसुः अभ्यासहलादिशेषचुत्वानि । वस्वेकाजाद्घसामिति नियमादिडभावः । रुत्वानुनासिकावुक्तौ संहितायाम् ॥ पश्यति । पाघ्रेत्यादिना दृशेः पश्यादेशः । कर्त्वा । कृत्यार्थे तवैकेन्केन्यत्वनः । पा० ३. ४. १४. । इति करोतेस्त्वन् । नित्त्वादाद्युदात्तत्वम् । पूर्ववच्छेर्लोपः ॥

स नो विश्वाहा सुक्रतुरादित्यः सुपथा करत् । प्र ण आयूंषि तारिषत् ॥ १२ ॥

सः । नः । विश्वाहा । सुऽक्रतुः । आदित्यः । सुऽपथा । करत् ॥ प्र । नः । आयूंषि । तारिषत् ॥ १२ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सुक्रतुः शोभनप्रज्ञः स आदित्यो वरुणो विश्वाहा सर्वेष्वहःसु नोऽस्मान् सुपथा शोभनमार्गेण सहितान्करत् करोतु । किं च नोऽस्माकमायूंषि प्रतारिषत् प्रवर्धयतु ॥ सुपथा । स्वती पूजायामिति समासे न पूजनात् । पा० ५. ४. ६९. । इति समासांतप्रतिषेधः । अव्ययपूर्वपदप्रकृतिस्वरत्वे प्राप्ते परादिश्छन्दसि बहुलमित्युत्तरपदाद्युदात्तत्वम् । यद्वा तृतीयाया आलादेशः । पा० ७. १. ३९. । अव्ययपूर्वपदप्रकृतिस्वरत्वं लित्स्वरेण बाध्यते । क्त्वादयश्चेत्येतन्न भवति । अबहुव्रीहित्वात् । बहुव्रीहौ हि तद्विधीयते । आद्युदात्तं द्व्यच्छंदसि । पा० ६. २. ११९. । इत्येतदपि न भवति । पथिन्शब्दस्यांतोदात्तत्वात् । करत् । करोतेर्लेटि व्यत्ययेन शप् । शपो वा लुकि लेटोऽडाटावित्यडागमः । इतश्च लोप इतीकारलोपः । यद्वा छांदसे लुङि कृमृदृरुहिभ्यः । पा० ३. १. ५९. । इति च्लेरङ् । ऋदृशोऽङि गुणः । पा० ७. ४. १६. । इति गुणः । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । प्र णः । उपसर्गाद्बहुलम् । पा० ८. ४. २८. । इति नसो णत्वम् । तारिषत् । तारयतेर्लेट्यडागमः । सिब्बहुलं लेटीति सिप् । आदेशप्रत्यययोरिति षत्वम् ॥

बिभ्रद्द्रापिं हिर॒ण्ययं॒ वरु॑णो वस्त नि॒र्णिजं॑ । परि॒ स्पशो॒ नि षे॑दिरे ॥ १३ ॥

बिभ्र॑त् । द्रा॒पिं । हि॒र॒ण्यय॑ं । वरु॑णः । व॒स्त॒ । निः॒ऽनिजं॑ ॥ परि॑ । स्पशः॑ । नि । से॒दि॒रे॒ ॥ १३ ॥

हिरण्ययं सुवर्णमयं द्रापिं कवचं बिभ्रद्धारयन्वरुणो निर्णिजं पुष्टं स्वशरीरं वस्त आच्छादयति । स्पशो हिरण्यस्पर्शिनो रश्मयः परिनिषेदिरे सर्वतो निषण्णाः ॥ बिभ्रत् । बिभर्तेः शतरि नाभ्यस्ताच्छतुः । पा० ७. १. ७८. । इति नुमभावः । अभ्यस्तानामादिरित्याद्युदात्तत्वम् । द्रापिं । द्रा कुत्सायां गतौ । द्रापयतीभून्कुत्सितां गतिं प्रापयतीति द्रापिः कवचम् । अर्तिह्रीत्यादिना । पा० ७. ३. ३६. । पुगागमः । औणादिक इप्रत्यये णिलोपः । हिरण्ययम् । ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि छंदसीति हिरण्यशब्दाद्विकारार्थे विहितस्य मयटो मशब्दलोपो निपातितः । वस्त । वस आच्छादने । लङ्यदादित्वाच्छपो लुक् । पूर्ववदडभावः । निर्णिजम् । णिजिर् शौचपोषणयोः । स्पशः । स्पश बाधनस्पर्शनयोः । क्विप् चेति क्विप् । निषेदिरे । षद्लृ विशरणगत्यवसादनेषु । अस्माद्गत्यर्थात्कर्मणि लिट्येत्वाभ्यासलोपौ । सदिरप्रतेरिति षत्वम् ॥

न यं दिप्सं॑ति दि॒प्सवो॒ न द्रुह्वा॑णो॒ जना॑नां । न दे॒वम॒भिमा॑तयः ॥ १४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

न । यं । दिप्संति । दिप्सवः । न । द्रुह्वाणः । जनानां ॥ न । देवं । अभिऽमातयः ॥ १४ ॥

दिप्सवो हिंसितुमिच्छंतो वैरिणो यं वरुणं न दिप्संति भीताः संतो हिंसितुमिच्छां परित्यजन्ति । जनानां प्राणिनां द्रुह्वाणो द्रोग्धारोऽपि यं वरुणं प्रति न द्रुह्यंति । अभिमातयः पाप्मानः । पाप्मा वा अभिमातिरिति श्रुत्यन्तरात् । देवं तं वरुणं न स्पृशंति ॥ दिप्संति । दंभु दंभे । अस्मात्सनि सनीवंतर्धेत्यादिना । पा० ७. २. ४९. । इडभावः । हलंताच्च । पा० १. २. १०. । इत्यत्र हल्ग्रहणस्य जातिवाचित्वात्सनः कित्त्वाद्दंभ इच्च । पा० ७. ४. ५६. । इति दकारात्परस्याकारस्येकारः । अनिदितामिति नलोपः । भष्भावाभावश्छांदसः । पा० ८. २. ३७. । अत्र लोपोऽभ्यासस्य । पा० ७. ४. ५८. । इत्यभ्यासलोपः । शपः पित्त्वादनुदात्तत्वम् । तिङश्च लसार्वधातुकस्वरेण सनो नित्त्वान्नित्स्वरेणाद्युदात्तत्वम् । यद्वृत्तयोगादनिघातः । दिप्सवः । सन्नंताद्दंभेः सनाशंसभिक्ष उरित्युप्रत्ययः । प्रत्ययस्वरः । द्रुह्वाणः । द्रुह जिघांसायाम् । अन्येभ्योऽपि दृश्यन्त इति क्वनिप् । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरेणाद्युदात्तत्वम् ॥

उत यो मानुषेष्वा यशश्चक्रे असाम्या । अस्माकमुदरेष्वा ॥ १५ ॥

उत । यः । मानुषेषु । आ । यशः । चक्रे । असामि । आ ॥ अस्माकं । उदरेषु । आ ॥ १५ ॥

उत अपि च यो वरुणो मानुषेषु यशोऽन्नमाचक्रे सर्वतः कृतवान् । स वरुणः कुर्वन्नप्या सर्वत असामि संपूर्णं चक्रे न तु न्यूनं कृतवान् । विशेषतोऽस्माकमुदरेष्वा सर्वतश्चक्रे ॥ मानुषेषु । मनोर्जातावञ्यतौ षुक् च । पा० ४. १. १६१. । इत्यञ् । ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वम् । चक्रे । प्रत्ययस्वरः । असामि । अव्यये नञ्कुनिपातानामिति वक्तव्यम् । पा० ६. २. २. १. । इत्यव्ययपूर्वपदप्रकृतिस्वरत्वम् । यशः । अशेर्युट् चेत्यसुन् । उदरेषु । उदि दृणाते रजलौ पूर्वपदांत्यलोपश्च । उ० ५. १९. । इत्यल् । लित्स्वरः । गतिकारकोपपदादित्युत्तरपदप्रकृतिस्वरत्वम् ॥

परा मे यंति धीतयो गावो न गव्यूतीरनु । इच्छंतीरुरुचक्षसं ॥ १६ ॥

परा । मे । यंति । धीतयः । गावः । न । गव्यूतीः । अनु ॥ इच्छंतीः । उरुऽचक्षसं ॥ १६ ॥

उरुचक्षसं बहुभिर्द्रष्टव्यं वरुणमिच्छंतीर्मे धीतयः शुनःशेपस्य बुद्धयः परायंति

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पराङ्मुखा निवृत्तिरहिता गच्छंति । तत्र दृष्टांतः । गावो न । यथा गावो गव्यूतीरनु गोष्ठान्यनुलक्ष्य गच्छंति तद्वत् । गव्यूतीः । गावोऽत्र यूयंत इत्यधिकरणे क्तिन् । गोर्यूतौ छंदसि । पा० ६. १. ७९. २. । इत्यवादेशः । दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वम् । यद्वा यूतिर्यवनम् । गवां यवनमत्रेति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । इच्छंतीः । इष इच्छायाम् । लटः शतृ । तुदादिभ्यः शः । इषुगमियमां छ इति छत्वम् । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे विकरणस्वरः शिष्यते ॥

सं नु वोचावहै पुनर्यतो मे मध्वाभृतं । होतेव क्षदसे प्रियं ॥ १७ ॥

सं । नु । वोचावहै । पुनः । यतः । मे । मधु । आऽभृतं ॥ होताऽइव । क्षदसे । प्रियं ॥ १७ ॥

यतो यस्मात्कारणान्मे मम जीवनार्थं मधुरं हविराभृतम् । अंजःसवाख्ये कर्मणि संपादितम् । अतः कारणाद्धोतेव होमकर्तेव त्वमपि प्रियं हविः क्षदसे अश्नासि । पुनर्हविःस्वीकारादूर्ध्वं तृप्तस्त्वं जीवन्नहं च नु अवश्यं संवोचावहै संभूय प्रियवार्तां करवावहै ॥ वोचावहै । लोडर्थे छांदसे लुङि ब्रुवो वचिः । अस्यतिवक्तीति च्लेरङादेशः । वच उमित्युमागमे गुणः । व्यत्ययेन टेरेत्वम् । यद्वा लोट एव लुङादेशः । स्थानिवद्भावादैत्वम् । आभृतम् । हृग्रहोर्भः । गतिरनंतर इति गतेः प्रकृतिस्वरत्वम् ॥

दर्शं नु विश्वदर्शतं दर्शं रथमधि क्षमि । एता जुषत मे गिरः ॥ १८ ॥

दर्शं । नु । विश्वऽदर्शतं । दर्शं । रथं । अधि । क्षमि ॥ एताः । जुषत । मे । गिरः ॥ १८ ॥

विश्वदर्शतं सर्वैर्दर्शनीयमस्मदनुग्रहार्थमत्राविर्भूतं वरुणं दर्शं नु अहं दृष्टवान्खलु । क्षमि क्षमायां भूमौ रथं वरुणसंबंधिनमधिदर्शम् आधिक्येन दृष्टवानस्मि । एता उच्यमाना मे गिरो मदीयाः स्तुतीर्जुषत वरुणः सेवितवान् ॥ दर्शम् । दृशेरिरितो वा । पा० ३. १. ५७. । इति च्लेरङादेशः । ऋदृशोऽङि गुणः । पा० ७. ४. १६. । इति गुणः । विश्वदर्शतम् । दृशेर्भृमृदृशीत्यादिना । उ० ३. १०९. । अतच्प्रत्ययांतो दर्शतशब्दः । मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वम् । यद्वा विश्वं दर्शनीयमस्येति बहुव्रीहिः । बहुव्रीहौ विश्वं संज्ञायाम् । पा० ६. २. १०६. । इति पूर्वपदान्तोदात्तत्वम् । क्षमि । आतो धातोः । पा० ६. ४. १४०. । इत्यत्रात इति योगविभागादाकारलोपः ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इमं मे वरुण श्रुधी हवमद्या च मृळय । त्वामवस्युरा चके ॥ १९ ॥

इमं । मे । वरुण । श्रुधि । हवं । अद्य । च । मृळय ॥ त्वां । अवस्युः । आ । चके ॥ १९ ॥

हे वरुण मे मदीयमिमं हवमाह्वानं श्रुधि शृणु । किं च । अद्यास्मिन्दिने मृळय अस्मान्सुखय । अवस्युः रक्षणेच्छुरहं त्वां वरुणमाभिमुख्येन चके शब्दयामि । स्तौमीत्यर्थः ॥ श्रुधि । श्रु श्रवणे । लोटो हिः । श्रुशृणुपृकृवृभ्यश्छंदसि । पा. ६. ४. १०२. । इति हेर्धिरादेशः । बहुलं छंदसीति विकरणस्य लुक् । अन्येषामपि दृश्यत इति संहितायां दीर्घः । अवस्युः । अवस्शब्दात्सुप आत्मनः क्यच् । क्याच्छंदसीत्युप्रत्ययः । आचके । कै गै शब्दे । अस्माल्लिट्यादेचः । पा. ६. १. ४५. । इत्यात्वम् द्विर्भावचुत्वे । आतो लोप इटि च । पा० ६. ४. ६४. । इत्याकारलोपः । तिङ्ङतिङ इति निघातः ॥

त्वं विश्वस्य मेधिर दिवश्च ग्मश्च राजसि । स यामनि प्रति श्रुधि ॥ २० ॥

त्वं । विश्वस्य । मेधिर । दिवः । च । ग्मः । च । राजसि ॥ सः । यामनि । प्रति । श्रुधि ॥ २० ॥

हे मेधिर मेधाविन्वरुण त्वं दिवश्च द्युलोकस्यापि ग्मश्च भूलोकस्यापि । एवमात्मकस्य विश्वस्य सर्वस्य जगतो मध्ये राजसि दीप्यसे । स तादृशस्त्वं यामनि क्षेमप्रापणेऽस्मदीये प्रतिश्रुधि प्रतिश्रवणमाज्ञापनं कुरु । रक्षिष्यामीति प्रत्युत्तरं देहीत्यर्थः ॥ दिवः । ऊडिदमित्यादिना षष्ठ्या उदात्तत्वम् । ग्मः । ग्मेत्येतद्भूनामसु पठितम् । आतो धातोरित्यत्रात इति योगविभागादातो लोप इति प्रतिषेधेऽपि व्यत्ययेनाकारलोपः । उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम् । यामनि । या प्रापणे । आतो मनिन्क्वनिब्वनिपश्च । पा. ३. २. ७४. । इति मनिन् । नित्त्वादाद्युदात्तत्वम् । श्रुधि उक्तम् ॥

उदुत्तमं मुमुग्धि नो वि पाशं मध्यमं चृत । अवाधमानि जीवसे ॥ २१ ॥

उत् । उत्ऽतमं । मुमुग्धि । नः । वि । पाशं । मध्यमं । चृत ॥ अव । अधमानि । जीवसे ॥ २१ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नोऽस्माकमुत्तमं शिरोगतं पाशमुन्मुमुग्धि उत्कृष्य मोचय । मध्यममुदरगतं पाशं विचृत वियुज्य नाशय । जीवसे जीवितुमधमानि मदीयान्पादगतान्पाशानवचृत अवकृष्य नाशय ॥ उत्तमम् । उञ्छादिषु पाठादंतोदात्तत्वम् । मुमुग्धि । मुच्लृ मोक्षणे । बहुलं छंदसीति विकरणस्य श्लुः । द्विर्भावः । हलादिःशेषः हुझल्भ्यो हेर्धिः । पा० ६. ४. १०१. । इति हेर्धिरादेशः । तिङ्ङतिङ इति निघातः । चृत । चृती हिंसाग्रंथनयोः । लोटो हिः । तुदादिभ्यः शः । अतो हेरिति हेर्लुक् । जीवसे । जीव प्राणधारणे । तुमर्थे सेसेनित्यसेप्रत्ययः । प्रत्ययस्वरः ॥

(मं० १ सू० ३२)

२.

इंद्र॑स्य॒ नु वी॒र्या॑णि॒ प्र वो॑चं॒ यानि॑ च॒कार॑ प्रथ॒मानि॑ व॒ज्री । अह॒न्नहि॒मन्व॒पस्त॑तर्द॒ प्र व॒क्षणा॑ अभिन॒त्पर्व॑ताना॑म् ॥१॥

इंद्र॑स्य । नु । वी॒र्या॑णि । प्र । वो॒च॒ं । यानि॑ । च॒कार॑ । प्र॒थ॒मानि॑ । व॒ज्री ॥ अह॑न् । अहि॑ं । अनु॑ । अ॒पः । त॒त॒र्द॒ । प्र । व॒क्षणा॑ः । अ॒भि॒न॒त् । पर्व॑ताना॑म् ॥ १ ॥

वज्री वज्रयुक्त इन्द्रः प्रथमानि पूर्वसिद्धानि मुख्यानि वीर्याणि पराक्रमयुक्तानि कर्माणि चकार । तस्येंद्रस्य तानि वीर्याणि नु क्षिप्रं प्रब्रवीमि । कानि वीर्याणीति तदुच्यते । अहिं मेघमहन् हतवान् । तदेतदेकं वीर्यम् । अनु पश्चादपो जलानि ततर्द हिंसितवान् । भूमौ निपातितवानित्यर्थः । इदं द्वितीयं वीर्यम् । पर्वतानां सम्बंधिनीर्वक्षणाः प्रवहणशीला नदीः प्राभिनत् भिन्नवान् । कूलद्वयकर्षणेन प्रवाहितवानित्यर्थः । इदं तृतीयं वीर्यम् । एवमुत्तरत्रापि द्रष्टव्यम् ॥ वीर्याणि । शूर वीर विक्रांतौ । ण्यंतादचो यदिति यत् । णेरनिटीति णिलोपः । तित्स्वरितमिति स्वरितत्वम् । यतोऽनाव इत्याद्युदात्तत्वं न भवति । आद्युदात्तत्वे हि सुशब्देन बहुव्रीहावाद्युदात्तं द्व्यच्छंदसीत्यनेनैवोत्तरपदाद्युदात्तत्वस्य सिद्धत्वाद्वीरवीर्यौ चेति पुनस्तद्विधानमनर्थकं स्यात् । अतोऽवगम्यते यतोऽनाव इत्याद्युदात्तत्वं वीरशब्दे न प्रवर्तत इति । अतः परिशेषात्तित्स्वरितमिति प्रत्ययस्य स्वरितत्वमेव । वोचम् । अस्यतिवक्तिख्यातिभ्योऽङिति च्लेरङादेशः । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । चकार । णलि लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वम् । यद्वृत्तयोगादनिघातः । अहन् । लङीतश्चेतीकारलोपे हल्ङ्याब्भ्य इति तकारलोपः । अहिम् । आङ्पूर्वाद्धंतेराङि श्रिहनिभ्यां ह्रस्वश्च । उ० ४. १३९. । इतीण् प्रत्ययः आङो ह्रस्वत्वं च । चशब्देन वेञो डित् समाने ख्यश्चोदात्त इति डित्त्वं पूर्वपदांतोदात्तत्वं चानुकृष्यते । ततष्टिलोपे पूर्वपदोदात्तत्वम् । ततर्द । उतृदिर् हिंसानादरयोः । तिङ्ङतिङ इति

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

निघातः । वक्षणाः । वक्ष रोषे । क्रुधमंडार्थेभ्यश्च । पा० ३. २. १५१. । इति युच् । चित्स्वरं बाधित्वा व्यत्ययेन प्रत्ययस्वरः ॥

अह॒न्नहिं॒ पर्व॑ते शिश्रिया॒णं त्वष्टा॑स्मै॒ वज्रं॑ स्व॒र्यं॑ ततक्ष । वा॒श्रा॑इ॑व धे॒नव॒ः स्यंद॑माना॒ अंजः॑ समु॒द्रमव॑ जग्मु॒राप॑ः ॥२॥

अह॑न् । अहिं॑ । पर्व॑ते । शि॒श्रि॒या॒णं । त्वष्टा॑ । अ॒स्मै॒ । वज्रं॑ । स्व॒र्यं॑ । त॒त॒क्ष॒ ॥ वा॒श्राःऽइ॑व । धे॒नव॑ः । स्यंद॑मानाः । अंजः॑ । स॒मु॒द्रं । अव॑ । ज॒ग्मुः । आप॑ः ॥ २ ॥

पर्वते शिश्रियाणमाश्रितमहिं मेघमहन् हतवान् । अस्मा इंद्राय स्वर्यं सुष्ठु प्रेरणीयं यद्वा शब्दनीयं स्तुत्यं त्वष्टा विश्वकर्मा वज्रं ततक्ष तनूकृतवान् । तेन वज्रेण मेघे भिन्ने सति स्यन्दमानाः प्रस्रवणयुक्ता आपः समुद्रमंजः सम्यगवजग्मुः प्राप्ताः । तत्र दृष्टांतः । वाश्रा वत्सान्प्रति हंभारवोपेता धेनव इव । यथा धेनवः सहसा वत्सगृहे गच्छंति तद्वत् । शिश्रियाणम् । श्रिञ् सेवायाम् । लिटः कानच् । द्विर्भावहलादिशेषेयङादेशाः । चित इत्यंतोदात्तत्वम् । स्वर्यं । ऋ गतौ । अस्मात्सुपूर्वादृहलोर्ण्यदिति ण्यत् । संज्ञापूर्वको विधिरनित्य इति वृद्ध्यभावः । यद्वा स्वृ शब्दोपतापयोरित्यस्मात् ण्यति पूर्ववद्वृद्ध्यभावः । तित्स्वरितमिति स्वरितत्वम् । वाश्यंत इति वाश्राः । वाशृ शब्दे । स्फायितंचीत्यादिना रक् । जग्मुः । उसि गमहनेत्युपधालोपः ॥

वृ॒षा॒यमा॑णोऽवृणीत॒ सोमं॒ त्रिकं॑द्रुकेष्वपिबत्सु॒तस्य॑ । आ साय॑कं म॒घवा॑दत्त॒ वज्र॒मह॑न्नेनं प्रथम॒जामही॑नां ॥ ३ ॥

वृ॒षा॒यमा॑णः । अ॒वृ॒णी॒त॒ । सोमं॑ । त्रिऽकं॑द्रुकेषु । अ॒पि॒ब॒त् । सु॒तस्य॑ ॥ आ । साय॑कं । म॒घऽवा॑ । अ॒द॒त्त॒ । वज्रं॑ । अह॑न् । ए॒नं॒ । प्र॒थ॒म॒ऽजां । अही॑नां ॥ ३ ॥

वृषायमाणो वृष इवाचरन्निंद्रः सोममवृणीत वृतवान् । त्रिकद्रुकेषु । ज्योतिर्गौरायुरित्येतन्नामकास्त्रयो यागास्त्रिकद्रुका उच्यंते । तेषु सुतस्याभिषुतस्य सोमस्यांशमपिबत् पीतवान् । मघवा धनवानिंद्रः सायकं बंधकं वज्रमादत्त स्वीकृतवान् । तेन च वज्रेणाहीनां मेघानां मध्ये प्रथमजां प्रथमोत्पन्नं मेघमहन् हतवान् । वृषायमाणः वृष इवाचरन् । कर्तुः क्यङ् सलोपश्च । पा० ३. १. ११. । इति क्यङ् । अकृत्सार्वधातुकयोरिति दीर्घः । अदुपदेशाद्धातोरंतोदात्तत्वे क्यङंताद्धातोरंतोदात्तत्वम् । सायकम् । षिञ् बंधने । सिनोतीति सायकः ण्वुल् । लित्स्वरेणाद्युदात्त-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding by MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

त्वम् । प्रथमजाम् । प्रथमं जायत इति प्रथमजाः । जनसनखनक्रमगमो विट् । विड्वनोरित्यात्वम् ॥

यदिंद्राहन्प्रथमजामहीनामान्मायिनाममिनाः प्रोत मायाः । आत्सूर्यं जनयन्द्यामुषासं तादीत्ना शत्रुं न किला विवित्से॥४॥

यत् । इंद्र । अहन् । प्रथमऽजां । अहीनां । आत् । मायिनां । अमिनाः । प्र । उत । मायाः ॥ आत् । सूर्यं । जनयन् । द्यां । उषसं । तादीत्ना । शत्रुं । न । किल । विवित्से ॥ ४ ॥

उत अपि च हे इंद्र यद्यदाहीनां मेघानां मध्ये प्रथमजां प्रथमोत्पन्नं मेघमहन् हतवानसि । आत् तदनंतरं मायिनां मायोपेतानामसुराणां संबंधिनीर्मायाः प्रामिनाः प्रकर्षेण नाशितवानसि । अनंतरं सूर्यमुषसमुषःकालं द्यामाकाशं च जनयन्नुत्पादयन्नावरकमेघनिवारणेन प्रकाशयन् वर्तसे । तादीत्ना तदानीमावरकांधकाराभावाच्छत्रुं घातकं वैरिणं न विवित्से किल त्वं न लब्धवान्खलु ॥ अहन् । हंतेर्लङि हल्ङ्याब्भ्य इति सिलोपः । अडागम उदात्तः । यद्वृत्तयोगादनिघातः । मायिनाम् । मायाशब्दस्य व्रीह्यादिषु पाठाद्व्रीह्यादिभ्यश्च । पा० ५. २. ११६. । इति मत्वर्थीय इनिः । अमिनाः । मीञ् हिंसायाम् । क्रैयादिकः । मीनातेर्निगमे । पा० ७. ३. ८१. । इति ह्रस्वत्वम् । तादीत्ना । तदानीमित्यस्य पृषोदरादित्वाद्वर्णविपर्ययः । किल । निपातस्य चेति दीर्घत्वम् । विवित्से । विद्लृ लाभे । क्रादिनियमात्प्राप्त इट् व्यत्ययेन न भवति ॥

अहन्वृत्रं वृत्रतरं व्यंसमिंद्रो वज्रेण महता वधेन । स्कंधांसीव कुलिशेना विवृक्णाहिः शयत उपपृक्पृथिव्याः ॥५॥

अहन् । वृत्रं । वृत्रऽतरं । विऽअंसं । इंद्रः । वज्रेण । महता । वधेन ॥ स्कंधांसिऽइव । कुलिशेन । विऽवृक्णा । अहिः । शयते । उपऽपृक् । पृथिव्याः ॥ ५ ॥

अयमिंद्रो वज्रेण संपादितो यो महान्वधस्तेन वज्रेण वृत्रतरमतिशयेन लोकानामावरकमंधकाररूपम् । यद्वा वृत्रैरावरणैः सर्वाञ्छत्रून्तरति तं वृत्रमेतन्नामकमसुरं व्यंसं विगतांसं छिन्नबाहुर्यथा भवति तथाहन् हतवान् । अंसच्छेदने दृष्टांतः । कुलिशेन कुठारेण विवृक्णा विशेषतश्छिन्नानि स्कंधांसीव । यथा वृक्षस्कंधाश्छिन्ना भवंति तद्वत् । तथा सत्यहिर्वृत्रः पृथिव्या उपर्युपपृक् सामीप्येन संपृक्तः शयते शयनं करोति । छिन्नकाष्ठवद्भूमौ पततीत्यर्थः ॥ वृत्रतरम् । वृतु

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वर्तने । स्फायितंचीत्यादिना भावे रक्प्रत्ययांतो वृत्रशब्दः । वृत्रेणावरणेन सर्वं तरतीति वृत्रतरः । तरतेः पचाद्यच् । परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्त्वम् । तरपि तु व्यत्ययेन । व्यंसम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्व उदात्तस्वरितयोर्यण इति स्वरितत्वम् । वधेन । हनश्च वध इति भावेऽप् । तत्संनियोगेन धातोर्वधादेशः । स चांतोदात्तः । अंतस्याकारस्यातो लोप इति लोप उदात्तनिवृत्तिस्वरेण प्रत्ययस्योदात्तत्वम् । विवृक्णा । ओव्रश्चू छेदने । कर्मणि निष्ठा । यस्य विभाषेतीट्प्रतिषेधः । ओदितश्च । पा० ८. २. ४५. । इति परत्वान्निष्ठानत्वम् । ततो व्रश्चभ्रस्जेति षत्वे प्राप्ते निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वक्तव्यः । पा० ८. २. ६. ६. । इति । नत्वस्य सिद्धत्वेन झल्परत्वाभावात् षत्वं न भवति कुत्वे तु कर्तव्ये तदसिद्धमेव । पा० ८. २. १. । इति चोः कुरिति कुत्वम् । शेश्छंदसि बहुलमिति शेर्लोपः । गतिरनंतर इति गतेः प्रकृतिस्वरत्वम् । शयते । बहुलं छंदसीति शपो लुगभावः । पृथिव्याः । उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वम् ॥

अ॒यो॒द्धेव॑ दु॒र्मद॒ आ हि जु॒ह्वे म॑हावी॒रं तु॑विबा॒धमृ॑जी॒षम् ।
नाता॑रीदस्य॒ समृ॑तिं व॒धानां॒ सं रु॒जानाः॑ पिपिष॒ इंद्र॑शत्रुः ॥ ६ ॥

अ॒यो॒द्धाऽइ॑व । दुः॒ऽमदः॑ । आ । हि । जु॒ह्वे । म॒हा॒ऽवी॒रं । तु॒वि॒ऽबा॒धं । ऋ॒जी॒षं ॥ न । अ॒ता॒री॒त् । अ॒स्य॒ । सम्ऽऋ॑तिं । व॒धानां॑ । सं । रु॒जानाः॑ । पि॒पि॒षे॒ । इंद्र॑ऽशत्रुः ॥ ६ ॥

दुर्मदो दुष्टमदोपेतो हर्षयुक्तो वृत्रोऽयोद्धेव योद्धृरहित इवेंद्रं आजुह्वे हि आहूतवान्खलु । कीदृशमिंद्रम् महावीरम् । गुणैर्महान्भूत्वा शौर्योपेतम् । तुविबाधम् बहूनां बाधकम् । ऋजीषम् शत्रूणामपार्जकम् । अस्येदृशस्येंद्रस्य संबंधिनो ये शत्रुवधाः संति तेषां वधानां समृतिं संगमं नातारीत् । पूर्वोक्तो दुर्मदस्तरीतुं नाशक्नोत् । इंद्रशत्रुः इंद्रः शत्रुर्घातको यस्य वृत्रस्य तादृशो वृत्र इंद्रेण हतो नदीषु पतितः सन् रुजाना नदीः संपिपिषे सम्यक् पिष्टवान् । सर्वान् लोकानावृण्वतो वृत्रदेहस्य पातेन नदीनां कूलानि तत्रत्यं पाषाणादिकं च चूर्णीभूतमित्यर्थः ॥ अयोद्धा इव । न विद्यते योद्धास्येति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वम् । समासांतविधेरनित्यत्वान्नद्यृतश्च । पा० ५. ४. १५३. । इति कबभावः । जुह्वे । ह्वेञ् स्पर्धायां शब्दे च । अभ्यस्तस्य च । पा० ६. १. ३३. । इति संप्रसारणम् । उवङादेशाभावश्छांदसः । यद्वा छंदस्युभयथेति सार्वधातुकसंज्ञायां हुश्नुवोः सार्वधातुके । पा० ६. ४. ८७. । इति यणादेशः । अत्र लक्षणप्रतिपदोक्तपरिभाषा लक्ष्यानुरोधान्नाश्रीयते । इतरथा ह्याजुह्वान इत्यादिषु यणादेशो न स्यात् । न चैवं सति सातये हुवे वामित्यादावपि तथा स्यादिति वाच्यम् । अनेकाच्त्वाभावात् । अने-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

काच इति हि तत्रानुवर्तते । प्रत्ययस्वरेणांतोदात्तत्वम् हि चेति निघातप्रतिषेधः । महावीरम् । महांश्चासौ वीरश्च महावीरः । आन्महतः । पा० ६. ३. ४६. । इत्यात्वम् । तुविबाधम् । बाधृ विलोडने । तुवीन् प्रभूतान्बाधत इति तुविबाधः । पचाद्यच् । कृदुत्तरपदप्रकृतिस्वरत्वम् । समृतिम् । तादौ चेति गतेः प्रकृतिस्वरत्वम् । रुजानाः । रुजो भंगे । रुजंति कूलानीति रुजाना नद्यः । रुजाना नद्यो भवंति रुजंति कूलानि । नि० ६. ४. । इति यास्कः । व्यत्ययेन शानच् । तुदादिभ्यः शः । नुमभावश्छांदसः । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे विकरणस्वरः । पिपिषे पिष्लृ संचूर्णने । व्यत्ययेन लिट् । इंद्रशत्रुः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ॥

अपादहस्तो अपृतन्यदिंद्रमास्य वज्रमधि सानौ जघान ।
वृष्णो वध्रिः प्रतिमानं बुभूषन्पुरुत्रा वृत्रो अशयद्व्यस्तः ॥ ७ ॥

अपात् । अहस्तः । अपृतन्यत् । इंद्रं । आ । अस्य । वज्रं । अधि । सानौ । जघान ॥ वृष्णः । वध्रिः । प्रतिऽमानं । बुभूषन् । पुरुऽत्रा । वृत्रः । अशयत् । विऽअस्तः ॥ ७ ॥

अपाद्वज्रेण छिन्नत्वात्पादरहितः । अहस्तो हस्तरहितो वृत्र इंद्रमुद्दिश्यापृतन्यत् । पृतनां युद्धमैच्छत् । द्वेषाधिक्येन बहुधा विद्धोऽपि युद्धं न परित्यक्तवानित्यर्थः । अस्य हस्तपादहीनस्य वृत्रस्य सानौ पर्वतसानौ पर्वतसानुसदृशे प्रौढस्कंधेऽध्युपरि वज्रमाजघान इंद्र आभिमुख्येन प्रक्षिप्तवान् । अशक्तस्यापि युद्धेच्छायां दृष्टांतः । वध्रिश्छिन्नमुष्कः पुरुषो वृष्णो रेतःसेचनसमर्थस्य पुरुषांतरस्य प्रतिमानं सादृश्यं बुभूषन् प्राप्तुमिच्छन् यथा न शक्नोति तद्वदयमिति शेषः । स वृत्रः पुरुत्रा बहुष्ववयवेषु व्यस्तो विविधं क्षिप्तस्ताडितः सन् अशयत् भूमौ पतितवान् ॥ अपात् । बहुव्रीहौ पादशब्दस्यांत्यलोपश्छांदसः । अहस्तः । बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वम् । अपृतन्यत् । सुप आत्मनः क्यच् । कव्यध्वरपृतनस्येत्यंत्यलोपः । बुभूषन् । सनिग्रहगुहोश्च । पा० ७. २. १२. । इतीट्प्रतिषेधः । पुरुत्रा । देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम् । पा० ५. ४. ५६. । इति सप्तम्यर्थे त्राप्रत्ययः । अशयत् । व्यत्ययेन परस्मैपदम् । बहुलं छंदसीति शपो लुगभावः । व्यस्तः । असु क्षेपण इत्यस्मात्कर्मणि क्तः । यस्य विभाषेतीट्प्रतिषेधः । गतिरनंतर इति गतेः प्रकृतिस्वरत्वम् । संहितायामुदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वम् ॥

नदं न भिन्नममुया शयानं मनो रुहाणा अति यंत्यापः ।
याश्चिद्वृत्रो महिना पर्यतिष्ठत्तासामहिः पत्सुतः शीर्बभूव ॥ ८ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

नदं । न । भिन्नं । अमुया । शयानं । मनः । रुहाणाः । अति । यंति । आपः ॥ याः । चित् । वृत्रः । महिना । परिऽअतिष्ठत् । तासां । अहिः । पत्सुतःऽशीः । बभूव ॥ ८ ॥

अमुयामुष्यां पृथिव्यां शयानं पतितं मृतं वृत्रमापो जलान्यतियंति अतिक्रम्य गच्छंति । तत्र दृष्टांतः । भिन्नं वहुधा भिन्नकूलं नदं न सिंधुमिव । यथा वृष्टिकाले प्रभूता आपो नद्याः कूलं भित्त्वातिक्रम्य गच्छंति तद्वत् । कीदृश्य आपः । मनोरुहाणाः नृणां चित्तमारोहंत्यः । पुरा वृत्रे जीवति सति तेन निरुद्धा मेघस्थिता आपो भूमौ वृष्टा न भवंति । तदानीं नृणां मनः खिद्यते । मृते तु वृत्रे निरोधरहिता आपो वृत्रशरीरमुल्लंघ्य प्रवहंति । तदा वृष्टिलाभेन तु मनुष्यास्तुष्यंतीत्यर्थः । तदेतदुत्तरार्धेन स्पष्टीक्रियते । वृत्रो जीवनदशायां महिना स्वकीयेन महिम्ना याश्चिद्या एव महीगता आपः पर्यतिष्ठत् परिवृत्य स्थितवान् । अहिर्वृत्रो मेघस्तासामपां पत्सुतःशीः पादस्याधःशयानो वभूव । यद्यप्यपां पादो नास्ति तथाप्यद्भिर्वृत्रस्याभिलंघितत्वात्पादस्याधः शयनमुपपद्यते ॥ भिन्नम् । रदाभ्यां निष्ठातो नः । पा० ८. २. ४२. । इति नत्वम् । अमुया सुपां सुलुगिति सप्तम्या याजादेशः । शयानम् । शीङः सार्वधातुके । पा० ७. ४. २१. । इति गुणः । धातोर्ङित्त्वाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः । रुहाणाः । रुह वीजजन्मनि प्रादुर्भावे । व्यत्ययेन शानच् । कर्तरि शपि प्राप्ते व्यत्ययेन शः । अनित्यमागमशासनमिति वचनान्मुगभावः । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे विकरणस्वरे प्राप्ते व्यत्ययेन धातुस्वरः । महिना । मह पूजायाम् । इन्सर्वधातुभ्य इतीन्प्रत्ययः । व्यत्ययेन विभक्तेरुदात्तत्वम् । यद्वा महिना महिम्ना । महच्छब्दस्य पृथ्वादिषु पाठात्तस्य भाव इत्यस्मिन्नर्थे पृथ्वादिभ्य इमनिज्वेतीमनिच्प्रत्ययः । टेरिति टिलोपः । चित इत्यंतोदात्तत्वम् । तृतीयैकवचनेऽल्लोपे सत्युदात्तनिवृत्तिस्वरेण तस्योदात्तत्वम् । मकारलोपश्छांदसः । पत्सुतःशीः । पादस्याधः शेत इति पत्सुतःशीः क्विप् चेति क्विप् । तसि पद्दन्नित्यादिना पादशब्दस्य पदादेशः । शस्प्रभृतिष्विति प्रभृतिशब्दः प्रकारवचन इति शलादोषणीत्यत्रापि दोषन्नादेशो भवति । पा० ६. १. ६३. । इत्युक्तत्वात् । मध्ये सु इति शब्दोपजनश्छांदसः । यद्वा पादशब्दस्य सप्तमीबहुवचने पदादेशे कृत इतराभ्योऽपि दृश्यंते । पा० ५. ३. १४. । इति सप्तम्यर्थे तसिल् । लुगभावश्छांदसः ॥

नीचावया अभवद्वृत्रपुत्रेंद्रो अस्या अव वधर्जभार । उत्तरा सूरधरः पुत्र आसीद्दानुः शये सहवत्सा न धेनुः ॥ ९ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

नीचाऽवयाः। अभवत्। वृत्रऽपुत्रा। इंद्रः। अस्याः। अव। वधः। जभार॥ उत्ऽतरा। सूः। अधरः। पुत्रः। आसीत्। दानुः। शये। सहऽवत्सा। न। धेनुः॥ ९॥

वृत्रपुत्रः वृत्रः पुत्रो यस्या मातुः सेयं माता वृत्रपुत्रा नीचावया न्यग्भावं प्राप्ता हताभवत्। पुत्रं प्रहाराद्रक्षितुं पुत्रदेहस्योपरि तिरश्ची पतितवतीत्यर्थः। तदानीमयमिंद्रोऽस्या मातुरवाधोभागे वृत्रस्योपरि वधो हननसाधनमायुधं जभार प्रहृतवान् तदानीं सूर्मातोत्तरोपरि स्थितासीत्। पुत्रस्त्वधोभागस्थित आसीत्। साच दानुर्दानवी वृत्रमाता शये मृता शयनं कृतवतीति। तत्र दृष्टान्तः। धेनुर्लोकप्रसिद्धा गौः सहवत्सा न। यथा वत्ससहिता शयनं करोति तद्वत्। नीचावयाः। वेति खादतीति वयो बाहुः। औणादिकोऽसिप्रत्ययः। न्यंचौ वयसौ यस्याः सा नीचावयाः। न्यंच्शब्दादुत्तरस्या विभक्तेः सुपां सुपो भवंतीति तृतीयैकवचनादेशः। अच इत्यकारलोपे चाविति दीर्घत्वम्। अंचेश्छंदस्यसर्वनामस्थानमिति तस्योदात्तत्वम्। समासे लुगभावश्छांदसः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। यद्वा नीचौ निकृष्टौ वयसौ यस्याः सा। पूर्वपदस्य दीर्घश्छांदसः। वधः। हन्यतेऽनेनेति वधः। असुनि हंतेर्वधादेशः। नित्त्वादाद्युदात्तत्वम्। जभार। हृग्रहोर्भ इति भत्वम्। सूः। षूङ् प्राणिगर्भविमोचने। सूते गर्भं विमुंचतीति सूर्माता। क्विप् चेति क्विप्। दानुः। दोऽवखंडने। दाभाभ्यां नुः। उ० ३. ३२.। शये। लटि लोपस्त आत्मनेपदेषु। पा०। ७. १. ४. १.। इति तलोपः। शीङः सार्वधातुक इति गुणेऽयादेशः॥

अतिष्ठंतीनामनिवेशनानां काष्ठानां मध्ये निहितं शरीरं। वृत्रस्य निण्यं वि चरंत्यापो दीर्घं तम आशयदिंद्रशत्रुः॥१०॥

अतिष्ठंतीनां। अनिऽवेशनानां। काष्ठानां। मध्ये। निऽहितं। शरीरं॥ वृत्रस्य। निण्यं। वि। चरंति। आपः। दीर्घं। तमः। आ। अशयत्। इंद्रऽशत्रुः॥ १०॥

वृत्रस्य शरीरमापो विचरंति विशेषेणोपर्याक्रम्य प्रवहंति। कीदृशं शरीरम्। निण्यम् निर्नामधेयम्। अप्सु मग्नत्वेन गूढत्वात्तदीयं नाम न केनापि ज्ञायते। एतदेव स्पष्टीक्रियते। काष्ठानामपां मध्ये निहितं निक्षिप्तम्। कीदृशानां काष्ठानाम्। अतिष्ठंतीनाम् स्थितिरहितानाम्। अनिवेशनानाम् उपवेशनरहितानाम्। प्रवहणस्वभावादेतासाम् मनुष्यवन्न क्वापि स्थितिः संभवति। इंद्रशत्रुर्वृत्रो जलमध्ये शरीरे प्रक्षिप्ते सति दीर्घं तमो दीर्घं निद्रात्मकं मरणं यथा भवति तथाशयत् सर्वतः पतितवान्॥ अतिष्ठंतीनाम्। अव्ययपूर्वपदप्रकृतिस्वरत्वम्। अनिवे-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

शनानाम् । निविशंत्यस्मिन्निति निवेशनं स्थानम् । करणाधिकरणयोश्चेत्यधिकरणे ल्युट् । तद्रहितानाम् । बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वम् । क्रांत्वा स्थिताः काष्ठाः । पृषोदरादिः । निहितम् । गतिरनंतर इति गतेः प्रकृतिस्वरत्वम् । अत्र यास्कः । अतिष्ठंतीनामनिविशमानानामित्यस्थावराणां काष्ठानां मध्ये निहितं शरीरं मेघः । शरीरम् । शृणातेः शम्नातेर्वा । वृत्रस्य निण्यं निर्णामं विचरंति विजानंत्याप इति दीर्घं द्राघतेस्तमस्तनोतेराशयदाशेतेरिंद्रशत्रुरिंद्रोऽस्य शमयिता वा शातयिता तस्मादिंद्रशत्रुः । तत्को वृत्रो मेघ इति नैरुक्तास्त्वाष्ट्रोऽसुर इत्यैतिहासिकाः । नि० २. १६ । इति ॥

दासपत्नीरहिगोपा अतिष्ठन्निरुद्धा आपः पणिनेव गावः ।
अपां बिलमपिहितं यदासीद्वृत्रं जघन्वाँ अप तद्ववार ॥११॥

दासऽपत्नीः । अहिऽगोपाः । अतिष्ठन् । निऽरुद्धाः । आपः । पणिनाऽइव । गावः ॥ अपां । बिलं । अपिऽहितं । यत् । आसीत् । वृत्रं । जघन्वान् । अप । तत् । ववार ॥ ११ ॥

दासपत्नीः । दासो विश्वोपक्षपणहेतुर्वृत्रः पतिः स्वामी यासामपां ता दासपत्नीः । अत एवाहिगोपाः अहिः वृत्रो गोपा रक्षको यासां ताः । गोपनं नाम स्वच्छंदेन यथा न प्रवहंति तथा निरोधनम् । एतदेव स्पष्टीक्रियते । आपो निरुद्धा अतिष्ठन्निति । तत्र दृष्टांतः । पणिनेव गावः पणिनामकोऽसुरो गा अपहृत्य बिले स्थापयित्वा बिलद्वारमाच्छाद्य यथा निरुद्धवांस्तथेत्यर्थः । अपां यद्बिलं प्रवहणद्वारमपिहितं वृत्रेण निरुद्धमासीत् । तद्बिलं प्रवहणद्वारं वृत्रं जघन्वान्हतवानिंद्रोऽपववार अपवृतमकरोत् । वृत्रकृतमपां निरोधं परिहृतवान् । अत्र यास्कः । दासपत्नीर्दासाधिपत्न्यो दासो दस्यतेरुपदासयति कर्माण्यहिगोपा अतिष्ठन्नहिना गुप्ताः अहिरयनादेत्यंतरिक्षेऽयमपीतरोऽहिरे तस्मादेव निर्ह्रसितोपसर्ग आहंतीति । निरुद्धा आपः पणिनेव गावः । पणिर्वणिग्भवति पणिः पणनाद्वणिक्पण्यं नेनेक्ति । अपां बिलमपिहितं यदासीत् । बिलं भरं भवति बिभर्तेर्वृत्रं जघ्निवानपववार तद्वृत्रो वृणोतेर्वा वर्ततेर्वा वर्धतेर्वा यदवृणोत्तद्वृत्रस्य वृत्रत्वमिति विज्ञायते । यदवर्तत तद्वृत्रस्य वृत्रत्वमिति विज्ञायते यदवर्धत तद्वृत्रस्य वृत्रत्वमिति विज्ञायते । नि० २. १७. । इति ॥ दासपत्नीः । दसु उपक्षये । दासयतीति दासो वृत्रः । पचाद्यच् । चित इत्यंतोदात्तत्वम् । दासः पतिर्यासां । विभाषा सपूर्वस्य । पा० ४. १. ३४. । इति ङीप् । तत्संनियोगेनेकारस्य नकारः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । यद्वा दासस्य पालयित्र्यः । पत्यावैश्वर्य इति पूर्वपदप्रकृतिस्वरत्वम् । अहिगोपाः । गुपू रक्षणे । गोपायतीति गोपाः । आयादय आर्धधातुके वा । पा०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding: KS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

३. १. ३१. । इत्यायप्रत्ययः । ततः क्विप् । अतो लोपः । वेरपृक्तलोपाद्वलिलोपो वलीयानिति पूर्वं यकारलोपः । न चाचः परस्मिन्नित्यतो लोपस्य स्थानिवत्त्वम् । न पदांतद्विर्वचनेति प्रतिषेधात् । अहिर्गोपा यासाम् । पूर्ववत्स्वरः । निरुद्धाः । रुधिर् आवरणे । झषस्तथोर्धोऽधः । पा० ८. २. ४०. । इति निष्ठातकारस्य धकारः । गतिरनंतर इति गतेः प्रकृतिस्वरत्वम् । जघन्वान् । हंतेर्लिटः क्वसुः । अभ्यासाच्च । पा० ७. ३. ५५. । इत्यभ्यासादुत्तरस्य हकारस्य कुत्वम् । क्रादिनियमप्राप्तस्येटो विभाषा गमहनेत्यादिना । पा० ७. २. ६८. । विकल्पविधानादभावः । संहितायां नकारस्य रुत्वानुनासिकावुक्तौ ॥

अश्व्यो॒ वारो॑ अभव॒स्तदि॑न्द्र सृ॒के यत्त्वा॑ प्र॒त्यह॑न्दे॒व एकः॑ । अज॑यो॒ गा अज॑यः शूर॒ सोम॒मवा॑सृज॒ः सर्त॑वे स॒प्त सिंधू॑न् ॥ १२ ॥

अश्व्यः॑ । वारः॑ । अ॒भ॒वः॒ । तत् । इं॒द्र॒ । सृ॒के । यत् । त्वा॒ । प्र॒ति॒ऽअह॑न् । दे॒वः । एकः॑ ॥ अज॑यः । गाः । अज॑यः । शू॒र॒ । सोम॑म् । अव॑ । अ॒सृ॒जः॒ । सर्त॑वे । स॒प्त । सिंधू॑न् ॥ १२ ॥

सृके वज्रे । सृको वृक इति वज्रनामसु पठितत्वात् । देवो दीप्यमानः सर्वायुधकुशल एकोऽद्वितीयो वृत्रो यद्यदा त्वा त्वां प्रत्यहन् प्रतिकूलत्वेन प्रहृतवान् । तत्तदानीं त्वमश्व्यो वारोऽश्वसंबंधी वालोऽभवः । यथाश्वस्य वालोऽनायासेन मक्षिकादीन्निवारयति तद्वद्वृत्रमगणयित्वा निराकृतवानित्यर्थः । किंच गाः पणिनापहृतास्त्वमजयः जितवान् । हे शूर शौर्ययुक्तेंद्र सोममजयः जितवान् । तथाच तैत्तिरीयाः । त्वष्टा हतपुत्र इत्यस्मिन्नुपाख्याने समामनन्ति । स यज्ञवेशसं कृत्वा प्रासहा सोममपिबदिति । सप्त सिंधून् । इमं मे गंग इत्यस्यामृच्याम्नाता गंगाद्याः सप्तसंख्याका नदीः सर्तवे सर्तुं प्रवाहरूपेण गंतुमवासृजः त्यक्तवान् । वृत्रकृतं प्रवाहनिरोधं निराकृतवानित्यर्थः ॥ अश्व्यः अश्वे भवः । भवे छंदसीति यत् । यतोऽनाव इत्याद्युदात्तत्वम् । वारयति दंशमशकानिति वारः । पचाद्यच् । कपिलकादित्वाल्लत्वविकल्पः । वृषादित्वादाद्युदात्तत्वम् । प्रत्यहन् । यद्वृत्तान्नित्यमिति निघातप्रतिषेधः । तिङि चोदात्तवतीति गतेरनुदात्तत्वम् । अजयः । गा इत्यस्य वाक्यांतरगतत्वात्तदपेक्षयास्य तिङ्ङतिङ इति निघातो न भवति । समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्या इति वचनात् । सर्तवे । तुमर्थे सेसेनिति तवेन्प्रत्ययः । नित्त्वादाद्युदात्तत्वम् ॥

नास्मै॑ वि॒द्युन्न त॑न्य॒तुः सि॑षेध॒ न यां मिह॒मकि॑रद्ध्रा॒दुनिं॑ च । इंद्र॑श्च॒ यद्यु॑यु॒धाते॒ अहि॑श्चो॒ताप॒रीभ्यो॑ म॒घवा॒ वि जि॑ग्ये १३

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

न । अस्मै । विऽद्युत् । न । तन्यतुः । सिसेध । न । यां । मिहं । अकिरत् । ह्रादुनिं । च ॥ इंद्रः । च । यत् । युयुधाते इति । अहिः । च । उत । अपरीभ्यः । मघऽवा । वि । जिग्ये ॥ १३ ॥

इंद्रं निषेद्धुं वृत्रो यान्विद्युदादीन्मायया निर्मितवान् ते सर्वेऽप्येनं निषेद्धुमशक्ताः। सोयमर्थोऽनेन मंत्रेणोच्यते । अस्मै इंद्रार्थं निर्मिता विद्युन्न सिषेध इंद्रं न प्राप्नोत् । तथा तन्यतुर्गर्जनं यां मिहं सेचनं यां वृष्टिमकिरत् । वृत्रो विक्षिप्तवान् । सापि वृष्टिः न सिषेध । ह्रादुनिं चाशनिमपि यां वृत्रः प्रयुक्तवान् सापि न सिषेध । इंद्रश्चाहिश्चें-द्रवृत्रावुभावपि यद्यदा युयुधाते युद्धं कृतवन्तौ । तदानीं विद्युदादयो न प्राप्ता इति पूर्वत्रान्वयः । उत अपि च मघवा धनवानिंद्रोऽपरीभ्योऽपराभ्योऽन्यासामपि वृत्रनिर्मितानां मायानां सकाशाद्विजिग्ये विशेषेण जितवान्॥ सिषेध । षिधु गत्याम्। मिहम् । मिह सेचने । मेहति सिंचतीति मिह्र वृष्टिः । क्विप्चेति क्विप् । अकिरत् । कॄ विक्षेपे । तुदादिभ्यः शः । ॠत इद्धातोरितीत्वम् । अडागम उदात्तः । यद्वृत्त-योगादनिघातः । युयुधाते । युध संप्रहारे । लिटि प्रत्ययस्वरः । जिग्ये । सन्लि-टोर्जेः । पा० ७. ३. ५७. । इत्यभ्यासादुत्तरस्य जकारस्य कुत्वम् ॥

अहेर्यातारं कमपश्य इंद्र हृदि यत्ते जघ्नुषो भीरगच्छत् । नव च यन्नवतिं च स्रवंतीः श्येनो न भीतो अतरो रजांसि १४

अहेः । यातारं । कं । अपश्यः । इंद्र । हृदि । यत् । ते । जघ्नुषः । भीः । अगच्छत् ॥ नव । च । यत् । नवतिं । च । स्रवंतीः । श्येनः । न । भीतः । अतरः । रजांसि ॥ १४ ॥

हे इंद्र जघ्नुषो वृत्रं हतवतस्तव हृदि चित्ते यद्यदि भीरगच्छत् न हतवानस्मीति बुद्ध्या भयं प्राप्नुयात् । तर्ह्यहेर्वृत्रस्य यातारं हंतारं कमपश्यः । त्वत्तोऽन्यं कं पुरुषं दृष्टवानसि । तादृशस्य पुरुषांतरस्याभावान्मा भूत्तव भयमित्यर्थः । यद्यस्मात्का-रणात्त्वं नव च नवतिं च स्रवंतीरेकोनशतसंख्याकाः प्रवहंतीर्नदीः प्राप्य रजांसि तत्रत्यान्युदकान्यतरः तीर्णवानसि । तत्र दृष्टांतः । श्येनो न श्येननामको बल-वान्पक्षीव दूरगमनात्तव भयमासीदिति गम्यते । तद्भयं मा भूदित्यभिप्रायः । तच्च दूरगमनं ब्राह्मणे समाम्नातम् । इंद्रो वै वृत्रं हत्वा नास्तृषीति मन्यमानः पराः परा-वतोऽगच्छदिति । तैत्तिरीयाश्चामनंति । इंद्रो वृत्रं हत्वा परां परावतमगच्छदपरा-धमिति स मन्यमान इति ॥ हृदि । पद्दन्नित्यादिना हृदयशब्दस्य हृदादेशः । ऊडिद-मित्यादिना विभक्तेरुदात्तत्वम् । जघ्नुषः । हंतेर्लिटः क्वसुः । षष्ठ्येकवचने वसोः संप्र-सारणमिति संप्रसारणं परपूर्वत्वे । शासिवसिघसीनां चेति षत्वम् । नच षत्वतुकी-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

रसिद्धः। पा० ६. १. ८६.। इत्येकादेशस्यासिद्धत्वात् षत्वं न प्राप्नुयादिति वाच्यं। संप्रसारणङीट्सु प्रतिषेधो वक्तव्यः । पा० ६. १. ८६. ६. । इत्यसिद्धवद्भावस्य प्रतिषिद्धत्वात् गमहनेत्यादिनोपधालोपः। नचासिद्धवदत्राभादिति संप्रसारणस्यासिद्धवद्भावः। भिन्नाश्रयत्वात्। संप्रसारणं हि षष्ठ्येकवचने । उपधालोपस्तु वसाविति भिन्नाश्रयत्वम्। स्रवंतीः। स्रु गतौ। श्यप्श्यनोर्नित्यम्। पा० ७. १. ८१.। इति नुमागमः। शपः पित्त्वादनुदात्तत्वम्। शतुश्च लसार्वधातुकस्वरेणाद्युदात्तत्वम्। अतरः। यद्वृत्तयोगादनिघातः॥

इंद्रो॑ या॒तोऽव॑सितस्य॒ राजा॒ शम॑स्य च शृं॒गिणो॒ वज्र॑बाहुः। सेदु॒ राजा॑ क्षयति चर्ष॒णीना॑म॒रान्न ने॒मिः परि॒ ता ब॑भूव॥ १५॥

इंद्रः॑। या॒तः। अव॑ऽसितस्य। राजा॑। शम॑स्य। च॒। शृं॒गिणः॑। वज्र॑ऽबाहुः॥ सः। इत्। ऊं॒ इति॑। राजा॑। क्ष॒यति॒। च॒र्ष॒णीनां। अ॒रान्। न। ने॒मिः। परि॑। ता। ब॒भू॒व॒॥ १५॥

वज्रबाहुरिंद्रः शत्रौ हते सति निःसपत्नो भूत्वा यातो गच्छतो जंगमस्यावसितस्यैकत्रैव स्थितस्य स्थावरस्य शमस्य शांतस्य शृंगराहित्येन प्रहरणादावप्रवृत्तस्याश्वगर्दभादेः शृंगिणः शृंगोपेतस्योग्रस्य महिषबलीवर्दादेश्च राजाभूत्। सेदु स एवेंद्रश्चर्षणीनां मनुष्याणां राजा भूत्वा क्षयति निवसति ता तानि पूर्वोक्तानि जंगमादीनि सर्वाणि परिबभूव व्याप्तवान्। तत्र दृष्टांतः। अरान्न नेमिः । यथा रथचक्रस्य परितो वर्तमाना नेमिररान्नाभौ कीलितान्काष्ठविशेषान्व्याप्नोति तद्वत्॥ यातः। या प्रापणे। याति गच्छतीति यात्। लटः शतृ। सावेकाच इति विभक्तेरुदात्तत्वम्। सः सोऽचि लोपे चेदिति संहितायां सोर्लोपः। ता। शेश्छंदसि बहुलमिति शेर्लोपः। बभूव। भवतेर्लिटो णलि भवतेरः । पा० ७. ४. ७३. । इत्यभ्यासस्यात्वम् । कृताकृतप्रसंगितया वुगागमस्य नित्यत्वाद्वृद्धेः पूर्वं वुगागमः । यद्वा। इंधिभवतिभ्यां च। पा० १. २. ६.। इति लिटः कित्त्वाद्वृद्ध्यभावः। न चासिद्धवदत्राभादिति तस्यासिद्धत्वादुवङादेशः शंकनीयः । वुग्युटावुवङ्यणोः सिद्धौ भवतः। पा० ६. ४. ८८. १.। इति तस्य सिद्धत्वात्। तिङ्ङतिङ इति निघातः॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

मं० १ सू० ४८

३.

सह वामेन न उषो व्युच्छा दुहितर्दिवः । सह द्युम्नेन बृहता विभावरि राया देवि दास्वती ॥ १ ॥

सह । वामेन । नः । उषः । वि । उच्छ । दुहितः । दिवः ॥ सह । द्युम्नेन । बृहता । विभाऽवरि । राया । देवि । दास्वती ॥ १ ॥

हे दुहितर्दिवः द्युदेवतायाः पुत्रि । उषः उषःकालदेवते नोऽस्मदर्थे वामेन धनेन सह व्युच्छ प्रभातं कुरु । हे विभावरि उषोदेवते बृहता प्रभूतेन द्युम्नेनान्नेन सह व्युच्छ । हे देवि त्वं दास्वती दानयुक्ता सती राया पशुलक्षणेन धनेन सह व्युच्छ ॥ उच्छ । उच्छी विवासे । दुहितर्दिवः । सुबामंत्रिते परांगवत्स्वर इत्यत्र परमपि छंदसीति वचनाद्दिव इत्यस्य पूर्वांगवद्भावे सत्यामंत्रितस्य चेति षष्ठ्यामंत्रितसमुदायस्याष्टमिकं सर्वानुदात्तत्वम् । बृहता । बृहन्महतोरुपसंख्यानमिति विभक्तेरुदात्तत्वम् । विभावरि । भा दीप्तौ । आतो मनिन्निल्यादिना वनिप् । वनो रचेति ङीप् । तत्संनियोगेन नकारस्य रेफादेशः । संबुद्धौ ह्रस्वत्वम् । दास्वती । डुदाञ् दाने । भावेऽसुन् प्रत्ययः । दा दानमस्या अस्तीति दास्वती । मादुपधाया इति मतुपो वत्वम् । उगितश्चेति ङीप् ॥

अश्वावतीर्गोमतीर्विश्वसुविदो भूरि च्यवंत वस्तवे । उदीरय प्रति मा सूनृता उषश्चोद राधो मघोनां ॥ २ ॥

अश्वऽवतीः । गोऽमतीः । विश्वऽसुविदः । भूरि । च्यवंत । वस्तवे ॥ उत् । ईरय । प्रति । मा । सूनृताः । उषः । चोद । राधः । मघोनां ॥ २ ॥

अश्वावतीर्बह्वश्वोपेता गोमतीर्बहुभिर्गोभिर्युक्ताः विश्वसुविदः कृत्स्नस्य धनस्य सुष्ठु लंभयित्र्य उषोदेवता वस्तवे प्रजानां निवासाय भूरि प्रभूतं यथा भवति तथा च्यवंत प्राप्ताः । हे उषोदेवते मा प्रति मामुद्दिश्य सूनृताः प्रियहितवाच उदीरय ब्रूहि । मघोनां धनवतां संबंधि राधो धनं चोद अस्मदर्थं प्रेरय ॥ अश्वावतीः । मंत्रे सोमाश्वेंद्रियविश्वदेव्यस्य मताविति पूर्वपदस्य दीर्घत्वम् । वा छंदसीति पूर्वसवर्णदीर्घनिषेधस्य पाक्षिकस्योक्तेः पूर्वसवर्णदीर्घत्वम् । च्यवंत । च्युङ् गतौ । लङि बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । वस्तवे । वस निवासे । तुमर्थे सेसेनिति तवेन्प्रत्ययः । नित्त्वादाद्युदात्तत्वम् । ईरय । ईर गतौ कंपने च । हेतुमति णिच् । चोद । चुद संचोदने । चौरादिकः । लोटि छंदस्युभयथेति शप आर्धधातुकत्वात् णेरनिटीति णिलोपः । शपः पित्त्वादनुदात्तत्वे

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

धातुस्वरः। पादादित्वान्निघाताभावः। मघोनाम्। षष्ठीबहुवचने श्वयुवमघोनामतद्धित इति संप्रसारणम्॥

उवासोषा उच्छाच्च नु देवी जीरा रथानां। ये अस्या आचरणेषु दध्रिरे समुद्रे न श्रवस्यवः॥ ३॥

उवास। उषाः। उच्छात्। च। नु। देवी। जीरा। रथानां॥ ये। अस्याः। आऽचरणेषु। दध्रिरे। समुद्रे। न। श्रवस्यवः॥ ३॥

उषा देव्युवास पुरा निवासमकरोत्। प्रभातं कृतवतीत्यर्थः। च नु अद्याप्युच्छात्। व्युच्छति प्रभातं करोति। कीदृशी देवी। रथानां जीरा प्रेरयित्री। उषःकाले हि रथाः प्रेर्यंते। अस्या उषस आचरणेष्वागमनेषु ये रथाः दध्रिरे धृताः सज्जीकृता भवंति तेषां रथानामिति पूर्वत्रान्वयः। रथप्रेरणे दृष्टांतः। श्रवस्यवो धनकामाः समुद्रे न। यथा समुद्रमध्ये नावः सज्जीकृत्य प्रेरयंति तद्वत्॥ उवास। वस निवासे। णलि लिट्यभ्यासस्योभयेषाम्। पा० ६. १. १७.। इत्यभ्यासस्य संप्रसारणम्। लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वम्। उच्छात्। लेट्याडागमः। इतश्च लोप इतीकारलोपः। तुदादित्वाच्छप्रत्ययः। आगमानुदात्तत्वे प्रत्ययस्वरः। उषा इत्यस्य वाक्यांतरगतत्वात्तदपेक्षयास्य निघातो न भवति। समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्या इति वचनात्। जीरा। जु इति गत्यर्थः सौत्रो धातुः। जोरीचेति रक् प्रत्ययः। अस्याः। इदमोऽन्वादेश इत्यशादेशोऽनुदात्तः। विभक्तिरपि सुप्त्वादनुदात्तेति सर्वानुदात्तत्वम्। आचरणेषु। चर गत्यर्थः। ल्युट्च चेति भावे ल्युट्। लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वम्। कृदुत्तरपदप्रकृतिस्वरत्वम्। दध्रिरे। धृङ् अवस्थाने। लिटः कित्त्वाद्गुणाभावे यणादेशः। चित्त्वादंतोदात्तत्वम्। यच्छब्दयोगादनिघातः। श्रवस्यवः। श्रूयत इति श्रवो धनम्। असुन्। तदात्मन इच्छंतीति श्रवस्यवः। सुप आत्मनः क्यच्। क्याच्छंदसीत्युप्रत्ययः॥

उषो ये ते प्र यामेषु युंजते मनो दानाय सूरयः। अत्राह तत्कण्व एषां कण्वतमो नाम गृणाति नृणां॥ ४॥

उषः। ये। ते। प्र। यामेषु। युंजते। मनः। दानाय। सूरयः॥ अत्र। अह। तत्। कण्वः। एषां। कण्वऽतमः। नाम। गृणाति। नृणां॥ ४॥

हे उषः ते तव यामेषु गमनेषु सत्सु ये सूरयो विद्वांसो दानाभिज्ञा दानाय धनादिदानार्थं मनः स्वकीयं प्रयुंजते प्रेरयंति। दानशीला उदाराः प्रभवः प्रातःकाले दातु-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मिच्छंतीत्यर्थः । एषां दातुमिच्छतां नृणां तन्नाम दानविषये लोकप्रसिद्धं नाम कण्वतमोऽतिशयेन मेधावी कण्वो महर्षिरत्राह । अत्रैवोषःकाले गृणाति उच्चारयति । यो दातुमिच्छति यश्च नामग्रहणेन दातारं प्रशंसति तावुभावप्युषःकाल एव तथा कुरुत इत्युषसः स्तुतिः ॥ गृणाति गॄ शब्दे । क्रैयादिकः । प्वादीनां ह्रस्व इति ह्रस्वत्वम् । नृणाम् । नामि नृ च । पा० ६. ४. ६. । इति दीर्घप्रतिषेधः । नृ चान्यतरस्यामिति विभक्तेरुदात्तत्वम् ॥

आ घा योषेव सूनर्युषा याति प्रभुंजती । जरयंती वृजनं पद्वदीयत उत्पातयति पक्षिणः ॥ ५ ॥

आ । घ । योषाऽइव । सूनरी । उषाः । याति । प्रऽभुंजती ॥ जरयंती । वृजनं । पत्ऽवत् । ईयते । उत् । पातयति । पक्षिणः ॥ ५ ॥

उषा देवी प्रभुंजती प्रकर्षेण सर्वं पालयंत्यायाति । घा प्रतिदिनमागच्छति खलु । तत्र दृष्टांतः । सूनरी सुष्ठु गृहकृत्यस्य नेत्री योषेव । गृहिणीव । कीदृश्युषाः । वृजनं गमनशीलं जंगमं प्राणिजातं जरयंती जरां प्रापयंती । असकृदुषस्यावृत्तायां वयोहान्या प्राणिनो जीर्णा भवंति । किंच उषःकाले पद्वत् पादयुक्तं प्राणिजातमीयते निद्रां परित्यज्य स्वस्वकृत्यार्थं गच्छति । किंच । इयमुषाः पक्षिण उत्पातयति । पक्षिणो ह्युषःकाले समुत्थाय तत्र तत्र व्रजंति ॥ घा । ऋचि तनुघेत्यादिना संहितायां दीर्घः । सुष्ठु नयतीति सूनरी । नॄ नये । अच इरितीप्रत्ययः । गतिसमासे कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति वचनात् कृदिकारादक्तिन इति ङीष् । परादिश्छंदसि बहुलमित्युत्तरपदांतोदात्तत्वम् । निपातस्य चेति पूर्वपदस्य दीर्घः । प्रभुंजती । भुज पालनाभ्यवहारयोः । लटः शतृ । रुधादित्वाच्छ्नम् । श्नसोरल्लोप इत्यकारलोपः । उगितश्चेति ङीप् । शतुरनुम इति नद्या उदात्तत्वम् । वृजनम् । वृजी वर्जने । वर्ज्यत इति वृजनं प्राणिजातम् । कॄपॄवृजिमंदिनिधाञ्भ्यः क्युः । उ० २-७९. । इति क्युप्रत्ययः । क्ङित्त्वाल्लघूपधगुणाभावः । योरनादेशे प्रत्ययस्वरः । पद्वत् । पद् पादः तदस्यास्तीति पद्वत् । झय इति मतुपो वत्वम् । व्यत्ययेन मतुप उदात्तत्वम् । नच स्वरविधौ व्यंजनमविद्यमानवदिति व्यंजनस्याविद्यमानवत्वे सति ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वमिति वाच्यम् । ह्रस्वादित्येव सिद्धे पुनर्नुड्ग्रहणसामर्थ्यादेषा परिभाषा नाश्रीयत इति वृत्तावुक्तम् । इतरथा हि मरुत्वानित्यत्रापि मतुप उदात्तत्वं स्यात् ॥

वि या सृजति समनं व्यर्थिनः पदं न वेत्योदती । वयो नकिष्टे पप्तिवांस आसते व्युष्टौ वाजिनीवति ॥ ६ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

वि । या । सृजति । समनं । वि । अर्थिनः । पदं । न । वेति । ओदती ॥ वयः । नकिः । ते । पप्तिऽवांसः । आसते । विऽउष्टौ । वाजिनीऽवति ॥ ६ ॥

या देवता समनं समीचीनचेष्टावंतं पुरुषं विसृजति प्रेरयति । गृहारामादिचेष्टाकुशलान् पुरुषानुषःकालः शयनादुत्थाप्य स्वस्वव्यापारे प्रेरयतीति प्रसिद्धम् । किंच । उषा अर्थिनो याचकान्विसृजति । तेऽपि ह्युषःकाले समुत्थाय स्वकीयदातृगृहे गच्छंति । ओदत्युषोदेवता पदं स्थानं न वेति न कामयते । उषःकालं शीघ्रं गच्छतीत्यर्थः । हे वाजिनीवति । उषोदेवते ते व्युष्टौ त्वदीये प्रभातकाले पप्तिवांसः पतनयुक्ता वयः पक्षिणो नकिरासते न तिष्ठंति । किंतु स्वस्वनीडाद्विनिर्गत्य गच्छंतीत्यर्थः ॥ सृजति । सृज विसर्गे । तुदादित्वाच्छः । तस्य ङित्त्वाल्लघूपधगुणाभावः । प्रत्ययस्यापित्त्वादनुदात्तत्वे विकरणस्वरः । यद्वृत्तयोगादनिघातः । ओदती । उंदी क्लेदने । उनत्ति सर्वं नीहारेणेत्योदत्युषाः । शतरि व्यत्ययेन शप् । व्यत्ययेनानुनासिकलोपे लघूपधगुणः । उगितश्चेति ङीप् । आगमानुशासनस्यानित्यत्वान्नुमभावः। शपः पित्त्वादनुदात्तत्वम् । शतुरदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वरेणाद्युदात्तत्वम्। न च शतुरनुम इति नद्या उदात्तत्वम् । अंतोदात्ताच्छतुः परस्यास्तद्विधानात् । नकिष्टे । युष्मत्तत्ततक्षुःष्वंतःपादमिति षत्वम् । पप्तिवांसः । पत्लृ गतौ । लिटः क्वसुः । क्रादिनियमात्प्राप्त इट् वस्वेकाजाद्घसामिति नियमान्न प्राप्नोति । तत्क्रियते सर्वविधीनां छंदसि विकल्पितत्वात् । तनिपत्योश्छंदसीत्युपधालोपः । द्विर्वचनेऽचीति स्थानिवद्भावाद्विर्भावः । प्रत्ययस्वरः । वाजिनीवति । वाजोऽन्नमस्या अस्तीति वाजिनी क्रिया । मत्वर्थीय इनिः । ऋन्नेभ्य इति ङीप् । तादृशी क्रिया यस्याः सा । तदस्यास्तीति मतुप् । संज्ञायामिति मतुपो वत्वम् ॥

एषायुक्त परावतः सूर्यस्योदयनादधि । शतं रथेभिः सुभगोषा इयं वि यात्यभि मानुषान् ॥ ७ ॥

एषा । अयुक्त । परावतः । सूर्यस्य । उत्ऽअयनात् । अधि ॥ शतं । रथेभिः । सुऽभगा । उषाः । इयं । वि । याति । अभि । मानुषान् ॥ ७ ॥

एषोषोदेवी शतमयुक्त स्वकीयानां रथानां शतं योजितवती । सुभगा सौभाग्ययुक्तेयमुषाः परावतो दूरस्थानात् सूर्यस्योदयनादधि सूर्योदयस्थानादधिकाद्युलोकान्मानुषानभि मनुष्यानुद्दिश्य रथेभिः शतसंख्याकैर्युक्तै रथैर्वियाति विशेषेण गच्छति ॥ अयुक्त । लुङि झलो झलीति सिचो लोपः । उदयनात् । उदेत्यत्रेति उदयनम् । इण्

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

गतौ । अधिकरणे ल्युट् । कृदुत्तरपदप्रकृतिस्वरत्वम् । सुभगा । शोभनो भगो यस्याः सा । आद्युदात्तं द्व्यच् छंदसीत्युत्तरपदाद्युदात्तत्वम् । मानुषान् । मनोः पुत्रा मानुषाः । मनोर्जातावञ्यतौ षुक् चेत्यञ् षुगागमश्च । नित्त्वादाद्युदात्तत्वम् ॥

विश्वमस्या नानाम चक्षसे जगज्ज्योतिष्कृणोति सूनरी । अप द्वेषो मघोनी दुहिता दिव उषा उच्छदप स्रिधः ॥ ८ ॥

विश्वं । अस्याः । ननाम । चक्षसे । जगत् । ज्योतिः । कृणोति । सूनरी ॥ अप । द्वेषः । मघोनी । दुहिता । दिवः । उषाः । उच्छत् । अप । स्रिधः ॥ ८ ॥

विश्वं सर्वं जगत् जंगमं प्राणिजातमस्या उषसश्चक्षसे प्रकाशाय ननाम प्रह्वीभवति। रात्रौ तमसि निमग्नाः सर्वे जनास्तन्निवारयित्रीमुषसमुपलभ्य नमस्कुर्वंतीत्यर्थः। कुतः । यस्मादेषा सूनरी सुष्ठु नेत्री अभिमतफलस्य प्रापयित्र्युषा ज्योतिष्कृणोति सर्वं प्रकाशयति । किंच मघोनी मघवती धनवती दिवो दुहिता द्युलोकसकाशादुत्पन्नोषा द्वेषो द्वेष्टॄनपोच्छत् अपवर्जयति । तथा स्रिधः शोषयितॄनपोच्छत् अपवर्जयति । तस्मादिष्टप्राप्त्यनिष्टपरिहारहेतुभूतामुषोदेवतां विश्वं जगन्नमस्करोतीत्यर्थः ॥ अस्याः । इदमोन्वादेशे । पा.२.४.३२ । इत्यशादेशोऽनुदात्तः । विभक्तिश्च सुप्त्वानुदात्तेति सर्वानुदात्तत्वम् । नानाम । संहितायामन्येषामपि दृश्यत इत्यभ्यासस्य दीर्घत्वम् । तुजादित्वे हि तूतुजान इत्यादाविव पदकालेऽपि दीर्घः श्रूयते । ज्योतिः । इणः ष इत्यनुवृत्ताविसुसोः सामर्थ्ये । पा० ८. ३. ४४. । इति विसर्जनीयस्य षत्वम् । द्वेषः द्विष अप्रीतौ । अन्येभ्योऽपि दृश्यंत इति विच् लघूपधगुणः । मघोनी । मघं वनति संभजत इति मघोनी । श्वन्नुक्षन्नित्यादिना मघवन्शब्दः कनिन्प्रत्ययांतो निपातितः । स्त्रियामृन्नेभ्यो ङीबिति ङीप् । भसंज्ञायां श्वयुवमघोनामतद्धित इति संप्रसारणम् । उच्छत् । उच्छी विवासे। विवासो वर्जनम् । छंदसि लुङ्लङ्लिट इति वर्तमाने लङ् । बहुलं छंदस्यमाङ्योगेऽपीत्यडागमाभावः । स्रिधः स्रिधु शोषणे । क्विप् चेति क्विप् ॥

उष आ भाहि भानुना चंद्रेण दुहितर्दिवः । आवहंती भूर्यस्मभ्यं सौभगं व्युच्छंती दिविष्टिषु ॥ ९ ॥

उषः । आ । भाहि । भानुना । चंद्रेण । दुहितः । दिवः ॥ आऽवहंती । भूरि । अस्मभ्यं । सौभगं । विऽउच्छंती । दिविष्टिषु ॥ ९ ॥

हे दिवो दुहितः द्युलोकस्य पुत्रि उषः उषोदेवते चंद्रेण सर्वेषामाह्लादकेन भानुना प्रकाशकेन आ समंताद्भाहि प्रकाशस्व । किं कुर्वती । दिविष्टिषु दिवसेषु

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

भूरि प्रभूतं सौभगं सौभाग्यमस्मभ्यमावहंती संपादयंती । तथा व्युच्छंती तमांसि वर्जयंती ॥ उषः षाष्ठिकमामंत्रिताद्युदात्तत्वम् । दुहितर्दिवः । परमपि छंदसीति दिव इत्यस्य परस्य षष्ठ्यंतस्य पूर्वामंत्रितांगवद्भावे सति षष्ठ्यामंत्रितसमुदायस्याष्टमिकं सर्वानुदात्तत्वम् । अवाहंती । ङीप्शपौ पित्वादनुदात्तौ । शतुश्चादुपदेशाल्लसार्वधातुकस्वरेणानुदात्तत्वम् । अतो धातुस्वरः शिष्यते । समासे कृदुत्तरपदप्रकृतिस्वरत्वम् । भूरि भवति न विनश्यतीति भूरि । अदिशदिभूशुभिभ्यः क्रिन्निति क्रिन् । नित्त्वादाद्युदात्तत्वम् । सुभगस्य भावः सौभगम् । सुभगान्मंत्र इत्युद्गात्रादिषु पाठादञ् प्रत्ययः । हृद्भगसिंध्वंते पूर्वपदस्य च । पा० ७. ३. १९. । इत्युभयपदवृद्धौ प्राप्तायां सर्वे विधयश्छंदसि विकल्प्यंत इति वचनादत्रोत्तरपदवृद्धिर्न भवतीति वृत्तावुक्तम् । व्युच्छंती । उच्छी विवासे । विवासो वर्जनम् । तौदादिकः । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे विकरणस्वरः । दिविष्टिषु । दिव्शब्देन दिविष्ठ आदित्यो लक्ष्यते । तस्येष्टय एषणानि गमनानि येषु दिवसेषु ते दिविष्टयः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ॥

विश्व॑स्य॒ हि प्राण॑नं॒ जीव॑नं॒ त्वे वि यदु॒च्छसि॑ सूनरि ।
सा नो॒ रथे॑न बृह॒ता वि॑भावरि श्रु॒धि चि॑त्रामघे॒ हवं॑ ॥ १० ॥

विश्व॑स्य । हि । प्राण॑नं । जीव॑नं । त्वे इति॑ । वि । यत् । उ॒च्छसि॑ । सू॒नरि॒ ॥ सा । नः॒ । रथे॑न । बृ॒ह॒ता । वि॒भा॒ऽव॒रि॒ । श्रु॒धि । चि॒त्र॒ऽम॒घे॒ । हवं॑ ॥ १० ॥

हे सूनरि । उषो देवि विश्वस्य सर्वस्य प्राणिजातस्य प्राणनं चेष्टनं जीवनं प्राणधारणं च त्वे हि त्वय्येव वर्तते । यद्यस्मात्त्वं व्युच्छसि तमो वर्जयसि । हे विभावरि विशिष्टप्रकाशयुक्ते सा तादृशी त्वं नोऽस्मान्प्रति बृहता प्रौढेन रथेन याहीति शेषः । तथा हे चित्रामघे विचित्रधनयुक्ते उषोदेवि नोऽस्मदीयं हवमाह्वानं श्रुधि शृणु ॥ प्राणनम् । अन चेष्टायाम् । ल्युट् चेति भावे ल्युट् । योरनादेशः । समासेऽनितेः । पा० ८. ४. १९. । इत्युपसर्गस्थाद्रकारान्निमित्तादुत्तरस्य नकारस्य णत्वम् । नन्वनितेरितीटा निर्देशात्कथमन चेष्टायामित्यस्य णत्वम् । तर्हि जीवनस्य पृथगुपादानात्तेनैव धातुना चेष्टा लक्ष्यते । समासे कृदुत्तरपदप्रकृतिस्वरत्वम् । संहितायामेकादेशस्वरेणैकादेशस्योदात्तत्वम् । त्वे । सुपां सुलुगिति सप्तम्याः शे आदेशः । उच्छसि उच्छी विवासे । तौदादिकः । सिपः पित्त्वादनुदात्तत्वे विकरणस्वरः । निपाते यद्यदिहंतेति निघातप्रतिषेधः । सूनरि । सुष्ठु नयतीति सूनरि । नृ नय इत्यस्मादच इरित्यौणादिक इप्रत्ययः । गतिसमासे कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणात् कृदिकरादक्तिन इति ङीष् । निपातस्य चेति पूर्वपदस्य दीर्घत्वम् । परादिश्छंदसि बहुल-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मित्युत्तरपदाद्युदात्तत्वे प्राप्त आमंत्रितस्य चेत्याष्टमिको निघातः । विभावरि । विशिष्टा भा यस्याः सा । छंदसी वनिपौ । पा० ५. २. १०९. २. । इति मत्वर्थीयो वनिप् । वनो रचेति ङीप् तत्संनियोगेन नकारस्य रेफादेशश्च । श्रुधि । श्रुशृणुपॄकृवृभ्यश्छंदसीति हेर्धिरादेशः । बहुलं छंदसीति विकरणस्य लुक् । हेरपित्त्वेन प्रत्ययस्वरेणांतोदात्तत्वम् । पादादित्वान्निघाताभावः । मघमिति धननाम । चित्रं मघं यस्याः सा चित्रमघा । अन्येषामपि दृश्यत इति संहितायां पूर्वपदस्य दीर्घत्वम् । हवम् । ह्वेञ् स्पर्धायां शब्दे च । भावेऽनुपसर्गस्येत्यप् प्रत्ययः । तत्संनियोगेन संप्रसारणं च ॥

उषो वाजं हि वंस्व यश्चित्रो मानुषे जने । तेना वह सुकृतो अध्वराँ उप ये त्वा गृणंति वह्नयः ॥ ११ ॥

उषः । वाजं । हि । वंस्व । यः । चित्रः । मानुषे । जने ॥ तेन । आ । वह । सुऽकृतः । अध्वरान् । उप । ये । त्वा । गृणंति । वह्नयः ॥ ११ ॥

हे उषः । वाजं हविर्लक्षणमन्नं हि श्रुतिषु प्रसिद्धं वंस्व याचस्व । स्वीकुर्वित्यर्थः । यो वाजश्चित्रश्चायनीयो मानुषे मनुष्ये जने जाते यजमाने वर्तते तं वाजमिति पूर्वत्रान्वयः । तेन कारणेन सुकृतः सुष्ठु कृतवतो यजमानानध्वरान् हिंसारहितान्यागानुपावह प्रापय । ये यजमाना वह्नयो यज्ञनिर्वाहकास्त्वा त्वां गृणंति स्तुवंति तान् सुकृत इति पूर्वेण संबंधः । एतदुक्तं भवति । यजमानैः प्रत्तं हविः स्वीकृत्य पुनरपि तेषां यज्ञं संपादयंति ॥ वाजम् । वज व्रज गतौ । कर्मणि घञ् । अजिव्रज्योश्च । पा० ७. ३. ६०. । इत्यत्र चशब्दस्यानुक्तसमुच्चयार्थत्वाद्वाजो वाज्यमित्यत्रापि कुत्वाभाव इति वृत्तावुक्तत्वात्कुत्वाभावः । कर्षात्वत इत्यंतोदात्तत्वे प्राप्ते वृषादित्वादाद्युदात्तत्वं । वंस्व । वनु याचने । अत्र याचनवाचिना धातुना तदुत्तरभावी स्वीकारो लक्ष्यते । बहुलं छंदसीति विकरणस्य लुक् । अनुदात्तत्वाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः । हि चेति निघातप्रतिषेधः । सुकृतः । सुकर्मपापेत्यादिना करोतेर्भूतार्थे क्विप् । तुगागमः । कृदुत्तरपदप्रकृतिस्वरत्वम् । अध्वरान् । ध्वरो हिंसा नास्त्यस्मिन्निति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वम् । अध्वरानित्यस्येप्सिततमत्वात्कर्तुरीप्सिततमम् । पा० १. ४. ४९. । इति कर्मसंज्ञा । सुकृत इत्यस्य त्वकथितं च । पा० १. ४. ५१. । इति नीवह्योर्हरतेश्चेति द्विकर्मकेषु वहतेः परिगणितत्वात् । अध्वरानित्यत्र नकारस्य संहितायां दीर्घादटीति रुत्वम् । आतोऽटि नित्यमिति पूर्वपदस्याकारस्य सानुनासिकता । गृणंति । गॄ शब्दे । क्र्यादिभ्यः श्ना । प्वादीनां ह्रस्व इति ह्रस्वत्वम् । श्नाभ्यस्तयोरात इत्याकारलोपः । प्रत्ययस्वरः । यद्वृत्तयोगादनिघातः ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विश्वान्देवाँ आ वह सोमपीतयेऽन्तरिक्षादुषस्त्वं । सास्मासु धा गोमदश्वावदुक्थ्य१मुषो वाजं सुवीर्यं ॥ १२ ॥

विश्वान् । देवान् । आ । वह । सोमऽपीतये । अंतरिक्षात् । उषः । त्वं ॥ सा । अस्मासु । धाः । गोऽमत् । अश्वऽवत् । उक्थ्यं । उषः । वाजं । सुऽवीर्यं ॥ १२ ॥

हे उषः त्वं सोमपीतये सोमपानार्थमंतरिक्षादंतरिक्षलोकाद्विश्वान्सर्वान्देवानावह अस्मदीयं देवयजनदेशं प्रापय। हे उषः सा तादृशी त्वं गोमत् गोमंतं बहुभिर्गोभिर्युक्तं अश्वावदश्वैरुपेतमुक्थ्यं प्रशस्यं सुवीर्यं शोभनवीर्योपेतं वाजमन्नमस्मासु धाः निधेहि स्थापयेत्यर्थः ॥ धाः । दधातेश्छंदसि लुङ्लङ्लिट इति प्रार्थनायां लुङ् । गातिस्थेति सिचो लुक् । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । गोमत् । अश्वावत् । मंत्रे सोमाश्वेंद्रियेति मतुपि दीर्घत्वम् । उभयत्र सुपां सुलुगिति विभक्तेर्लुक् । उक्थ्यम् । उक्थं स्तोत्रम् तत्र भवमुक्थ्यम् । भवे छंदसीति यत् । सर्वे विधयश्छंदसि विकल्प्यंत इति यतोऽनाव इत्याद्युदात्तत्वाभावे तित्स्वरितमिति स्वरितत्वम् । उषः । आमंत्रिताद्युदात्तत्वम् । पादादित्वान्निघाताभावः । सुवीर्यम् । शोभनं वीर्यं यस्य । वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वम् ॥

यस्या रुशंतो अर्चयः प्रति भद्रा अदृक्षत । सा नो रयिं विश्ववारं सुपेशसमुषा ददातु सुग्म्यं ॥ १३ ॥

यस्याः । रुशंतः । अर्चयः । प्रति । भद्राः । अदृक्षत ॥ सा । नः । रयिं । विश्वऽवारं । सुऽपेशसं । उषाः । ददातु । सुग्म्यं ॥ १३ ॥

यस्या उषसोऽर्चयः प्रकाशा रुशंतः शत्रून्हिंसंतो भद्राः कल्याणाः प्रत्यदृक्षत प्रतिदृश्यंते । सा तथाभूतोषा नोऽस्मभ्यं रयिं ददातु । कीदृशं रयिम् । विश्ववारम् विश्वस्य वारकम् । यद्वा विश्वैर्वरणीयम् । सुपेशसम् । पेश इति रूपनाम । शोभनरूपोपेतम् । सुग्म्यम् सुष्ठु गंतव्यम् । यद्वा सुग्म्यमिति सुखनाम । तद्धेतुत्वात्ताच्छब्यम् ॥ रुशंतः । रुश रिश हिंसायाम् । शतरि तुदादित्वाच्छः । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे सति शिष्टत्वाद्विकरणस्वरे प्राप्ते व्यत्ययेनाद्युदात्तत्वम् । अदृक्षत । दृशेः कर्मणि लुङि झस्यादादेशः । च्लेः सिच् । न दृशः । पा० ३. १. ४७. । इति क्सप्रतिषेधः । एकाच इतीट्प्रतिषेधः लिङ्सिचावात्मनेपदेषु । पा० १. २. ११. । इति सिचः कित्त्वाल्लघूपधगुणाभावः । सृजिदृशोर्झल्यमकिति । पा० ६. १. ५८. । इत्यमागमाभावश्च कित्त्वादेव । षत्वकत्वषत्वानि । अडागम उदात्तः । यद्वृत्तयोगादनिघातः । विश्ववारम् । विश्वं वृणोतीति विश्ववारः । वृञ् वरणे । कर्मण्यण् । यद्वा

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विश्वैर्व्रियत इति विश्ववारः । कर्मणि घञ् । मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वम् । सुगम्यम् । सुष्ठु गंतव्यः सुग्मः । गमेर्घञर्थे कविधानमिति कप्रत्ययः । गमहनेत्यादिनोपधालोपः । तत्र भवं सुग्म्यम् । भवे छंदसीति यत् । यतोऽनाव इत्याद्युदात्तत्वम् ॥

ये चिद्धि त्वामृषयः पूर्वं ऊतये जुहूरेऽवसे महि । सा नः स्तोमाँ अभि गृणीहि राधसोषः शुक्रेण शोचिषा ॥ १४ ॥

ये । चित् । हि । त्वां । ऋषयः । पूर्वे । ऊतये । जुहूरे । अवसे । महि ॥ सा । नः । स्तोमान् । अभि । गृणीहि । राधसा । उषः । शुक्रेण । शोचिषा ॥ १४ ॥

हे महि महिते पूजनीये वोषोदेवते त्वां ये चिद्धि ये खलु प्रसिद्धाः पूर्वे चिरंतना ऋषयो मंत्रद्रष्टार ऊतये रक्षणाय । अव इत्यन्ननाम । अवसेऽन्नाय च जुहूरे जुह्विरे आहूतवंतः । सूक्तरूपैर्मंत्रैः स्तुतवंत इत्यर्थः । हे उषः सा तादृशी त्वं राधसास्माभिर्दत्तेन हविर्लक्षणेन धनेन शुक्रेण शोचिषा दीप्तेन तमो निवारयितुं समर्थेन तेजसा चोपलक्षिता सती तेषामृषीणामिव नोऽस्माकं स्तोमानभि स्तुतीरभिलक्ष्य गृणीहि सम्यक् स्तुतमिति शब्दय । अस्मदीयाभिः स्तुतिभिः संतुष्टा भवेत्यर्थः ॥ ऊतये । अवतेः क्तिनि ज्वरत्वरेत्यादिना वकारस्योपधायाश्चोठ् । ऊतियूतीत्यादिना क्तिन्नुदात्तो निपातितः । जुहूरे । ह्वेञ् स्पर्धायां शब्दे च । लिट्यभ्यस्तस्य चेति द्विर्वचनात्पूर्वमेवाभ्यस्तकारणभूतस्य ह्वयतेः संप्रसारणम् । अभ्यस्तस्य यो ह्वयतिः । कश्चाभ्यस्तस्य ह्वयतिः । यस्तस्य कारणमिति व्याख्यातत्वात् । परपूर्वत्वे हल इति दीर्घत्वम् । द्विर्वचनादीनि । इरयो र इतीरेचोरे आदेशः । चित इत्यंतोदात्तत्वम् । यद्वृत्तयोगादनिघातः । तत्र हि पंचमीनिर्देशेऽपि व्यवहितेऽपि कार्यं भवतीत्युक्तम् । महि । मह पूजायाम् । औणादिक इप्रत्ययः । कृदिकारादक्तिन इति ङीष् । संबुद्धावम्बार्थेति ह्रस्वत्वम् । स्तोमान् । संहितायां नकारस्य रुत्वाद्युक्तम् । नित्त्वादाद्युदात्तत्वम् । गृणीहि । गॄ शब्दे क्रैयादिकः । शिति प्वादीनां ह्रस्व इति ह्रस्वत्वम् । राधसा । राध्नोत्यनेनेति राधः । असुनो नित्त्वादाद्युदात्तत्वम् । उषः । पादादित्वादाष्टमिकनिघाताभावे षाष्ठिकमामंत्रिताद्युदात्तत्वम् ॥

उषो यदद्य भानुना वि द्वारावृणवो दिवः । प्र नो यच्छतादवृकं पृथु च्छर्दिः प्र देवि गोमतीरिषः ॥ १५ ॥

उषः । यत् । अद्य । भानुना । वि । द्वारौ । ऋणवः । दिवः ॥ प्र । नः । यच्छतात् । अवृकं । पृथु । छर्दिः । प्र । देवि । गोऽमतीः । इषः ॥ १५ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

हे उषः । त्वमद्यास्मिन्प्रभातसमये यद्यस्माद्भानुना प्रकाशेन दिवोंऽतरिक्षस्य द्वारौ द्वारभूतौ पूर्वापरदिग्भागावंधकारेणाच्छादितौ व्यृणवः विश्लिष्य प्राप्नोषि । तस्मात्त्वं नोऽस्मभ्यं छर्दिस्तेजस्वि गृहं प्रयच्छतात् देहि । कीदृशं छर्दिः । अवृकं हिंसकरहितम् । पृथु विस्तीर्णम् । अपिच हे देवि देवनशीले गोमतीर्बहुभिर्गोभिर्युक्ता इषोऽन्नानि । प्रेत्युपसर्गस्यावृत्तेर्यच्छतादित्यनुषज्यते । प्रयच्छतात् देहि । त्वदागमनस्यास्मद्रक्षणार्थत्वादस्मदभीष्टं गृहादिकं प्रयच्छेत्यर्थः ॥ छर्दिरिति गृहनाम । छर्दिः छदिरिति तन्नामसु पाठात् । ऋणवः । ऋणु गतौ । छंदसि लङि सिपि तनादित्वादुप्रत्ययः । ततो व्यत्ययेन शपि गुणावादेशौ । शपः पित्त्वादनुदात्तत्व उप्रत्ययस्वरः शिष्यते । यद्वृत्तयोगादनिघातः । दिवः । ऊडिदमित्यादिना विभक्तेरुदात्तत्वम् । प्र नः । उपसर्गाद्बहुलमिति बहुलवचनान्नसो णत्वाभावः । यच्छतात् । दाण् दाने । शपि पाघ्रेत्यादिना यच्छादेशः । अवृकम् । नास्ति वृकोऽस्मिन्निति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वम् । पृथु । प्रथ प्रख्याने । प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्चेति कुप्रत्ययः संप्रसारणं च । छर्दिरिति गृहनाम । उच्छृदिर् दीप्तिदेवनयोः । अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिरितीसिप्रत्ययः । लघूपधगुणः । प्रत्ययस्वरः ॥

सं नो॑ रा॒या बृ॑ह॒ता वि॒श्वपे॑शसा मिमि॒क्ष्वा समिळा॑भि॒रा ।
सं द्यु॒म्नेन॑ विश्व॒तुरो॑षो महि॒ सं वाजै॑र्वाजिनीवति ॥ १६ ॥

सं । नः॒ । रा॒या । बृ॒ह॒ता । वि॒श्वऽपे॑शसा । मि॒मि॒क्ष्व । सं । इळा॑भिः । आ ॥ सं । द्यु॒म्नेन॑ । वि॒श्व॒ऽतु॒रा॑ । उ॒षः॒ । म॒हि॒ । सं । वाजैः॑ । वा॒जि॒नी॒ऽव॒ति॒ ॥ १६ ॥

हे उषः । नोऽस्मान्राया धनेन संमिमिक्ष्व संसिंच । संयोजयेत्यर्थः । कीदृशेन धनेन । बृहता प्रभूतेन । विश्वपेशसा । पेश इति रूपनाम । बहुविधरूपयुक्तेन । तथेळाभिरा । गोभिश्चास्मान्संमिमिक्ष्व । इळेति गोनाम । इळा जगतीति तन्नामसु पाठात् । आकारः समुच्चये पादांते वर्तमानत्वात् । उक्तंच । एतस्मिन्नेवार्थे देवेभ्यश्च पितृभ्य आ इत्याकार इति । किंच हे महि महनीये उषोदेवते द्युम्नेन यशसा संमिमिक्ष्व । द्युम्नं द्योततेर्यशो वान्नं वेति यास्कः । नि० ५. ५. । कीदृशेन द्युम्नेन । विश्वतुरा सर्वेषां शत्रूणां हिंसकेन । तथा हे वाजिनीवति अन्नसाधनभूतक्रियायुक्ते वाजैरन्नैरस्मान्संमिमिक्ष्व । अन्नं वै वाज इति श्रुत्यंतरात् ॥ राया । ऊडिदमित्यादिना विभक्तेरुदात्तत्वम् । बृहता । बृहन्महतोरुपसंख्यानमिति विभक्तेरुदात्तत्वम् । विश्वपेशसा । विश्वानि पेशांसि यस्यासौ विश्वपेशाः । बहुव्रीहौ विश्वं संज्ञायामिति व्यत्ययेनासंज्ञायामपि पूर्वपदांतोदात्तत्वम् । यद्वा मरुद्वृधादिर्द्रष्टव्यः । मि-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मिक्ष्व। मिह सेचने। व्यत्ययेनात्मनेपदम्। लोटि बहुलं छंदसीति शपः श्लुः। द्विर्भावहला-दिशेषौ। ढलकलषत्वानि। प्रत्ययस्वरस्य सति शिष्टत्वात्स एव शिष्यते। पादादित्वादनि-घातः। पूर्वपदस्यासमानवाक्यस्थत्वात्तिङ्ङतिङ इति निघातो न भवति। समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्या इति वचनात्। विश्वतुरा। तूर्वतीति तूः। तुर्वी हिंसार्थः। क्विप् चेति क्विप्। राल्लोप इति वकारलोपः। विश्वेषां तूर्विश्वतूः। समासस्येत्यंतो-दात्तत्वम्। वाजिनीवति। वाजोऽन्नमस्या अस्तीति वाजिनी क्रिया। तादृशी क्रिया यस्याः सा तथोक्ता ॥

मं० १ सू० ४९.

४.

उषो॑ भ॒द्रेभि॒रा ग॑हि दि॒वश्चि॑द्रोच॒नादधि॑ । वह॑न्त्वरु॒णप्स॑व॒ उप॑ त्वा सो॒मिनो॑ गृ॒हम् ॥ १ ॥

उष॑: । भ॒द्रेभि॑: । आ । ग॒हि॒ । दि॒वः । चि॒त् । रो॒च॒नात् । अधि॑ ॥ वह॑न्तु । अ॒रु॒णऽप्स॑वः । उप॑ । त्वा॒ । सो॒मिन॑: । गृ॒हम् ॥ १ ॥

हे उषः। उषोदेवते भद्रेभिर्भंदनीयैः शोभनैर्मार्गैर्दिवोंऽतरिक्षलोकात् रोचनाद्रो-चमानाद्दीप्यमानात्। अधिरुपर्यर्थः उपरिवर्तमानात्। चिदिति पूजार्थः। पूजिता-देवंविधादंतरिक्षलोकादागहि आगच्छ। हे उषः। अरुणप्सवोऽरुणवर्णा गावः सो-मिनः सोमयुक्तस्य यजमानस्य गृहं देवयजनरूपं यज्ञगृहं त्वा त्वामुपवहंतु प्रापयंतु ॥ गहि। गमेर्लोटि बहुलं छंदसीति शपो लुक्। हेरपित्त्वेन ङित्त्वेऽनुदात्तोपदेशेत्यादि-नानुनासिकलोपः। अतो हेरिति लुक् न भवति। असिद्धवदत्रा भादित्यनुनासिकलोपस्या-सिद्धत्वात्। रोचनात्। रुच दीप्तौ। अनुदात्तेतश्च हलादेरिति युच्। योरनादेशे चित इत्यंतोदात्तत्वम्। अरुणप्सवः। प्सा भक्षणे। प्सांति भक्षयंति स्तनं पिबंतीति प्सवो वत्साः। औणादिकः कुप्रत्ययः। आतो लोप इटि चेत्याकारलोपः। अरुणाः प्सवो यासां तास्तथोक्ताः। अत्र वत्सानामारुण्यप्रतिपादनान्मातॄणामपि तथात्वं गम्यते। पैतृकमश्वा अनुहरंते मातृकं गावोऽनुहरंत इति गोनर्दीयः। तासां चोषोवाहनत्वं निघंटावुक्तम्। अरुण्यो गाव उषसामिति। अरुणशब्दोऽर्तेश्चेत्युनन्प्रत्ययांतः। तृ-णाख्यायां चित्। उ० ३–५९.। इत्यतश्चिदित्यनुवृत्तेरंतोदात्तः। स एव बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन शिष्यते ॥

सु॒पेश॑सं सु॒खं रथं॒ यम॒ध्यस्था॑ उष॒स्त्वम् । तेना॑ सु॒श्रव॑सं॒ जनं॒ प्राव॒ाद्य दु॑हितर्दिवः ॥ २ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सुऽपेशसं । सुऽखं । रथं । यं । अधिऽअस्थाः । उषः । त्वं ॥ तेन । सुऽश्रवसं । जनं । प्र । अव । अद्य । दुहितः । दिवः ॥ २ ॥

हे उषः त्वं यं रथमध्यस्थाः अधितिष्ठसि । कीदृशं रथम् । सुपेशसम् शोभनावयवं शोभनरूपयुक्तं वा । पेश इति रूपनामेति यास्कः । यद्वा शोभनहिरण्ययुक्तम् । पेशः कृशनमिति तन्नामसु पाठात् । सुखम् शोभनेन खेनाकाशेन युक्तम् । विस्तृतमित्यर्थः । यद्वा सुखहेतुभूतम् । अथवा सुखमिति क्रियाविशेषणम् । सुखं यथा भवति तथेत्यर्थः । हे दिवो दुहितः द्युलोकसकाशादुत्पन्ने उषोदेवते तेन रथेनाद्यास्मिन्काले सुश्रवसं शोभनहविर्युक्तं जनं यजमानं प्राव प्रकर्षेण गच्छ ॥ सुपेशसम् । पिश अवयवे । अस्मादसुन्प्रत्ययः । नित्त्वादाद्युदात्तः पेशस्शब्दः । शोभनं पेशो यस्यासौ सुपेशाः । आद्युदात्तं द्व्यच् छंदसीत्युत्तरपदाद्युदात्तत्वम् । अध्यस्थाः तिष्ठतेश्छंदसि लुङ्लङ्लिट इति वर्तमाने लुङि गातिस्थेति सिचो लुक् । अडागम उदात्तः । यद्वृत्तयोगादनिघातः तिङि चोदावतीति गतेरनुदात्तत्वम् । तेना । अन्येषामपि दृश्यत इति संहितायां दीर्घः । सुश्रवसं । श्रव इत्यन्ननाम । श्रूयत इति सत इति यास्कः । सुपेशसमितिवदुत्तरपदाद्युदात्तत्वम् । अव । अव रक्षणगतिप्रीतितृप्तीत्युक्तत्वादत्रावतिर्गत्यर्थः । दुहितर्दिवः । परमपि छंदसीति षष्ठ्यंतस्य पूर्वामंत्रितांगवद्भावे सति पदद्वयसमुदायस्याष्टमिकं सर्वानुदात्तत्वम् ॥

वयश्चित्ते पतत्रिणो द्विपच्चतुष्पदर्जुनि । उषः प्रारन्नृतूँरनु दिवो अंतेभ्यस्परि ॥ ३ ॥

वयः । चित् । ते । पतत्रिणः । द्विऽपत् । चतुःऽपत् । अर्जुनि ॥ उषः । प्र । आरन् । ऋतून् । अनु । दिवः । अंतेभ्यः । परि ॥ ३ ॥

हे अर्जुनि शुभ्रवर्णे उषः उषोदेवते ते तव ऋतूंरनु गमनान्यनुलक्ष्य द्विपत् द्विपात् मनुष्यादिकं चतुष्पत् गवादिकं तथा पतत्रिणः पतत्रवंतः पक्षोपेता वयश्चित् पक्षिणश्च दिवोऽतेभ्य आकाशप्रांतेभ्यः पर्युपरि प्रारन् प्रकर्षेण गच्छंति । रात्रावंधकारेणाभिभूताः सर्वे प्राणिनस्त्वदागमनानंतरं चेष्टावंतो भवंतीत्यर्थः ॥ पतत्रिणः । पत्लृ गतौ । पतंत्यनेनेति पतत्रम् । अमिनक्षीत्यादिना त्रन्प्रत्ययः। ततो मत्वर्थीय इनिः। द्विपत् । द्वौ पादौ यस्येति संख्यासुपूर्वस्य । पा० ५. ४. १४०. इति पादशब्दस्यांत्यलोपः समासांतः । अयस्मयादित्वेन भत्वात् पादः पत् । मा० ६. ४. १३०. । इति पद्भावः । द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ । पा० ६. २. १९७. । इत्युत्तरपदांतोदात्तत्वम् । चतुष्पत् । चत्वारः पादा अस्य । स्वरव्यतिरिक्तं पूर्ववत् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । इणः ष इत्यनुवृत्ताविदुदुपधस्य चाप्रत्ययस्य । पा० ८.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

३. ४१.। इति विसर्जनीयस्य षत्वम्। न च परत्वेनास्यासिद्धत्वात् कुप्वोः ≍क≍पौ च। पा० ८. ३. ३७.। इत्युपध्मानीयादेशः शंकनीयः। येन नाप्राप्तिन्यायेन तस्यापवादत्वात्। अपवादस्तु परमपि पूर्वं बाधते एवेति वृत्तावुक्तम्। आरन्। ऋ गतौ। छंदसि लुङ्लङ्लिट इति वर्तमाने लुङि सर्तिशास्त्यर्तिभ्यश्चेति च्लेरङादेशः। ऋदृशोऽङि गुण इति गुणः। आडागमः। ऋतून्। ऋ गतौ। अस्मादौणादिको भावे कुप्रत्ययः। अनु। अनुर्लक्षणे। पा० १. ४. ८४.। इत्यनोः कर्मप्रवचनीयत्वम्। कर्मप्रवचनीययुक्ते। पा० २. ३. ८.। इति द्वितीया। संहितायां दीर्घादटि समानपाद इति नकारस्य रुत्वम्। अत्रानुनासिकः पूर्वस्य तु वेति रोः पूर्वस्य वर्णस्य सानुनासिकत्वम्। दिवः। ऊडिदमिति विभक्तिरुदात्ता। अंतेभ्यः। पंचम्याः परावध्यर्थ इति विसर्जनीयस्य सत्वम्॥

व्युच्छंती हि रश्मिभिर्विश्वमाभासि रोचनं। तां त्वामुषर्वसूयवो गीर्भिः कण्वा अहूषत॥ ४॥

विऽउच्छंती। हि। रश्मिऽभिः। विश्वं। आऽभासि। रोचनं॥
तां। त्वां। उषः। वसुऽयवः। गीःऽभिः। कण्वाः। अहूषत॥ ४॥

हे उषः। व्युच्छंती तमो वर्जयंती त्वं रश्मिभिः स्वकीयैस्तेजोभिर्विश्वं सर्वं भूतजातं रोचनं रोचमानं प्रकाशयुक्तं यथा भवति तथा भासि आ समंतात् प्रकाशयसि। हि यस्मादेवं तस्मात्तां तादृशीं त्वां वसूयवो वसुकामाः कण्वा मेधाविन ऋत्विजः कण्वगोत्रोत्पन्ना वा महर्षयो गीर्भिः स्तुतिलक्षणैर्वचोभिरहूषत। स्तुतवंत इत्यर्थः॥ कण्व इति मेधाविनाम। कण्व ऋभुरिति तन्नामसु पाठात्। आभासि। भा दीप्तौ। अदादित्वाच्छपो लुक्। सिपः पित्त्वादनुदात्तत्वे धातुस्वरः। हि चेति निघातप्रतिषेधः। तिङि चोदात्तवतीति गतेरनुदात्तत्वम्। रोचनम्। रुच दीप्तौ। अनुदात्तेतश्च हलादेरिति युच्। चित इत्यंतोदात्तत्वम्। वसूयवः। वसु धनमात्मन इच्छंतः। सुप आत्मनः क्यच्। अकृत्सार्वधातुकयोरिति दीर्घः। क्याच्छंदसीति उप्रत्ययः। गीर्भिः। सावेकाच इति विभक्तेरुदात्तत्वम्। कण्वाः। कण शब्दार्थः। अशिप्रुषिलटिकणीत्यादिना क्वन् प्रत्ययः। नित्त्वादाद्युदात्तत्वम्। अहूषत। ह्वेञो लुङि ह्वः संप्रसारणमित्यनुवृत्तौ बहुलं छंदसीति संप्रसारणम्। परपूर्वत्वे हल इति दीर्घत्वम्। च्लेः सिच्। एकाच इतीट्प्रतिषेधः। संज्ञापूर्वस्य विधेरनित्यत्वाद्गुणाभावः॥

४

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

(मं० १ सू० ११६)

९.

नासत्याभ्यां बर्हिरिव प्र वृंजे स्तोमाँ इयर्म्यभ्रियेव वातः ।
यावर्भगाय विमदाय जायां सेनाजुवा न्यूहतू रथेन ॥ १ ॥

नासत्याभ्यां । बर्हिःऽइव । प्र । वृंजे । स्तोमान् । इयर्मि । अभ्रियाऽइव । वातः ॥ यौ । अर्भगाय । विऽमदाय । जायां । सेनाऽजुवा । निऽऊहतुः । रथेन ॥ १ ॥

वर्हिरिव यथा कश्चिद्यजमानो यागार्थं वर्हिः प्रवृंजे प्रकर्षेणान्यूनातिरिक्तं यागाय पर्याप्तं दर्भं वृंक्ते छिनत्ति । संपादयतीति यावत् । एवमहं नासत्याभ्यामश्विभ्यां स्तोमान् स्तुतीरियर्मि संपादयामि । एतदेव विशदीक्रियते । अभ्रियेव यथाभ्रियाण्यभ्रेषु मेघेष्ववस्थितान्युदकानि वातो वायुर्वर्षणार्थं वहुशः प्रेरयति । एवमहमश्विभ्यां स्तोत्राणीयर्मि वहुशः प्रेरयामि । कीदृशावश्विनौ । अर्भगाय बालाय स्वयंवरलब्धभार्याय विमदायैतत्संज्ञाय राजर्षये मध्येमार्गं स्वयंवरार्थमागतैस्तामलभमानैरन्यैर्नृपैः सह योद्धुमशक्नुवतेऽपि तस्मै सेनाजुवा शत्रुसेनायाः प्रेरकेण शत्रुभिर्दुःप्रापेण रथेन यावश्विनौ जायां भार्यां परैरनाक्रांतां न्यूहतुः शत्रून्निहत्य तदीयं गृहं प्रापयामासतुः । ताभ्यामित्यर्थः ॥ नासत्याभ्याम् । सत्सु भवौ सत्यौ । न सत्यावसत्यौ । न असत्यौ नासत्यौ । नभ्राण्नपादित्यादिना नञः प्रकृतिभावः । अव्ययपूर्वपदप्रकृतिस्वरत्वम् । वृंजे । वृजी वर्जने । आदादिकः । इदित्त्वान्नुम् । लोपस्त आत्मनेपदेष्विति तलोपः । इयर्मि । ऋ गतौ । जौहोत्यादिकः । अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वम् । अभ्यासस्यासवर्ण इतीयङ् । अभ्रियेव । समुद्राभ्राद्घ इति भवार्थे घः । घस्येयादेशः । शेश्छंदसि वहुलमिति शेर्लोपः । अर्भगाय । अर्तिगृभ्यां भन्नित्यर्तेर्भन् । अर्भ एवार्भकः । संज्ञायां कन् । पा० ५. ३. ८७. । छांदसो गकारः । अपर आह । अर्भमल्पं गायति शब्दयतीत्यर्भगः । कै गै शब्दे । गापोष्टक् । पा० ३. २. ८. । आतो लोप इटि चेत्याकारलोपः । तदेतत्पदकृतः शाकल्यस्याभिमतम् । सेनाजुवा । जु इति सौत्रो धातुर्गत्यर्थः । अस्मादंतर्भावितण्यर्थात् क्विव्वचिप्रच्छीत्यादिना क्विब्दीर्घौ तन्वादित्वादुवङ् । न्यूहतुः । वह प्रापणे । लिट्यतसि यजादित्वात्संप्रसारणम् । यद्वृत्तान्नित्यमिति निघातप्रतिषेधः ॥

वीळुपत्मभिराशुहेमभिर्वा देवानां वा जूतिभिः शाशदाना । तद्रासभो नासत्या सहस्रमाजा यमस्य प्रधने जिगाय २

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वीळुपत्मंऽभिः । आशुहेमंऽभिः । वा । देवानां । वा । जूतिऽभिः । शाशंदाना ॥ तत् । रासंभः । नासत्या । सहस्रं । आजा । यमस्यं । प्रऽधनें । जिगाय ॥ २ ॥

वीळुपत्मभिः । वीळु इति बलनाम । बलवदुत्पतनैः आशुहेमभिः शीघ्रगमनैः । वाशब्दः समुच्चये । हे नासत्यावश्विनौ । एवंभूतैरश्वैश्च देवानामिंद्रादीनां जूतिभिः प्रेरणैश्च शाशदाना शाशद्यमानयोरत्यर्थं प्रेर्यमाणयोर्युवयोर्वाहनभूतो यो रासभः प्रजापतिना दत्तः स यमस्य वैवस्वतस्य प्रीतिकरे प्रधने प्रकीर्णधनोपेते आजा आजौ संग्रामे तच्छत्रूणां सहस्रं जिगाय जितवान् । वैवस्वतो हि बहूनां मरणहेतुना संग्रामेण तुष्टो भवति । यद्वा जेतव्यत्वेन प्रजापतिनाभिहितमृक्सहस्रं शीघ्रगमनयुक्तो रासभो जिगाय जयेनालभत । अन्येभ्यो देवेभ्यः पूर्वमेवाजिं प्राप्य युवां जयं प्रापयामास । तथा चास्मिन्नर्थे प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छदित्यादिकं ब्राह्मणमनुसंधेयम् ॥ वीळुपत्मभिः । वीळु बलवत्पतंतीति वीळुपत्मानः । आशुहेमभिः । आशु शीघ्रं हिन्वंति गच्छंतीत्याशुहेमानस्तैः । हि गतौ वृद्धौ च । अन्येभ्योऽपि दृश्यंत इति मनिन् । कृदुत्तरपदप्रकृतिस्वरत्वम् । जूतिभिः । ऊतियूतिजूतीत्यादिना क्तिन उदात्तत्वम् । शाशदाना । शद्लृ शातने । अत्र गत्यर्थौ धातूनामनेकार्थत्वात् । अस्माद्यङंताल्लटः शानच् । तस्य छंदस्युभयथेत्यार्धधातुकत्वाच्छयनभावः । अतोलोपयलोपौ । अभ्यस्तानामादिरित्याद्युदात्तत्वम् । सुपां सुलुगिति षष्ठ्याः पूर्वसवर्णदीर्घः । आजा तेनैव सूत्रेण डादेशः । जिगाय जि जये । सन्लिटोर्जेरित्यभ्यासादुत्तरस्य कुत्वं गकारः ॥

तुग्रो ह भुज्युमश्विनोदमेघे रयिं न कश्चिन्ममृवाँ अवाहाः । तमूहथुर्नौभिरात्मन्वतीभिरंतरिक्षप्रुद्भिरपोदकाभिः ॥ ३ ॥

तुग्रः । ह । भुज्युं । अश्विना । उदऽमेघे । रयिं । न । कः । चित् । ममृऽवान् । अवं । अहाः ॥ तं । ऊहथुः । नौभिः । आत्मन्ऽवतीभिः । अंतरिक्षप्रुत्ऽभिः । अपऽउदकाभिः ॥ ३ ॥

अत्रेयमाख्यायिका । तुग्रो नामाश्विनोः प्रियः कश्चिद्राजर्षिः । स च द्वीपांतरवर्तिभिः शत्रुभिरत्यंतमुपद्रुतः सन् तेषां जयाय स्वपुत्रं भुज्युं सेनया सह नावा प्राहैषीत् । सा च नौर्मध्येसमुद्रमतिदूरं गता वायुवशेन भिन्नासीत् । तदानीं स भुज्युः शीघ्रमश्विनौ तुष्टाव । तौ च स्तुतौ सेनया सहितमात्मीयासु नौष्वारोप्य पितुस्तुग्रस्य समीपं त्रिभिरहोरात्रैः प्रापयामासतुरिति । अयमर्थ इदमादिकेन तृचेन प्रतिपाद्यते । हशब्दः प्रसिद्धौ । तुग्रः खलु पूर्वं शत्रुभिः पीडितः सन् तज्जयार्थमुदमेघे । उदकैर्मिह्यते सिच्यत इत्युदमेघः समुद्रः । तस्मिन्भुज्युमेतत्संज्ञं प्रियं

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पुत्रमवाहाः नावा गंतुं पर्यत्याक्षीत्। तत्र दृष्टांतः। ममृवान् म्रियमाणः सन्धनलोभी कश्चिन्मनुष्यो रयिं न यथा धनं परित्यजति तद्वत्। हे अश्विनौ तं च भुज्युं मध्येसमुद्रं निमग्नं नौभिः पितृसमीपमूहथुः युवां प्रापितवंतौ। कीदृशीभिः आत्मन्वतीभिः आत्मीयाभिः। युवयोः स्वभूताभिरित्यर्थः। यद्वा धृतिरात्मा। धारणवतीभिरित्यर्थः। अंतरिक्षप्रुद्भिः अतिस्वच्छत्वादंतरिक्षे जलस्योपरिष्टादेव गंत्रीभिः। अपोदकाभिः सुश्लिष्टत्वादपगतोदकाभिः। अप्रविष्टोदकाभिरित्यर्थः॥ उदमेघे। मिह सेचने। कर्मणि घञ्। न्यंक्वादीनां चेति कुत्वम्। उदकस्योदः संज्ञायाम्। थाथादिनोत्तरपदांतोदात्तत्वम्। ममृवान्। मृङ् प्राणत्यागे। लिटः क्वसुः। क्रादिनियमात्प्राप्तस्येटो वस्वेकाजाद्घसामिति नियमादभावः। अहाः। ओहाक् त्यागे। लुङि तिपि च्लेः सिच्। आगमानुशासनस्यानित्यत्वात्सगिटौ न क्रियेते। बहुलं छंदसीतीडभावः। हल्ङ्याब्भ्य इति तिलोपः। रुत्वविसर्गौ। यद्वा मंत्रे घसेति च्लेर्लुक्। च्लेर्लुप्तत्वादिण् न क्रियते। नौभिः। सावेकाच इति विभक्तेरुदात्तत्वम्। आत्मन्वतीभिः। आत्मनो मतुप्। मादुपधाया इति वत्वम्। अनो नुडिति नुट्। नलोपः। ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वम्। अंतरिक्षप्रुद्भिः। प्रुङ् गतौ। क्विप् चेति क्विप्॥

ति॒स्रः क्ष॒प॒स्त्रिरहा॑ति॒व्रज॑द्भि॒र्नास॑त्या भु॒ज्युमू॑हथुः पत॒ङ्गैः।
स॒मु॒द्रस्य॒ धन्व॑न्ना॒र्द्रस्य॑ पा॒रे त्रि॒भी रथैः॑ श॒तप॑द्भिः॒ षळ॑श्वैः॥४॥

ति॒स्रः। क्षपः॑। त्रिः। अहा॑। अ॒ति॒व्रज॑त्ऽभिः। नास॑त्या। भु॒ज्युं। ऊ॒ह॒थुः। प॒त॒ङ्गैः॥ स॒मु॒द्रस्य॑। धन्व॑न्। आ॒र्द्रस्य॑। पा॒रे। त्रि॒ऽभिः। रथैः॑। श॒तप॑त्ऽभिः। षट्ऽअ॑श्वैः॥ ४ ॥

हे नासत्यौ सेनया सहोदके निमग्नं भुज्युं तिस्रः क्षपस्त्रिसंख्याका रात्रीस्त्रिरहा त्रिवारमावृत्तानि त्र्यहानि चातिव्रजद्भिरतिक्रम्य गच्छद्भिरेतावंतं कालमतिव्याप्य वर्तमानैः पतंगैः पतद्भिस्त्रिभिस्त्रिसंख्याकै रथैरूहथुः युवामूढवंतौ। क्वेति चेत् उच्यते। समुद्रस्यांबुराशेर्मध्ये धन्वन् धन्वनि जलवर्जितप्रदेशे। आर्द्रस्योदकेनार्द्रीभूतस्य समुद्रस्य पारे तीरदेशे च। कथंभूतै रथैः। शतपद्भिः शतसंख्याकैश्चक्रलक्षणैः पादैरुपेतैः। षळश्वैः षड्भिरश्वैर्युक्तैः॥ तिस्रः। त्रिचतुरोः स्त्रियामिति त्रिशब्दस्य तिसृ आदेशः। स चांतोदात्तः। अचि र ऋत इति रेफादेश उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वम्। क्षपः। विभक्त्यंतस्य छांदसं ह्रस्वत्वम्। यद्वा शस्यात इति योगविभागादधातोरप्याकारलोपः। अहा। शेश्छंदसि वहुलमिति शेर्लोपः। पतंगैः। पत्लृ गतौ। पतेरंगच्। उ० १. ११८.। धन्वन्। धविर्गत्यर्थः। इदित्त्वान्नुम्। कनिन्युवृषीत्यादिना कनिन्। सुपां सुलुगिति सप्तम्या लुक्। शतपद्भिः। शतं पादा येषाम्। संख्यासुपूर्वस्येति पादशब्दस्यांत्य-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

लोपः समासांतः । अग्रस्रयादित्वेन भत्वात्पादः पदिति पद्भावः । यद्वा पादसमा-नार्थः पच्छब्दः प्रकृत्यंतरं द्रष्टव्यम् ॥

अनारंभणे तदवीरयेथामनास्थाने अग्रभणे समुद्रे । यदश्विना ऊहथुर्भुज्युमस्तं शतारित्रां नावमातस्थिवांसं ॥ ५ ॥

अनारंभणे । तत् । अवीरयेथां । अनास्थाने । अग्रभणे । समुद्रे ॥ यत् । अश्विनौ । ऊहथुः । भुज्युं । अस्तं । शतऽअरित्रां । नावं । आतस्थिऽवांसं ॥ ५ ॥

हे अश्विनौ । अनारंभण आलंवनरहिते समुद्रे तत्कर्मावीरयेथाम् विक्रांतं कृतवंतौ युवाम् । अनारंभणत्वमेव स्पष्टीकरोति । अनास्थाने । आस्थीयतेऽस्मिन्नित्यास्थानो भूप्रदेशः । तद्रहिते स्थातुमशक्ये जल इत्यर्थः । अग्रभणेऽग्रहणे । हस्तेन ग्राह्यं शाखादिकमपि यत्र नास्ति तस्मिन्नित्यर्थः । किं पुनस्तत्कर्म । भुज्युं समुद्रे मग्नं शतारित्रां बह्वरित्राम् । यैः काष्ठैः पार्श्वतो वद्धैर्जलालोडने सति नौः शीघ्रं गच्छति तान्यरित्राणि ईदृशां नावमातस्थिवांसमास्थितवंतमारूढवंतं कृत्वा ॥ अस्तम् । गृहनामैतत् । पितुस्तुग्रस्य गृहं प्रति यदूहथुः । तत्प्रापणमन्यैर्दुःशक्यं युवां समुद्रमध्ये कृतवंताविल्यर्थः ॥ अनारंभणे । आरभ्यत इत्यारंभणम् । कृत्यल्युटो वहुलमिति कर्मणि ल्युट् । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वम् । अवीरयेथाम् । शूर वीर विक्रांतौ । चुरादिरात्मनेपदी । अनास्थानाग्रभणयोः पूर्ववल्ल्युट्स्वरौ । अयं तु विशेषः । हृग्रहोर्भ इति भत्वम् । अस्तम् । अस्यतेऽस्मिन् सर्वमित्यस्तं गृहम् । असिहसीत्यादिना तन्प्रत्ययः । शतारित्राम् । ऋ गतौ । अर्तिलूधूसू इति करण इत्रप्रत्ययः बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ॥

यमश्विना ददथुः श्वेतमश्वमघाश्वाय शश्वदित्स्वस्ति । तद्वां दात्रं महि कीर्तेन्यं भूत्पैद्वो वाजी सदमिद्धव्यो अर्यः॥६॥

यं । अश्विना । ददथुः । श्वेतं । अश्वं । अघऽअश्वाय । शश्वत् । इत् । स्वस्ति ॥ तत् । वां । दात्रं । महि । कीर्तेन्यं । भूत् । पैद्वः । वाजी । सदं । इत् । हव्यः । अर्यः ॥ ६ ॥

अत्रेदमाख्यायते । पेदुर्नाम कश्चित् स चाश्विनौ तुष्टाव । तस्मै प्रीतौ कंचिच्छ्वेतवर्णमश्वं दत्तवंतौ । स चाश्वस्तस्मै प्रौढं जयं चकारेति । एतदत्र प्रतिपाद्यते । हे अश्विनौ युवामघाश्वायाहंतव्याश्वाय पेदुनाम्ने राजर्षये यं श्वेतवर्णमश्वं ददथुः दत्तवंतौ । सोऽश्वस्तस्मै स्वस्ति जयलक्षणं मंगलं शश्वदित् नित्यमेव चकार । वां युवयोस्तद्दात्रं दानं महि महत् अतिगंभीरम् । अतएव कीर्तेन्यं सर्वैः कीर्तनीयं

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रशस्यं भूत् अभूत् । तस्मात्पैद्वः पेदोः संबंधी पतनशीलः शीघ्रगामी वार्यः शत्रूणां प्रेरयिता युद्धेषु प्रेरयितव्यो वा वाजी वेजनवान् सोश्वः सदमित् । सदैव हव्योऽस्माभिरप्याह्वातव्यः ॥ दात्रम् । ददातेर्भाव औणादिकस्त्रप्रत्ययः । महि । मह पूजायाम् । इन् सर्वधातुभ्य इतीन् । कीर्तेन्यम् । कृत संशब्दने । कृत्यार्थे तवैकेन्केन्यत्वन इति केन्यप्रत्ययः । ॠत इद्धातोरितीत्वम् । भूत् । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । पैद्वः । पेदोः संबंधी । तस्येदमित्यण् । छांदसो वर्णलोपः । हव्यः । ह्वयतेरचो यदिति यत् । बहुलं छंदसीति संप्रसारणम् । गुणः । धातोस्तन्निमित्तस्यैवेत्यवादेशः । अर्यः । ऋ गतौ । अर्यादयश्चेत्यौणादिको यत् । व्यत्ययेनांतोदात्तत्वम् ॥

युवं नरा स्तुवते पज्रियाय कक्षीवते अरदतं पुरंधिं । कारोतराच्छफादश्वस्य वृष्णः शतं कुंभाँ असिंचतं सुरायाः ॥७॥

युवं । नरा । स्तुवते । पज्रियाय । कक्षीवते । अरदतं । पुरंऽधिं ॥ कारोतरात् । शफात् । अश्वस्य । वृष्णः । शतं । कुंभान् । असिंचतं । सुरायाः ॥ ७ ॥

अत्रेयमाख्यायिका । कक्षीवानृषिः पुरा तमसा तिरोहितज्ञानः सन् ज्ञानार्थमश्विनौ तुष्टाव । तस्मा अश्विनौ प्रभूतां धियं दत्तवंताविति तदाह । हे नरा नेतारावश्विनौ युवं युवां पज्रियाय । पज्रा इत्यंगिरसामाख्या पज्रा वा अंगिरस इत्याम्नातत्वात् । तेषां कुले जाताय कक्षीवते । कक्ष्या रज्जुरश्वस्य तद्वते तत्संज्ञाय स्तुवते युवयोः स्तुतिं कुर्वते मह्यं पुरंधिं प्रभूतां धियं बुद्धिमरदतम् व्यलिखतम् । यथा सर्वार्थगोचरा भवति तथा कृतवंतावित्यर्थः । अपि च कारोतरात् कारोतरो नाम वैदलश्चर्मवेष्टितो भाजनविशेषो यस्मिन्सुरायाः स्रावणं क्रियते । लुप्तोपममेतत् । कारोतराद्यथा सुरायाः संपादकास्तां स्रावयंति एवमेव युवां वृष्णः सेचनसमर्थस्य युष्मदीयस्याश्वस्य शफात् खुरात् सुरायाः शतं कुंभान् असंख्यातान्सुराघटानसिंचतम् अक्षारयतम् । यद्वा सिंचतिः पूरणार्थः । कारोतरस्थानीयाद्युष्मदीयाश्वखुरात् या सुरा प्रवहति तयासंख्यातान् घटानसिंचतम् अपूरयतम् । ये जनाः सौत्रामण्यादिकर्मणि युष्मद्यागाय सुरां याचंते तेषामित्यर्थः ॥ स्तुवते । स्तौतेर्लटः शतृ । अदादित्वाच्छपो लुक् । शतुरनुम इति विभक्तेरुदात्तत्वम् । पज्रियाय । पज्रशब्दाच्छैषिको घच् । कक्षीवते । आसंदीवदष्ठीवच्चक्रीवत्कक्षीवदिति निपातनात् कक्ष्याशब्दस्य संप्रसारणं वत्वं च । अरदतम् । रद विलेखने । पुरंधिं । पुरंधिर्बहुधीरिति यास्कः । नि० ६. १३. । पृषोदरादित्वात्पुरंधिभावः । यद्वा पुरं पूरयितव्यं सर्वं विषयजातमस्यां धीयतेऽवस्थाप्यत इति पुरंधिर्बुद्धिः । कर्मण्यधिकरणे चेति दधातेः किप्रत्ययः । तत्पुरुषे कृति बहुलमिति बहुलवचनादलुक् । इदं

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तु व्युत्पत्तिमात्रं वस्तुतः पृषोदरादिरेव । असिंचतम् । षिचिर् क्षरणे तौदादिकः । शे मुचादीनामिति नुम् ॥

हि॒मेना॒ग्निं घ्रंसम॑वारयेथां पितु॒मती॒मूर्ज॑मस्मा अधत्तं । ऋ॒बीसे॒ अत्रि॑मश्वि॒नाव॑नीत॒मुन्नि॑न्यथुः सर्व॑गणं स्व॒स्ति ॥ ८ ॥

हि॒मेन॑ । अ॒ग्निं । घ्रंसं । अ॒वा॒र॒ये॒थां । पि॒तु॒ऽमतीं॑ । ऊर्जं॑ । अ॒स्मै॒ । अ॒ध॒त्तं॒ ॥ ऋ॒बीसे॑ । अत्रिं॑ । अ॒श्वि॒ना॒ । अव॑ऽनीतं । उत् । नि॒न्य॒थुः॒ । सर्व॑ऽगणं । स्व॒स्ति ॥ ८ ॥

अत्रेदमाख्यानम् । अत्रिमृषिमसुराः शतद्वारे पीडायंत्रगृहे प्रवेश्य तुषाग्निना-बाधिषत । तदानीं तेन ऋषिणा स्तुतावश्विनावग्निमुदकेनोपशमय्य तस्मात्पीडा-गृहादविकलेंद्रियवर्गं संतं निरगमयतामिति । तदेतत्प्रतिपाद्यते । हे अश्विनौ हि-मेन हिमवच्छीतेनोदकेन घ्रंसं दीप्यमानमत्रेर्बाधनार्थमसुरैः प्रक्षिप्तं तुषाग्निमवार-येथाम् युवां निवारितवंतौ । शीतीकृतवंतावित्यर्थः । अपि च । अस्मा असुरपी-डया कार्श्यं प्राप्तायात्रये पितुमतीम् । पितुरित्यन्ननाम । अन्नयुक्तमूर्जं बलप्रदं रसा-त्मकं क्षीरादिकमधत्तम् पुष्ट्यर्थं प्रायच्छतम् । ऋबीसेऽपगतप्रकाशे पीडायंत्र-गृहेऽवनीतमवाङ्मुखतयासुरैः प्रापितमत्रिं सर्वगणम् । गणः समूहः सर्वेषामिंद्रियाणां पुत्रादीनां वा गणेनोपेतं स्वस्ति अविनाशो यथा भवति तथोन्निन्यथुः तस्माद्गृहा-दुद्गमय्य युवां स्वगृहं प्रापितवंतौ । यद्वा । हिमेन शीतेन वृष्ट्युदकेनाग्निमग्निव-त्तीक्ष्णं घ्रंसम् । अहर्नामैतत् । सामर्थ्यान्निदाघकालीनमहरवारयेथाम् । तस्याह्न-स्तैक्ष्ण्यं निवारितवंतौ । अपि च । अस्मा अग्नये पितुमतीं चरुपुरोडाशादिलक्षणा-न्नोपेतमूर्जं बलकरं रसात्मकमुपस्तरणाभिघारणात्मकं घृतमधत्तम् । वृष्ट्युत्पादने-नाग्नेर्यागार्थं हवींषि निष्पादितवंतौ इत्यर्थः । ऋबीसेऽपगततेजस्के । पृथिवीद्रव्ये-ऽवनीतमोषधीनामुत्पादनायावस्तान्नीतम् । पार्थिवाग्निना परिपक्वा उदकेन क्लिन्ना ह्योषधिवनस्पतयो विरोहंति । अत्रिं हविषामत्तारमोषधिवनस्पत्यादीनां वा । एवंविधमग्निं सर्वगणं व्रीह्याद्योषधिगणोपेतं हे अश्विनौ युवां स्वस्ति अविनाशो यथा भवति तथोन्निन्यथुः व्रीह्याद्योषधिवनस्पतिरूपेण भूमेरुपरिष्टान्नीतवंतौ । कारणा-त्मना पार्थिवाग्नौ वर्तमानं सर्वमोषधिवनस्पत्यादिकमश्विनौ प्रकर्षेण व्यक्तीकृत-वंतावित्यर्थः । अयं पक्षो यास्केन हिमेनोदकेनेत्यादिनोक्तः । नि० ६. ३६. ॥ पितुमतीं । ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वम् । ऋबीसे । अत्र यास्कः । ऋबीसमपगतभासमपचितभासमपहृतभासमनंतर्हितभासं गतभासं वेति । नि० ६. ३५. । पृषोदरादित्वादभिमतरूपस्वरसिद्धिः । अत्रिम् । अद भक्षणे । अदेस्त्रिनिश्चेति चशब्दात्त्रिप् । अवनीतम् । गतिरनंतर इति गतेः प्रकृतिस्वरत्वम् । स्वस्ति । अस भुवि । भावे क्तिन् । छंदस्युभयथेति सार्वधातुकत्वादस्तेर्भूभावाभावः ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

परावतं नासत्यानुदेथामुच्चाबुध्नं चक्रथुर्जिह्मबारं । क्षरन्नापो न पायनाय राये सहस्राय तृष्यते गोतमस्य ॥ ९ ॥

परा । अवतं । नासत्या । अनुदेथां । उच्चाऽबुध्नं । चक्रथुः । जिह्मऽबारं ॥ क्षरन् । आपः । न । पायनाय । राये । सहस्राय । तृष्यते । गोतमस्य ॥ ९ ॥

अत्रेदमाख्यानम् । कदाचिन्मरुभूमौ वर्तमानस्य स्तोतुर्गोतमस्य ऋषेः समीपं देशांतरे वर्तमानं कूपमुत्खायाश्विनौ प्रापयताम् । प्रापय्य च तं कूपं स्नानपानादिसौकर्यायोपरिमूलमधोबिलमवस्थापयतामिति तदेतदाह । हे नासत्या सत्यस्वभावौ सत्यस्य नेतारौ नासिकाप्रभवौ वा एतत्संज्ञावश्विनौ युवामवतम् । कूपनामैतत् । अवस्तात्ततं कूपं परानुदेथाम् गोतमस्य ऋषेः समीपे प्रेरिषाथाम् । तदनंतरं तं कूपमुच्चाबुध्नम् उच्चैरुपरिष्टाद्बुध्नो मूलं यस्य स तथोक्तः । जिह्मबारम् । जिह्ममधस्ताद्वर्तमानम् तथा वक्रं बारं द्वारं यस्य स तथोक्तः । एवंगुणविशिष्टं चक्रथुः युवामकृषाथाम् । तस्मात्कूपात्तृष्यते पिपासतो गोतमस्य पायनाय पानार्थमापो न आपश्च । अयं नशब्दश्चार्थे । क्षरन् प्रवाहरूपेण निरगमन् । कीदृशस्य । राये हवींषि दत्तवतः । सहस्राय सहनशीलाय । यद्वा । सहस्रसंख्याकाय राये धनाय एतत्संख्यधनलाभार्थं चाक्षरन् ॥ अनुदेथाम् । णुद प्रेरणे । तौदादिकः । जिह्मबारम् । द्वारशब्दस्य पृषोदरादित्वाद्बारादेशः । क्षरन् । क्षर संचलने । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । शपः पित्त्वादनुदात्तत्वम् । तिङो लसार्वधातुकस्वरेण धातुस्वरः । पायनाय । हेतुमण्णिच् । शाच्छासाह्वेति यक् । भावे ल्युट् । राये । रा दाने । राति ददातीति राः । रातेर्डैः । उ० २. ६५. । ऊडिदमिति विभक्तेरुदात्तत्वम् । तृष्यते । ञितृषा पिपासायाम् । श्यन् लटः शतृ । श्यनो नित्त्वादाद्युदात्तत्वम् । षष्ठ्यर्थे चतुर्थी वक्तव्येति चतुर्थी ॥

जुजुरुषो नासत्योत वव्रिं प्रामुंचतं द्रापिमिव च्यवानात् । प्रातिरतं जहितस्यायुर्दस्रादित्पतिमकृणुतं कनीनां ॥ १० ॥

जुजुरुषः । नासत्या । उत । वव्रिं । प्र । अमुंचतं । द्रापिंऽइव । च्यवानात् ॥ प्र । अतिरतं । जहितस्य । आयुः । दस्रा । आत् । इत् । पतिं । अकृणुतं । कनीनां ॥ १० ॥

अत्रेदमाख्यानम् । वलीपलितादिभिरुपेतो जीर्णांगः पुत्रादिभिः परित्यक्तश्च्यवनाख्य ऋषिरश्विनौ तुष्टाव । स्तुतावश्विनौ तस्मै ऋषये जरामपगमय्य पुनर्यौवनमकुरुतामिति । तदेतदाह । हे नासत्यावश्विनौ जुजुरुषो जीर्णात् च्यवनात् च्यव-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नाख्यादृषेः सकाशाद्वव्रिं कृत्स्नं शरीरमात्र्याव‌स्थितां जरां प्रामुंचतम् प्रकर्षेणा-मोचयतम् । तत्र दृष्टांतः । द्रापिमिव । द्रापिरिति कवचस्याख्या । यथा कश्चित् कवचं कृत्स्नशरीरव्यापकं धृत्वा पश्चाच्छरीरात्पृथक्करोति तद्वत् । उत अपि च हे दस्रा एतत्संज्ञौ दर्शनीयौ वाश्विनौ जहितस्य पुत्रादिभिः परित्यक्तस्य ऋषेरायुर्जीवनं प्रातिरतम् प्रावर्धयतम् । प्रपूर्वस्तिरतिर्वर्धनार्थः । आदित् अनंतरमेव युवानं संतं कनीनां कन्यानां पतिं भर्तारमकृणुतम् अकुरुतम् ॥ जुजुरुषः । जॄष् वयोहानौ । लिटः क्वसुः । वहुलं छंदसीत्युत्वम् । द्विर्भावः । पंचम्येकवचने वसोः संप्रसारणमिति संप्रसारणम् । शासिवसिघसीनां चेति षत्वम् । वव्रिम् । वृञ् वरणे । आदृगमहन इति किप्रत्ययः । जहितस्य । ओहाक् त्यागे । कर्मणि निष्ठा । तस्य छंदस्युभयथेति सार्वधातुकत्वाद्यक् । तस्य वहुलं छंदसीति श्लुः । जहातेश्च । पा० ६. ४. ११६. । इतीत्वम् । कनीनाम् । रयेर्मतौ वहुलमिति वहुलवचनात्कन्याशब्दस्यात्र संप्रसारणम् ॥

तद्वां नरा शंस्यं राध्यं चाभिष्टिमन्नासत्या वरूथं । यद्विद्वांसा निधिमिवापगूळ्हमुद्दर्शतादूपथुर्वंदनाय ॥ ११ ॥

तत् । वां । नरा । शंस्यं । राध्यं । च । अभिष्टिऽमत् । नासत्या । वरूथं ॥ यत् । विद्वांसा । निधिंऽइव । अपऽगूळ्हं । उत् । दर्शतात् । ऊपथुः । वंदनाय ॥ ११ ॥

अत्रेदमाख्यानम् । वंदनो नाम कश्चिदृषिः । स चासुरैः कूपे निखाय उत्तरीतुमशक्नुवन्नश्विनावस्तौत् । तमश्विनौ कूपादुन्निन्यतुरिति तदाह । नरा आरोग्यस्य नेतारौ हे नासत्यावश्विनौ वां युवयोः संबंध्यभिष्टिमदभ्येषणयुक्तमाभिमुख्येन प्राप्तव्यं तथा वरूथं वरणीयं कामयितव्यं तत्कर्म शंस्यम् अस्माभिः प्रशंसनीयम् । राध्यं आराधनीयं च । किं पुनस्तत्कर्म । विद्वांसा जानंतौ युवां निधिमिव निक्षिप्तं धनमिवापगूळ्हमरण्ये निर्जने देशे कूपमध्येऽसुरैः निगूढं वंदनाय वंदनमृषिं दर्शतादध्वगैः पिपासुभिर्द्रष्टव्यात्कूपादुदूपथुः उदहार्ष्टम् । एवं यदेतत्कूपादुद्धरणं तदित्यर्थः ॥ शंस्यम् । शंसु स्तुतौ । अस्माण्यन्तादचो यदिति यत् । यतोऽनाव इत्याद्युदात्तत्वम् । अभिष्टिमत् । अभिपूर्वादिष गतावित्यस्माद्भावे क्तिन् । मंत्रे वृषेति क्तिन उदात्तत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते । शकंध्वादित्वात्पररूपत्वम् । तादौ चेति तु गतिस्वरस्य सर्वविधीनां छंदसि विकल्पितत्वात् अप्रवृत्तिः । ततो मतुप् । अंतोदात्तादुत्तरस्य तस्य ह्रस्वनुड्भ्यामित्युदात्तत्वम् । वरूथम् । जॄ वृञ्भ्यामूथन् । विद्वांसा । सुपां सुलुगिति विभक्तेराकारः । अपगूळ्हम् । गुहू संवरणे । कर्मणि निष्ठा । यस्य विभाषेतीट्प्रतिषेधः । ढत्वधत्वष्टुत्वढ्लोपदीर्घाः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

गतिरनंतर इति गतेः प्रकृतिस्वरत्वम् । दर्शनात् । भृमृदृशीत्यादिनातच् । ऊपथुः । टुवप् बीजतंतुसंताने । लिव्यथुसि यजादित्वात्संप्रसारणम् । द्विर्वचनादि । वंदनाय । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थी ॥

तद्वां नरा सनये दंसं उग्रमाविष्कृणोमि तन्यतुर्न वृष्टिं । दध्यङ्ह यन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा प्र यदीमुवाच १२

तत् । वां । नरा । सनये । दंसः । उग्रं । आविः । कृणोमि । तन्यतुः । न । वृष्टिं ॥ दध्यङ् । ह । यत् । मधु । आथर्वणः । वां । अश्वस्य । शीर्ष्णा । प्र । यत् । ईं । उवाच ॥ १२ ॥

अत्रेयमाख्यायिका । इंद्रो दधीचे प्रवर्ग्यविद्यां मधुविद्यां चोपदिश्य यदीमामन्यस्मै वक्ष्यसि शिरस्ते छेत्स्यामीत्युवाच । ततोऽश्विनावश्वस्य शिरश्छित्त्वा दधीचेः शिरः प्रच्छिद्यान्यत्र निधाय तत्राश्व्यं शिरः प्रत्यधत्ताम् । तेन च दध्यङ् ऋचः सामानि यजूंषि च प्रवर्ग्यविषयाणि मधुविद्याप्रतिपादकं ब्राह्मणं चाश्विनावध्यापयामास । तदिंद्रो ज्ञात्वा वज्रेण तच्छिरोऽच्छिनत् । अथाश्विनौ तस्य स्वकीयं मानुषं शिरः प्रत्यधत्तामिति शाट्यायनवाजसनेययोः प्रपंचेनोक्तम् । तदेतत्प्रतिपाद्यते । नरा हे नरावश्विनौ वां युवयोः संबंध्युग्रमुद्गूर्णमन्यैर्दुःशकं दंसः । कर्मनामैतत् । युवाभ्यां पुरा कृतं तत्कर्म सनये धनलाभार्थमाविष्कृणोमि प्रकटीकरोमि । तत्र दृष्टांतः । तन्यतुर्न । यथा मेघस्थः शब्दो वृष्टिं मेघांतर्वर्तमानमुदकं प्रवर्षणेन सर्वत्र प्रकटयति तद्वत् । किं तत्कर्म । अथर्वणः पुत्रो दध्यङ् । एतत्संज्ञ ऋषिरश्वस्य शीर्ष्णा युष्मत्सामर्थ्येन प्रतिहितेन शिरसा वां युवाभ्यामीमिमां मधुविद्यां युद्धे यदा खलु प्रोवाच प्रोक्तवान् । तदानीमश्वस्य शिरसः संधानलक्षणं पुनर्मानुषस्य शिरसः प्रतिसंधानलक्षणं च यद्भवदीयं कर्म तदाविष्कृणोमीत्यर्थः ॥ सनये । षणु दाने । खनिकष्यंज्यसिवसिनिसनिध्वनिग्रंथिचरिभ्यश्चेतीप्रत्ययः । तन्यतुः । तनु विस्तारे । ऋतन्यंजीत्यादिनायतुच् । यद्वा स्तन शब्दे । बाहुलकाद्यतुच् । छांदसः सलोपः । वृष्टिम् । वृष्यते सिच्यतेऽनेनेति वृष्टिः । मंत्रे वृषेत्यादिना क्तिन उदात्तत्वम् । अथर्वणः । आपत्यार्थेऽण्यन्निति प्रकृतिभावाट्टिलोपाभावः । शीर्ष्णा । शीर्षन् छंदसि । पा० ६. १. ६०. । इति शिरःशब्दपर्यायः शीर्षन्शब्दोऽन्तोदात्तो निपात्यते अल्लोपे सत्युदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम् ॥

अजोहवीन्नासत्या करा वां महे यामन्पुरुभुजा पुरंधिः । श्रुतं तच्छासुरिव वध्रिमत्या हिरण्यहस्तमश्विनावदत्तं ॥१३॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अजोहवीत् । नासत्या । करा । वां । महे । यामन् । पुरुऽभुजा । पुरंऽधिः ॥ श्रुतं । तत् । शासुःऽइव । वध्रिऽमत्याः । हिरण्यऽहस्तं । अश्विनौ । अदत्तं ॥ १३ ॥

वध्रिमती नाम कस्यचिद्राजर्षेः पुत्री नपुंसकभर्तृका । सा पुत्रलाभार्थमश्विनावाजुहाव । तदाह्वानं श्रुत्वाश्विनावागत्य तस्यै हिरण्यहस्ताख्यं पुत्रं ददतुः । तदेतदाह । पुरुभुजा बहूनां पालकौ प्रभूतहस्तौ वा हे नासत्यावश्विनौ महे महनीये पूजनीये यामन् यामनि । याति गच्छतीति यामन् स्तोत्रम् । तस्मिन्सति कराभिमतफलस्य कर्तारौ वां युवां पुरंधिर्बहुधीर्वध्रिमती । वध्रिः पुत्रोत्पादनाशक्तः पंडकः तद्वती । एतत्संज्ञा राजपुत्र्यजोहवीत् । पुनः पुनः स्तुत्वा पुत्रलाभार्थमाहूतवती । युवां च वध्रिमत्यास्तदाह्वानं श्रुतं शृणुतम् । तत्र दृष्टांतः । शासुरिव । यथा शासुराचार्यस्य वचनं शिष्योऽवहितः सन्नैकाग्र्येण शृणोति तद्वत् । श्रुत्वा च हे अश्विनौ तस्यै हिरण्यहस्तं सुवर्णमयपाणिं हितरमणीयपाणिं वा एतत्संज्ञं पुत्रमदत्तम् प्रायच्छतम् ॥ अजोहवीत् । ह्वयतेर्यङ्लुगंताल्लङ् । यङो वेति तिप ईडागमः । करा । करोतेः पचाद्यच् । सुपां सुलुगिति विभक्तेराकारः । यामन् । आतो मनिन्क्वनिब्वनिपश्चेति मनिन् । सुपां सुलुगिति सप्तम्या लुक् । श्रुतम् । लङि बहुलं छंदसीति विकरणस्य लुक् । बहुलं छंदस्यमाङ्योगेपीत्यडभावः । शासुः शास्तुः । शासु अनुशिष्टौ । शंसिशसिशासीत्यादिना संज्ञायां तृन् । इडभावः । छांदसस्तलोपः ॥

आस्नो वृकस्य वर्तिकामभीके युवं नरा नासत्यामुमुक्तं । उतो कविं पुरुभुजा युवं ह कृपमाणमकृणुतं विचक्षे ॥१४॥

आस्नः । वृकस्य । वर्तिकां । अभीके । युवं । नरा । नासत्या । अमुमुक्तं ॥ उतो इति । कविं । पुरुऽभुजा । युवं । ह । कृपमाणं । अकृणुतं । विऽचक्षे ॥ १४ ॥

वर्तिका चटकसदृशस्य पक्षिणः स्त्री । तामरण्ये वर्तमानेन शुना ग्रस्तां पुरा किलाश्विनावमोचयताम् तदेतदाह । हे नरा नेतारौ नासत्यावश्विनौ युवं युवामभीकेऽभिगते वृकवर्तिकयोः संग्रामे वृकस्य विकर्तकस्य शुन आस्नः आस्याद्वर्तिकां चटकसदृशीममुमुक्तम् अमोचयतम् । यास्कस्त्वाह । नि० ५. २१. । पुनः पुनर्वर्तते प्रतिदिवसमवर्तत इति वर्तिकोषाः । तां वृकेनावरकेन सर्वजगत्प्रकाशेनाच्छादयित्रा सूर्येण ग्रस्ताम् । उतो अपिच कविमृषिं हे पुरुभुजा बहुपालकौ युवंह युवामेव कृपमाणं संतं विचक्षे विविधं द्रष्टुमकृणुतमकुरुतम् ॥ आस्नः । पद्दन्नित्यादिनास्यस्यासन्नादेशः । अल्लोपोऽन इत्यकारलोप उदात्तनिवृत्तिस्वरेणोङिदमिति विभक्ते-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

रुदात्तत्वम् । असुमुक्तम् । मुचेरंतर्भावितण्यर्थाल्लुङि बहुलं छंदसीति विकरणस्य श्लुः । कृपमाणं । कृपिः स्तुतिकर्मा तुदादिषु द्रष्टव्यः । विकरणस्वरे प्राप्ते वृषादीनां चेत्याद्युदात्तत्वम् । विचक्षे । तुमर्थे सेसेनिति सेन्प्रत्ययः । स्कोः संयोगाद्योरिति सलोपः ॥

चरित्रं हिवेरिवाच्छेदि पर्णमाजा खेलस्य परितक्म्यायां । सद्यो जंघामायसीं विश्पलायै धने हिते सर्तवे प्रत्यधत्तं ॥१५॥

चरित्रं । हि । वेःऽइव । अच्छेदि । पर्णं । आजा । खेलस्य । परिऽतक्म्यायां ॥ सद्यः । जंघां । आयसीं । विश्पलायै । धने । हिते । सर्तवे । प्रति । अधत्तं ॥ १५ ॥

अगस्त्यपुरोहितः खेलो नाम राजा । तस्य संबंधिनी विश्पला नाम स्त्री संग्रामे शत्रुभिश्छिन्नपादासीत् । पुरोहितेनागस्त्येन स्तुतावश्विनौ रात्रावागत्यायोमयं पादं समधत्ताम् । तदेतदाह । आजा आजौ संग्रामेऽगस्त्यपुरोहितस्य खेलस्य संबंधिन्या विश्पलाख्यायाश्चरित्रं चरणं वेरिव वेः पक्षिणः पर्णं पतत्रमिवाच्छेदि हि पुरा छिन्नमभूत्खलु । हे अश्विनौ युवामगस्त्येन स्तुतौ संतौ परितक्म्यायाम् । परितक्म्या रात्रिः परित एनां तकतीति यास्कः । नि० ११. २५. एनामुभयतः सूर्यो गच्छतीति तस्यार्थः । रात्रावागत्य सद्यस्तदानीमेव हिते शत्रुषु निहिते धने जेतव्ये विषयभूते सति सर्तवे सर्तुं गंतुं विश्पलाया आयसीमयोमयीं जंघां जंघोपलक्षितं पादं प्रत्यधत्तम् । संधानमेकीकरणं कृतवंतावित्यर्थः ॥ चरित्रम् । अर्तिलूधूसूखनसहचरइत्र इति करण इत्रः । आजा । सुपां सुलुगिति विभक्तेर्डादेशः । आयसीम् । अयःशब्दाद्विकारार्थे प्राणिरजतादिभ्योऽञ् । पा० ४. ३. १५४. । टिड्ढाणञिति ङीप् ॥

शतं मेषान्वृक्यें चक्षदानमृज्राश्वं तं पितांधं चकार । तस्मा अक्षी नासत्या विचक्ष आधत्तं दस्रा भिषजावनर्वन् १६

शतं । मेषान् । वृक्यें । चक्षदानं । ऋज्रऽअश्वं । तं । पिता । अंधं । चकार ॥ तस्मै । अक्षी इति । नासत्या । विऽचक्षे । आ । अधत्तं । दस्रा । भिषजौ । अनर्वन् ॥ १६ ॥

वृषागिरः पुत्र ऋज्राश्वो नाम राजर्षिः । तस्य समीपेऽश्विनोर्वाहनभूतो रासभो वृकीभूत्वावतस्थे । स च तस्या आहारार्थमेकोत्तरशतसंख्याकान् पौरजनानां स्वभूतान्मेषान् शकलीकृत्य प्रददौ । ऋज्राश्वः शतमेकं च मेषानिति मंत्रांतरे दर्शनात् । एवं पौराणामहिते प्रवृत्तं पिता शापेन नेत्रहीनमकरोत् । तेन स्तूयमानावश्विनामस्मद्वाहननिमित्तमस्यांधता जातेति जानंतौ तस्मा अक्षिणी प्रायच्छतामिति तदे-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तदाह । अत्र तच्छब्दश्रुतेर्यच्छब्दाध्याहारः । य ऋज्राश्वः शतं शतसंख्याकान्मेषान्वृक्य आत्मना पोषितायै वृकस्त्रियै शकलीकृत्य प्रादात् । तं चक्षदानम् । क्षदतिरत्तिकर्मात्र शकलीकरणार्थः । शकलीकृत्य दत्तवंतं ऋज्राश्वं पिता शापेनांधं दृष्टिहीनं चकार कृतवान् । हे नासत्या सत्यस्वभावौ सत्यस्य नेतारौ वा भिषजौ देवानां वैद्यभूतौ । अश्विनौ वै देवानां भिषजाविति श्रुतेः । दस्रा दर्शनीयावेतत्संज्ञौ वा हे अश्विनौ । अनर्वन् अनर्वणी द्रष्टव्यं प्रति पितृशापाद्गमनरहिते अक्षी चक्षुषी विचक्षे विविधं द्रष्टुं समर्थे तस्मै ऋज्राश्वायाधत्तं व्यधत्तम् अकुरुतम् । वृक्ये । वृकोऽरण्यश्वा । तस्य स्त्री वृकी । जातेरस्त्रीविषयादिति ङीष् । जसादिषु छंदसि वा वचनमिति चतुर्थ्येकवचनस्याडभावे यणादेश उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वम् । चक्षदानम् । क्षदेर्लिटः कानच् । चित्स्वरः । अक्षी । इच द्विवचन इति परत्वादक्षशब्दस्येकारांतादेशः स चोदात्तः । तस्मिन्कृते सकृद्गतौ विप्रतिषेध इति परिभाषया पुनर्नुम् न भवति । विचक्षे । चक्षेः संपदादिलक्षणो भावे क्विप् । अनर्वन् । ऋ गतौ । अस्मादन्येभ्योऽपि दृश्यंत इति दृशिग्रहणस्य विध्यंतरोपसंग्रहार्थत्वाद्भावे वनिप् । अर्व गमनं विषयं प्रत्यनयोर्नास्तीति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वम् । सुपां सुलुगिति द्विवचनस्य लुक् । छांदसो नलोपाभावः ॥

आ वां रथं दुहिता सूर्यस्य कार्ष्मेवातिष्ठदर्वता जयंती ।
विश्वे देवा अन्वमन्यंत हृद्भिः समु श्रिया नासत्या सचेथे १७

आ । वां । रथं । दुहिता । सूर्यस्य । कार्ष्मऽइव । अतिष्ठत् । अर्वता । जयंती ॥ विश्वे । देवाः । अनु । अमन्यंत । हृत्ऽभिः । सं । ऊं इति । श्रिया । नासत्या । सचेथे इति ॥ १७ ॥

सविता स्वदुहितरं सूर्याख्यां सोमाय राज्ञे प्रदातुमैच्छत् । तां सूर्यां सर्वे देवा वरयामासुः । तेऽन्योन्यमूचुः । आदित्यमवधिं कृत्वाजिं धावाम योऽस्माकं मध्य उज्जेष्यति तस्येयं भविष्यतीति । तत्राश्विनावुदजयताम् । साच सूर्या जितवतोस्तयो रथमारुरोह । अत्र प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छदित्यादिकं ब्राह्मणमनुसंधेयम् । इदं चाख्यानं सूर्याविवाहस्य स्तावकेन सत्येनोत्तभिता भूमिरिति सूक्तेन विस्पष्टयिष्यते । हे अश्विनौ वां युवयो रथं कार्ष्मेव । कार्ष्मशब्दः काष्ठवाची । यथा काष्ठमाजिधावनस्यावधितया निर्दिष्टं लक्ष्यमाशुगामी कश्चित्सर्वेभ्यो धावद्भ्यः पूर्वं प्राप्नोति । एवमेव सर्वेभ्यो देवेभ्यः पूर्वमर्वता शीघ्रमवधिं प्राप्नुवता युष्मदीयेनाश्वेन करणभूतेन युवाभ्यां जयंती जीयमाना सूर्यस्य सवितुर्दुहितातिष्ठत् आरूढवती । विश्वे सर्व इतरे देवा एतदारोहणस्थानं हृद्भिर्हृदयै-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

रन्वमन्यंत अन्वजानन् तदानीं हे नासत्यावश्विनौ श्रिया ऋक्सहस्रलाभरूपया संपदा कांत्या वा युवां संसचेथे संगच्छेथे ॥ जयंती व्यत्ययेन कर्मणि शतृप्रत्ययः । हृद्भिः । पद्दन्नित्यादिना हृदयशब्दस्य हृद्भावः । सचेथे । षच समवाये । स्वरितेत्त्वादात्मनेपदम् ॥

यदयातं दिवोदासाय वर्तिर्भरद्वाजायाश्विना हयंता । रेवदुवाह सचनो रथो वां वृषभश्च शिंशुमारश्च युक्ता ॥१८॥

यत् । अयातं । दिवःऽदासाय । वर्तिः । भरत्ऽवाजाय । अश्विना । हयंता ॥ रेवत् । उवाह । सचनः । रथः । वां । वृषभः । च । शिंशुमारः । च । युक्ता ॥ १८ ॥

हे अश्विनौ हयंता स्तुतिभिराहूयमानौ युवां भरद्वाजाय संभ्रियमाणहविर्लक्षणान्नाय यजमानाय दिवोदासायैतत्संज्ञाय राजर्षयेऽभीष्टं फलं दातुं वर्तिस्तदीयं गृहं यद्यदायातम् अगच्छतम् । तदानीं रेवद्धनयुक्तमन्नं वां युवयोः सचनः सेवनो रथ उवाह तस्मै दिवोदासाय प्रापयामास । अपि च तस्मिन्रथे वृषभोऽनड्वान् शिंशुमारो ग्राहश्च परस्परविरुद्धावपि स्वसामर्थ्यप्रकटनाय युक्ता वाहनतया संयुक्तावास्ताम् ॥ दिवोदासाय । दिवश्च दासे षष्ठ्या अलुग्वक्तव्य इत्यलुक् । दिवोदासादीनां छंदस्युपसंख्यानमिति पूर्वपदाद्युदात्तत्वम् । भरद्वाजाय । भृञ् भरणे । अस्माद्व्यत्ययेन कर्मणि शतृप्रत्ययः । शतुश्छंदस्युभयथेत्यार्द्धधातुकत्वेन लसार्वधातुकानुदात्तत्वाभावात् प्रत्ययाद्युदात्तत्वम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । हयंता । ह्वेञः कर्मणि लटो व्यत्ययेन शतृ । बहुलं छंदसीति संप्रसारणम् । शपि गुणे छांदसोऽयादेशः । रेवत् । रयिशब्दान्मतुप् । रयेर्मतौ बहुलमिति संप्रसारणम् । छंदसीर इति मतुपो वत्वम् । रयिशब्दाच्चेति मतुप उदात्तत्वम् । सचनः । षच सेवने अनुदात्तेतश्च हलादेरिति युच् । युक्ता । सुपां सुलुगिति विभक्तेराकारः ॥

रयिं सुक्षत्रं स्वपत्यमायुः सुवीर्यं नासत्या वहंता । आ जह्नावीं समनसोप वाजैस्त्रिरह्नो भागं दधतीमयातं ॥ १९ ॥

रयिं । सुऽक्षत्रं । सुऽअपत्यं । आयुः । सुऽवीर्यं । नासत्या । वहंता ॥ आ । जह्नावीं । सऽमनसा । उप । वाजैः । त्रिः । अह्नः । भागं । दधतीं । अयातं ॥ १९ ॥

हे नासत्यावश्विनौ सुक्षत्रं शोभनबलं रयिं धनं स्वपत्यं शोभनैः पुत्रादिभिरुपेतम् । सुवीर्यं शोभनवीर्योपेतमायुः । अन्ननामैतत् । एवंगुणविशिष्टमन्नं च वहंता

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

धारयंतौ युवां समनसा समानमनस्कौ संतौ जह्नावीं जह्नोर्महर्षेः संबंधिनीं प्रजामायातम् आभिमुख्येनागच्छतम् ॥ कीदृशीम् । वाजैर्हविर्लक्षणैरन्नैरुपेताम् । अह्नः । अत्राहःशब्देन तत्रानुष्ठेयः सोमयागो लक्ष्यते । तस्य प्रातःसवनादिरूपेण त्रिधा विभक्तं भागमंशं दधतीं बिभ्रतीम् । अनुसवनं हविर्भिर्यजमानामित्यर्थः ॥ सुक्षत्रम् । बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वम् । सुवीर्यम् । वीरवीर्यौ चेति बहुव्रीहावुत्तरपदाद्युदात्तत्वम् । जह्नावीम् । जह्नुशब्दात्तस्येदमित्यर्थेऽण् टिड्ढाणञिति ङीप् । जाह्नवी ह्रस्वदीर्घयोर्विनिमयः पृषोदरादित्वात् । उक्तं च । वर्णागमो वर्णविपर्ययश्चेति । अत एव मध्योदात्तत्वम् ॥

परिविष्टं जाहुषं विश्वतः सीं सुगेभिर्नक्तमूहथू रजोभिः । विभिंदुना नासत्या रथेन वि पर्वताँ अजरयू अयातं ॥ २० ॥

परिऽविष्टं । जाहुषं । विश्वतः । सीं । सुऽगेभिः । नक्तं । ऊहथुः । रजःऽभिः ॥ विऽभिंदुना । नासत्या । रथेन । वि । पर्वतान् । अजरयू इति । अयातं ॥ २० ॥

जाहुषो नाम कश्चिद्राजा । विश्वतः सर्वतः परिविष्टं शत्रुभिः परिवृतं तं राजानं हे नासत्यावश्विनावजरयू जरारहितौ नित्यतरुणौ युवां विभिंदुना विशेषेण सर्वस्य भेदकेनात्मीयेन रथेन नक्तं रात्रौ सुगेभिः सुष्ठु गंतुं शक्यै रजोभी रंजकैर्मार्गैरूहथुः । तस्माच्छत्रुसमूहान्निरगमयतम् । सीमित्येतत्पदं पादपूरणम् । निर्गतेन तेन सह पर्वतान् शत्रुभिरारोढुमशक्यान् शिलोच्चयान्व्ययातम् विशेषेणागच्छतम् ॥ परिविष्टम् । विश प्रवेशने । कर्मणि निष्ठा । गतिरनंतर इति गतेः प्रकृतिस्वरत्वम् । सुगेभिः । सुदुरोरधिकरण इति गमेर्डः । विभिंदुना । भिदिर् विदारणे । औणादिक उप्रत्ययो नुमागमश्च । अजरयू । न जरा अजरा । तामात्मन इच्छतीति सुप आत्मनः क्यच् । न छंदस्यपुत्रस्येतीत्वदीर्घयोर्निषेधः । क्याच्छंदसीत्युप्रत्ययः ॥

एकस्या वस्तोरावतं रणाय वशमश्विना सनये सहस्रा । निरहतं दुच्छुना इंद्रवंता पृथुश्रवसो वृषणावरातीः ॥ २१ ॥

एकस्याः । वस्तोः । आवतं । रणाय । वशं । अश्विना । सनये । सहस्रा ॥ निः । अहतं । दुच्छुनाः । इंद्रऽवंता । पृथुऽश्रवसः । वृषणौ । अरातीः ॥ २१ ॥

हे अश्विनौ वशमेतत्संज्ञमृषिमेकस्या वस्तोरेकस्याह्नो रणाय रमणीयाय सहस्रा सहस्रसंख्याकाय सनये धनलाभायावतम् अरक्षतम् । स ऋषिः प्रत्यहं यथा सह-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स्वसंख्यं धनं लभते तथा रक्षितवंतौ इत्यर्थः। अपि च हे वृषणौ कामानां वर्षितारावश्विनौ। इंद्रवंता इंद्रेण संयुक्तौ युवां दुच्छुना दुष्टसुखान् दुःखस्य कर्तॄन् पृथुश्रवसो विस्तीर्णयशसोऽरातीः शत्रून्निरहतम् निःशेषेणावधिष्टम्। यद्वा कानीनस्य पृथुश्रवःसंज्ञस्य राज्ञः शत्रूनिति योज्यम्॥ सहस्रा। सुपां सुलुगिति चतुर्थ्या डादेशः। अहतम्। लङि थसस्तन्। अनुदात्तोपदेशेत्यादिनानुनासिकलोपः। दुच्छुनाः। शुनमिति सुखनाम। दुष्टं सुखं यासां तास्तथोक्ताः। परादिश्छंदसि वहुलमित्युत्तरपदाद्युदात्तत्वम्॥

शरस्य चिदार्चत्कस्यावतादा नीचादुच्चा चक्रथुः पातवे वाः। शयवे चिन्नासत्या शचीभिर्जसुरये स्तर्यं पिप्यथुर्गाम् २२

शरस्य। चित्। आर्चत्ऽकस्य। अवतात्। आ। नीचात्। उच्चा। चक्रथुः। पातवे। वारिति वाः॥ शयवे। चित्। नासत्या। शचीभिः। जसुरये। स्तर्यं। पिप्यथुः। गां॥ २२॥

आर्चत्कस्य ऋचत्कपुत्रस्य शरस्यैतत्संज्ञस्यापि स्तोतुः पिपासितस्य पातवे पानार्थं नीचान्नीचीनादवतात्कूपादुच्चा उच्चैरुपरिष्टाद्वारुदकं हे अश्विनौ युवामाचक्रथुः आभिमुख्येन कृतवंतौ। तथा हे नासत्यावश्विनौ शचीभिर्युष्मदीयैः कर्मभिः परिचरणैर्जसुरये श्रांताय शयवे चित् शयुनाम्ने ऋषये स्तर्यं निवृत्तप्रसवां गामग्निहोत्रार्थस्य पयसो दोग्ध्रीं पिप्यथुः। पयसा युवामापूरितवंतौ। पातवे। पा पाने। तुमर्थे सेसेनिति तवेन्प्रत्ययः। जसुरये। जसु हिंसायाम्। जसिसहोरुरिन्। उ० २-७२.। स्तर्यम्। स्तीर्यत आच्छाद्यते प्रसवसामर्थ्याभावेनेति स्तरीः। अवितॄस्तृतंत्रिभ्य ईरितीकारप्रत्ययः। वा छंदसीत्यमि पूर्वत्वस्य विकल्पितत्वादभावे यणादेशः। उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वम्। पिप्यथुः। प्यायी वृद्धौ। लिटि व्यत्ययेन परस्मैपदम्। लिड्यङोश्च। पा० ६. १. २९.। इति पीभावः॥

अवस्यते स्तुवते कृष्णियाय ऋजूयते नासत्या शचीभिः। पशुं न नष्टमिव दर्शनाय विष्णाप्वं ददथुर्विश्वकाय॥ २३॥

अवस्यते। स्तुवते। कृष्णियाय। ऋजुऽयते। नासत्या। शचीभिः॥ पशुं। न। नष्टंऽइव। दर्शनाय। विष्णाप्वं। ददथुः। विश्वकाय॥ २३॥

अवस्यतेऽवनं रक्षणमात्मन इच्छते स्तुवते स्तुतिं कुर्वते कृष्णियाय। कृष्णो

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नाम कश्चित् तस्य पुत्राय ऋजूयत आर्जवमिच्छते विश्वकायैतत्संज्ञाय ऋषये हे नासत्यौ युवां शचीभिरात्मीयैः कर्मभिर्विष्णाप्वं नाम विनष्टं पुत्रं दर्शनाय दर्शनार्थं ददथुः दत्तवंतौ । तत्र दृष्टांतः । पशुं न नष्टमिव । एक उपमार्थीयः पूरकः । यथा कश्चिद्विनष्टं पशुं स्वामिनो दृष्टिपथं प्रापयति तद्वत् ॥ अवस्यते । अवस्शब्दात्सुप आत्मनः क्यच् । शतुरनुम इति विभक्तेरुदात्तत्वम् । कृष्णियाय । कृष्णशब्दादप- त्यार्थे छांदसो घच् ॥

दश रात्रीरशिवेना नव द्यूनवनद्धं श्नथितमप्स्वन्तः ।
विप्रुतं रेभमुदनि प्रवृक्तमुन्निन्यथुः सोममिव स्रुवेण ॥ २४ ॥

दश । रात्रीः । अशिवेन । नव । द्यून् । अवऽनद्धं । श्नथितं । अप्ऽसु । अंतरिति ॥ विऽप्रुतं । रेभं । उदनि । प्रऽवृक्तं । उत् । निन्यथुः । सोमंऽइव । स्रुवेण ॥ २४ ॥

पुरा खलु रेभमृषिं पाशैर्बद्ध्वासुराः कूपे कस्यचिद्दिवसस्य सायंकाले प्रचिक्षिपुः । स चाश्विनौ स्तुवन् दश रात्रीर्नवाहानि च कूपमध्ये तथैवावतस्थे । दशमेऽहनि प्रातरश्विनौ तं कूपादुदतारयतामिति तदाह । अप्सु कूपांतर्वर्तमानास्वंतर्मध्येऽसुरैः पातितमशिवेन दुःखहेतुना दाम्नावनद्धं बद्धं श्नथितं शत्रुभिर्हिंसितं दश रात्रीर्दश- संख्याका निशाः नव द्यून् नवसंख्याकान्यहानि च । अत्यंतसंयोगे द्वितीया । एतावंतं कालं तत्रैव कूपेऽवस्थितम् । अत एवोदन्युदके विप्रुतं विप्लुतं व्याक्षिप्त- सर्वांगम् । प्रवृक्तम् । लुप्तोपममेतत् । प्रवृंजनेन संतप्तं घर्ममिव व्यथया संतप्यमा- नम् । एवंभूतं रेभं हे अश्विनौ युवामुन्निन्यथुः तस्मात्कूपादुन्नीतमुत्तीर्णं कृतवंतौ । तत्र दृष्टांतः । सोममिव । यथाग्निहोत्रहोमार्थमभिषुतं सोमरसं कूपसदृशेऽग्नि- होत्रस्थालीमध्ये वर्तमानं स्रुवेणाध्वर्युरुन्नयत्यूर्ध्वं नयति तद्वत् । अवनद्धम् । णह बंधने कर्मणि निष्ठा । नहो धः । पा० ८. २. ३४. । झषस्तथोर्धोऽध इति निष्ठा- तकारस्य धत्वम् । गतिरनंतर इति गतेः प्रकृतिस्वरत्वम् । श्नथितम् । श्नथ हिंसार्थः । निष्ठा । विप्रुतम् । प्रुङ् गतौ । अवनद्धवत्प्रत्ययस्वरौ । कपिलकादित्वाल्लत्वविकल्पः । उदनि । पद्दन्नित्यादिनोदकशब्दस्योदन्भावः ॥

प्र वां दंसांस्यश्विनाववोचमस्य पतिः स्यां सुगवः सुवीरः ।
उत पश्यन्नश्नुवन्दीर्घमायुरस्तमिवेज्जरिमाणं जगम्यां ॥ २५ ॥

प्र । वां । दंसांसि । अश्विनौ । अवोचं । अस्य । पतिः । स्यां । सुऽगवः । सुऽवीरः ॥ उत । पश्यन् । अश्नुवन् । दीर्घं । आयुः । अस्तंऽइव । इत् । जरिमाणं । जगम्यां ॥ २५ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

एवमनेन सूक्तेनाश्विनोर्महिमानं प्रशस्याधुना मंत्रद्रष्टा स्वाभीष्टं प्रार्थयते । हे अश्विनौ वां युवयोर्दंसांसि पुरु कृतानि कर्माणि प्रावोचं इत्थमुक्तवानस्मि सोऽहं सुगवः शोभनगोयुक्तः सुवीरः शोभनवीरश्च भूत्वा अस्य राष्ट्रस्य पतिरधिपतिः स्यां भवेयम् । उत अपि च पश्यन् । अक्षिभ्यां पश्यन् । उपलक्षणमेतत् । सर्वैरिंद्रियैः स्वस्वविषयदर्शनसमर्थैर्दीर्घं वर्षशतरूपेणायतं आयुर्जीवितं चाश्नुवन्प्राप्नुवन्नहं अस्तमिवेत् यथा गृहं स्वामी निष्कंटकं प्रविशति एवं जरिमाणं जरां जगम्यां कंटकराहित्येन प्राप्नुयां । वृद्धः संश्चिरकालं निवसेयमित्यर्थः । स्याम् । अस्तेः प्रार्थनायां लिङ् यासुट् । श्नसोरल्लोप इत्यकारलोपः । अश्नुवन् । अशू व्याप्तौ । व्यत्ययेन शतृ । जरिमाणम् । जॄष् वयोहानौ । अस्मादौणादिक इमनिच् प्रत्ययः । जगम्याम् । गमेः प्रार्थनायां लिङि बहुलं छंदसीति विकरणस्य श्लुः ॥

(मं० १ सू० १८४.)

६.

ता वा॒मद्य ताव॑प॒रं हु॑वेम॒ोच्छंत्या॑मु॒षसि॒ वह्नि॑रु॒क्थैः ।
नास॑त्या॒ कुह॑ चि॒त्संता॑व॒र्यो दि॒वो नपा॑ता सु॒दास्त॑राय ॥ १ ॥

ता । वा॒ं । अ॒द्य । तौ । अ॒प॒रं । हु॒वे॒म॒ । उ॒च्छंत्या॑ं । उ॒षसि॑ । वह्नि॑ः । उ॒क्थैः ॥ नास॑त्या । कुह॑ । चि॒त् । संतौ॑ । अ॒र्यः । दि॒वः । नपा॑ता । सु॒दाः॒ऽत॑राय ॥ १ ॥

ता तौ रक्षकत्वेन प्रसिद्धौ वां युवामद्यास्मिन्यागदिने हुवेम आह्वयाम इत्याशीः । तथापरमपरस्मिन्नपि दिने तौ युवां हुवेम । अपरमित्येतदपरस्मिन्नित्यर्थे समभिव्याहारात् । अद्या च नो मृळयतापरं चेत्यादिमंत्रांतरे तथा दर्शनाच्च । अपरयागं प्रत्यपीति वा । कस्मिन्काले । उषस्युषोदेवतायामुच्छंत्यां तमो विवासयंत्यां सत्यां । उषःकाले हि प्रातरनुवाकाश्विनशस्त्रे प्रयुज्येते । उक्ते काले हे नासत्या असत्यरहितौ दिवो नपाता द्युलोकस्य न पातयितारौ नभृस्थानीयौ वा कुहचित्संतौ कुत्रचिद्देशे वर्तमानौ युवां वह्निः स्तुतेर्वोढार्य ईरयिता स्तुतेरीश्वरो वा ईदृशोऽहं होता सुदास्तरायात्यर्थं शोभनहविर्दात्रे यजमानाय तदर्थं तौ युवामुक्थैः शस्त्रैर्हुवेमेति संबंधः । अत्राख्यातं पदमेकवचनतया नेतव्यं । वह्निरर्यशब्दौ वा बहुवचनत्वेन नेतव्यौ । अथवा वाक्यद्वयं । यस्माद्वह्निरर्यो होतोक्तगुणकौ युवां शंसति तस्माद्वयं यजमानास्तौ युवामाह्वयाम इति ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अस्मे ऊ षु वृषणा मादयेथामुत्पणीँर्हतमूर्म्या मदंता ।
श्रुतं मे अच्छोक्तिभिर्मतीनामेष्टा नरा निचेतारा च कर्णैः २

अस्मे इति । ऊं इति । सु । वृषणा । मादयेथां । उत् । पणीन् । हतं । ऊर्म्या । मदंता ॥ श्रुतं । मे । अच्छोक्तिऽभिः । मतीनां । एष्टा । नरा । निऽचेतारा । च । कर्णैः ॥ २ ॥

हे वृषणा कामानां वर्षकावश्विनौ युवामस्मे उ अस्मास्वेव सु मादयेथां सुष्टु तृप्यतं अस्मभ्यं तर्पयतमभिमतं । तथा पणीन् वणिजो लुब्धकानयष्टॄन् उत् उन्मूल्य हतं नाशयतं । कीदृशौ युवां । ऊर्म्या । रात्रिनामैतत् । रात्रौ मदन्ता माद्यंतौ । यद्वा ऊर्मिरिति सोमनाम । ऊर्मिर्यस्ते पवित्र आ (९-६४-११) इत्यादिषु तथा प्रयोगात् । अस्मदीयेन सोमेन मदंतौ । तादृशौ युवां मे ममाच्छोक्तिभिराभिमुख्यकरैर्निर्मलवेदवाक्यैरंचिता मतीनां । कर्मणि षष्ठी । मननसाधनाः स्तुतीः कर्णैराकर्णनसाधनैः श्रोत्रैः श्रुतं शृणुतं । हे नरा नेतारौ युवां खल्वेष्टा अन्वेष्टारावस्मत्स्तुतीनां । तथा निचेतारा लब्धानां तासां संचयकर्तारौ । निरित्येष समित्येतस्य स्थाने । यस्मादेवंविधौ तस्माच्छृणुतमिति ॥

श्रिये पूषन्निषुकृतेव देवा नासत्या वहतुं सूर्यायाः ।
वच्यंते वां ककुहा अप्सु जाता युगा जूर्णेव वरुणस्य भूरेः ३

श्रिये । पूषन् । इषुकृताऽइव । देवा । नासत्या । वहतुं । सूर्यायाः ॥ वच्यंते । वां । ककुहाः । अप्ऽसु । जाताः । युगा । जूर्णाऽइव । वरुणस्य । भूरेः ॥ ३ ॥

सविता सूर्यो दुहितरं सूर्याख्यां प्रदातुमना देवानाहूय सामर्थ्यसमीक्षणायाजिं परिकल्प्य य इमं जेष्यति स एषां कन्यकामृक्सहस्रकॢप्तं स्तोत्रं च लभत इत्यकल्पयत् । तमग्निः प्रथममजयत् तमन्वश्विनावपि जित्वाग्निं प्रधृष्य ऋक्सहस्रं कन्यकां चालभेतां । तत इंद्र उषाश्चाजयतां । तौ च तैरग्न्यादिभिः प्रार्थितौ स्वशस्त्रस्य कंचित्कंचिद्भागं तेभ्यः परिकल्प्य सूर्या स्वरथेऽधारयतामिति । अयमितिहासो ब्राह्मणे प्रजापतिर्वै सोमाय राज्ञ इत्यत्राम्नातोऽस्माभिः प्रथमाष्टके । १. ८. २०. ५. । आ वां पतित्वं सख्यायेत्यत्र प्रपंचितः । तत्राह । हे पूषन् पोषक सूर्य । एतच्चंद्रस्याप्युपलक्षणं सूर्याचंद्रमसोरेवाश्वित्वात् । सूर्याचंद्रमसावित्येक इति यास्केनोक्तत्वात् । अतः पूषन्नित्युक्ते हे पोषकावश्विनावित्युक्तं भवति । हे पोषकौ हे नासत्या असत्यरहितौ देवा देवौ युवां श्रिये श्रेयसे शस्त्रस्य कन्यायाश्च लाभायेत्यर्थः । इषुकृते-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

व । इवशब्द एवार्थे । आजिधावनायेषुवच्छीघ्रमृजुगामिनौ कृतावेव संतौ सूर्याया एतन्नामिकायाः सवितुः पुत्र्याः । कर्मणि षष्ठी । सूर्यां वहतुं रथे धारयितुमाजिमुदजयतामित्यर्थः । यस्मादेवं तस्मादप्सु जाताः कर्मसु संपादिताः ककुहाः शस्त्ररूपाः स्तुतयो भूरेरविच्छिन्नप्रवाहस्य वरुणस्य फलप्रतिबंधकपापनिवारकस्य यागस्य सिद्ध्यर्थं तत्संबंधिन्यो वां प्रति वच्यंते उच्यंते होत्रादिभिः । युवामेव शस्त्रगतमंत्रैर्यागकाले च स्तुवंतीत्यर्थः । युगा जूर्णेव । जीर्णानि युगानीव । इवशब्दः संप्रत्यर्थे । पुरातना यागकाला यथा तद्वदद्यतना अपीत्यर्थः । पूर्वकाले यथा युवामेव स्तुवंति तद्वदिदानीमपीति तात्पर्यं ॥

अस्मे सा वां माध्वी रातिरस्तु स्तोमं हिनोतं मान्यस्य कारोः । अनु यद्वां श्रवस्या सुदानू सुवीर्याय चर्षणयो मदंति ॥ ४ ॥

अस्मे इति । सा । वां । माध्वी इति । रातिः । अस्तु । स्तोमं । हिनोतं । मान्यस्य । कारोः ॥ अनु । यत् । वां । श्रवस्या । सुदानू इति सुऽदानू । सुऽवीर्याय । चर्षणयः । मदंति ॥ ४ ॥

हे माध्वी मधुपूर्णपात्रयुक्तावश्विनौ वां युवयोः संबंधिनी सा प्रसिद्धा रातिर्दानमस्मे अस्माकमस्तु भवतु । तदर्थं मान्यस्य मननीयस्य कारोः स्तोतुरगस्त्यस्य स्तोमं स्तुतिं हिनोतं प्रीणयतं । हे सुदानू शोभनफलदानौ वां युवां श्रवस्या कीर्तेरन्नस्य वेच्छया यत् यस्मात्सुवीर्याय यजमानाय शोभनबलाय वा चर्षणयो मनुष्या ऋत्विग्रूपा अनुमदंति अनुक्रमेण माद्यंति युवाभ्यां सह स्वयं वा ॥

एष वां स्तोमो अश्विनावकारि मानेभिर्मघवाना सुवृक्ति । यातं वर्तिस्तनयाय त्मने चागस्त्ये नासत्या मदंता ५

एषः । वां । स्तोमः । अश्विनौ । अकारि । मानेभिः । मघऽवाना । सुऽवृक्ति ॥ यातं । वर्तिः । तनयाय । त्मने । च । अगस्त्ये । नासत्या । मदंता ॥ ५ ॥

हे अश्विनौ हे मघवाना हविर्लक्षणान्नवंतौ वां युवाभ्यामेषः स्तोमः स्तोत्रं सुवृक्ति सुष्ठु पापवर्जनं यथा भवति तथा । यद्वा सुसमाप्यकारि कृतः । कीदृशोऽयं । मानेभिर्मानैर्हविःप्रदानरूपैः सहितः । हे नासत्या असत्यरहितौ युवामगस्त्य एतन्नाम्नि महर्षौ मयि मदंता माद्यंतौ संतौ वर्तिर्गृहं यज्ञसंबंधि यातं प्राप्नुतं । किमर्थं । तनयाय पुत्रादिलाभाय । त्मने आत्मने च हिताय ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अतारिष्म तमसस्पारमस्य प्रति वां स्तोमो अश्विनावधायि । एह यातं पथिभिर्देवयानैर्विद्यामेषं वृजनं जीरदानुं ॥६॥

अतारिष्म । तमसः । पारं । अस्य । प्रति । वां । स्तोमः । अश्विनौ । अधायि ॥ आ । इह । यातं । पथिऽभिः । देवऽयानैः । विद्याम । इषं । वृजनं । जीरऽदानुं ॥ ६ ॥

हे अश्विनौ युवयोः प्रसादादस्य तमसस्तमनहेतोः श्रेयःप्रतिबंधरूपस्य दुःखस्य पारं पर्यंतभूमिमतारिष्म उत्तीर्णाः स्मः । हे अश्विनौ वां प्रति स्तोमः स्तोत्रमधायि । अकारीत्यर्थः । युवां देवयानैर्देवगंतव्यैर्मार्गैरिहास्मद्यज्ञ आयातं आगच्छतं । वयमपीषमन्नं वृजनं बलं जीरदानुं जयशीलदानमेतत्सर्वं विद्याम युष्मास्वागतेषु यज्ञसंपूर्त्येष्ट्यादिद्वारा लभेमहि ॥

(मं० २ सू० २३.)

७.

गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमं । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनं ॥ १ ॥

गणानां । त्वा । गणऽपतिं । हवामहे । कविं । कवीनां । उपमश्रवःऽतमं ॥ ज्येष्ठऽराजं । ब्रह्मणां । ब्रह्मणः । पते । आ । नः । शृण्वन् । ऊतिऽभिः । सीद । सदनं ॥ १ ॥

हे ब्रह्मणस्पते ब्रह्मणोऽन्नस्य परिवृढस्य कर्मणो वा पते पालयितः गणानां देवादिगणानां संबंधिनं गणपतिं स्वीयानां पतिं । कवीनां क्रांतदर्शिनां कविं । उपमश्रवस्तमं । उपमीयतेऽनयेत्युपमा । सर्वेषामन्नानामुपमानं श्रवोऽन्नं यस्य स तथोक्तः । अतिशयेनोपमश्रवा उपमश्रवस्तमः ॥ माङ् माने । आतश्चोपसर्गे करणेऽङ् प्रत्ययः । ङ्यापोः संज्ञाछंदसोरिति ह्रस्वत्वं ॥ ज्येष्ठराजं । जेष्ठाः प्रशस्यतमाः तेषां मध्ये राजंतं ब्रह्मणां मंत्राणां स्वामिनं त्वा त्वां हवामहे । अस्मिन्कर्मण्याह्वयामः । किंच नोऽस्माकं स्तुतीः शृण्वन् त्वमूतिभिः पालनैर्हेतुभूतैः सादनं सीदंत्यस्मिन्निति सदनं यज्ञगृहमासीद उपविश ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

देवाश्चित्ते असुर्य प्रचेतसो बृहस्पते यज्ञियं भागमानशुः । उस्रा इव सूर्यो ज्योतिषा महो विश्वेषामिज्जनिता ब्रह्मणामसि ॥ २ ॥

देवाः । चित् । ते । असुर्य । प्रऽचेतसः । बृहस्पते । यज्ञियं । भागं । आनशुः ॥ उस्राःऽइव । सूर्यः । ज्योतिषा । महः । विश्वेषां । इत् । जनिता । ब्रह्मणां । असि ॥ २ ॥

असुर्य असुराणां हंतः हे बृहस्पते प्रचेतसः प्रकृष्टज्ञानास्ते त्वदीया देवाश्चित् देवा अपि यज्ञियं यज्ञार्हं भागमानशुः प्राप्नुवन् । यद्वा प्रचेतस इति बृहस्पतेर्विशेषणं । प्रकृष्टज्ञानवतस्ते तव संबंधिनो देवा इति योजनीयं । यद्वा प्रचेतसः । विभक्तिविपरिणामः । प्रचेतसि त्वयि सति देवा यज्ञियं भागमानशिरे । कर्मविघ्नकारिणामसुराणां रक्षोघ्नमंत्रैरपाकरणात् । न वै ब्रह्मण्वद्रिष्यतीति श्रवणात् । ज्योतिषा तेजसा महो मंहनीयः सूर्य उस्रा इव । उस्राः किरणाः । स्फायितंचीत्यादिना रक्प्रत्ययः । यथा किरणान् जनयति तथा विश्वेषां सर्वेषां ब्रह्मणां मंत्राणां जनितेत् जनयितैवासि । जनिता मंत्र इति निपातनाण्णिलोपः ॥

आ विबाध्या परिरापस्तमांसि च ज्योतिष्मंतं रथमृतस्य तिष्ठसि । बृहस्पते भीममर्मित्रदंभनं रक्षोहणं गोत्रभिदं स्वर्विदं ॥ ३ ॥

आ । विऽबाध्य । परिऽरपः । तमांसि । च । ज्योतिष्मंतं । रथं । ऋतस्य । तिष्ठसि ॥ बृहस्पते । भीमं । अमित्रऽदंभनं । रक्षःऽहनं । गोत्रऽभिदं । स्वःऽविदं ॥ ३ ॥

हे बृहस्पते परिरपः परितो रपः पापरूपं रक्षः । यद्वा रप लप व्यक्तायां वाचि । क्विप् । परिवदतो निंदकान् तमांसि च विबाध्य तेजसा निराकृत्य ज्योतिष्मंतं ज्योतिषा तद्वंतमृतस्य यज्ञस्य प्रापकं भीमं शत्रूणां भयंकरममित्रदंभनं शत्रूणां हिंसकं । तदेवाह रक्षोहणं रक्षसां हंतारं गोत्रभिदं मेघानां भेत्तारं स्वर्विदं स्वर्गस्य लंभकं रथमातिष्ठसि अधितिष्ठसि ॥

सुनीतिभिर्नयसि त्रायसे जनं यस्तुभ्यं दाशान्न तमंहो अश्नवत् । ब्रह्मद्विषस्तपनो मन्युमीरसि बृहस्पते महि तत्ते महित्वनं ॥ ४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सुनीतिऽभिः । नयसि । त्रायसे । जनं । यः । तुभ्यं । दाशात् । न । तं । अंहः । अश्नवत् ॥ ब्रह्मऽद्विषः । तपनः । मन्युऽमीः । असि । बृहस्पते । महि । तत् । ते । महिऽत्वनं ॥ ४ ॥

हे बृहस्पते सुनीतिभिः शोभना नीतयो येषु ते सुनीतयः सन्मार्गाः तैर्जनं नयसि अपेक्षितफलं प्रापयसि । त्रायसे जनमापद्भ्यो रक्षसि च । यो यजमानस्तुभ्यं हविर्लक्षणमन्नं दाशात् प्रयच्छेत् । दाश्टृ दाने । लेट्याडागमः । तमंहः पापं पापरूपं दारिद्र्यं वा नाश्नवत् न प्राप्नुयात् । अश्नोतेर्लेटि व्यत्ययेन परस्मैपदं । अडागमः । ब्रह्मद्विषो ब्राह्मणानां मंत्राणां वा द्वेष्टुस्तपनस्तापकोऽसि । किंच मन्युमीर्मन्योः क्रोधस्य परेषां ज्ञानस्य वा हिंसकोऽसि । मीङ् हिंसायां । क्विप् । ते तव तत्तादृशं महि महत् प्रभूतं महित्वनं माहात्म्यमस्ति ॥

न तमंहो न दुरितं कुतश्चन नारातयस्तितिरुर्न द्वयाविनः । विश्वा इदस्माद्ध्वरसो वि बाधसे यं सुगोपा रक्षसि ब्रह्मणस्पते ॥ ५ ॥

न । तं । अंहः । न । दुःऽइतं । कुतः । चन । न । अरातयः । तितिरुः । न । द्वयाविनः ॥ विश्वाः । इत् । अस्मात् । ध्वरसः । वि । बाधसे । यं । सुऽगोपाः । रक्षसि । ब्रह्मणः । पते ॥ ५ ॥

हे ब्रह्मणस्पते सुगोपाः सुष्ठु पालयिता त्वं यं जनं रक्षसि पालयसि तं जनमंह आहंतव्यं दुःखं न बाधते । दुरितं तत्कारणं पापं च न बाधते । अरातयो हिंसकास्तं जनं कुतश्चन सर्वासु दिक्षु न तितिरुः । तिरतिर्हिंसाकर्मा । लिट् । न हिंसंति । तथा द्वयाविनः । मनस्यन्यत्क्रियायां चान्यदित्येतद्द्वयं येषामस्ति ते द्वयाविनो वंचकाः तेऽपि तं जनं न बाधंते । किंच अस्मात् ध्वरसो वा हिंसिका विश्वाः सर्वाः सेनास्तदर्थं विबाधसे विशेषेण बाधस एव ॥

त्वं नो गोपाः पथिकृद्विचक्षणस्तव व्रताय मतिभिर्जरामहे । बृहस्पते यो नो अभि ह्वरो दधे स्वा तं मर्मर्तु दुच्छुना हरस्वती ॥ ६ ॥

त्वं । नः । गोपाः । पथिऽकृत् । विऽचक्षणः । तव । व्रताय । मतिऽभिः । जरामहे ॥ बृहस्पते । यः । नः । अभि । ह्वरः । दधे । स्वा । तं । मर्मर्तु । दुच्छुना । हरस्वती ॥ ६ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

हे बृहस्पते त्वं नोऽस्माकं गोपाः पालयिता पथिकृत् सन्मार्गश्च भवसि । विचक्षणो विशेषेण द्रष्टा सर्वज्ञस्त्वं । तव व्रताय त्वत्संबंधिने यज्ञाय मतिभिः स्तोत्रैर्जरामहे । स्तुमः । जरतिः स्तुतिकर्मा । यः पुमान् नोऽस्मानभि अभिलक्ष्य ह्वरः । ह्वृ कौटिल्ये । भावेऽसुन् । कौटिल्यं दधे विदधाति तं स्वा स्वीया दुच्छुना दुर्बुद्धिर्हरस्वती वेगवती सती मर्मर्तु मोचयतु । मृङ् प्राणत्यागे । अंतर्भावितण्यर्थस्य यङ्लुकि लोटि रूपं ॥

उत वा यो नो मर्चयादनागसोऽरातीवा मर्तः सानुको वृकः । बृहस्पते अप तं वर्तया पथः सुगं नो अस्यै देववीतये कृधि ॥ ७ ॥

उत । वा । यः । नः । मर्चयात् । अनागसः । अरातिऽवा । मर्तः । सानुकः । वृकः ॥ बृहस्पते । अप । तं । वर्तय । पथः । सुऽगं । नः । अस्यै । देवऽवीतये । कृधि ॥ ७ ॥

उत वा अपि च हे बृहस्पते अरातीवाभिमुखमागमनवान् सानुकः समुच्छ्रतः सानु समुच्छ्रितमिति यास्कः । नि० २. २४. वृकः । वृक आदाने । धनादीनामादाता यो मर्त्यो मनुष्योऽनागसोऽपराधहीनान्नोऽस्मान् मर्चयात् । मर्चयतिहिंसाकर्मा । हिंस्यात् । तं मर्तं पथो वैदिकान्मार्गादपवर्तय निवर्तय । नोऽस्माकमस्यै देववीतये देवानां वीतिं सोमभक्षणमर्चयतीति देववीतिर्यज्ञः । अस्यै देववीतयेऽस्मै यज्ञाय नोऽस्माकं सुगं सुष्ठु गंतव्यं मार्गं कृधि कुरु । यज्ञानुष्ठानाय सुमतिं देहीत्यर्थः ॥

त्रातारं त्वा तनूनां हवामहेऽवस्पर्तरधिवक्तारमस्मयुं । बृहस्पते देवनिदो नि बर्हय मा दुरेवा उत्तरं सुम्नमुन्नशन् ८

त्रातारं । त्वा । तनूनां । हवामहे । अवऽस्पर्तः । अधिऽवक्तारं । अस्मऽयुं ॥ बृहस्पते । देवऽनिदः । नि । बर्हय । मा । दुःऽएवाः । उत्ऽतरं । सुम्नं । उत् । नशन् ॥ ८ ॥

अवस्पर्तः उपद्रवेभ्यः पारयितः । यद्वा अवसा रक्षणेनापद्भ्यः पारयित हे ब्रह्मणस्पते तनूनामंगानां पुत्रादीनां वा त्रातारं पालयितारमधिवक्तारमस्मासु पक्षपातेनाधिकं वक्तारमस्मयुं हविःप्रदानस्मान् कामयमानं त्वां हवामहे अस्मिन्कर्मण्याह्वयामः । किंच देवनिदो देवनिंदकानसुरान् निबर्हय विनाशय । दुरेवा दुष्टगमना दुर्बुद्धयः शत्रव उत्तरमुत्कृष्टतरं सुम्नं सुखं मा उन्नशन् मा व्याप्नुवंतु ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

त्वया॑ व॒यं सु॒वृधा॑ ब्रह्मणस्पते स्पा॒र्हा वसु॑ मनु॒ष्या द॑दी॑महि । या नो॑ दू॒रे त॒ळितो॒ या अरा॑तयो॒ऽभिसं॑ति॑ जं॒भया॒ ता अ॑नु॒प्नसः॑ ॥ ९ ॥

त्वया॑ । व॒यं । सु॒ऽवृधा॑ । ब्र॒ह्म॒णः॒ । प॒ते॒ । स्पा॒र्हा । वसु॑ । म॒नु॒ष्या॑ । आ । द॒दी॒म॒हि॒ ॥ याः । नः॒ । दू॒रे । त॒ळितः॑ । याः । अरा॑तयः । अ॒भि । संति॑ । जं॒भय॑ । ताः । अ॒नु॒प्नसः॑ ॥ ९ ॥

हे ब्रह्मणस्पते सुवृधा सुष्ठु वर्धयित्रा त्वया हेतुना वयं स्पार्हा स्पृहणीयानि वसु धनानि मनुष्या । सुपां सुलुगिति चतुर्थीबहुवचनस्याकारः । मनुष्येभ्यो दातृभ्य आददीमहि गृह्णीमहि । आङो दोऽनास्यविहरण इत्यात्मनेपदं । दूरे दूरदेशे या अरातयः याश्च तळितोऽतिकेऽरातयो नोऽस्मानभिसंति अभिभवंति अनप्नसः कर्महीनान् ता अरातीस्तान् शत्रून् जंभय नाशय । जभि नाशने चुरादिः । अत्र निरुक्तं । त्वया वयं सुवर्धयित्रा ब्रह्मणस्पते स्पृहणीयानि वसूनि मनुष्येभ्य आददीमहि याश्च नो दूरे तळितो याश्चांतिकेऽरातयोऽदानकर्माणो वा दानप्रज्ञा वा जंभय ता अनप्नसोऽप्न इति रूपनाम । नि० ३. ११. । इति ॥

त्वया॑ व॒यमु॑त्त॒मं धी॑मह॒े वयो॒ बृह॑स्पत॒े पप्रि॑णा॒ सस्नि॑ना यु॒जा । मा नो॑ दुः॒शंसो॑ अभिदि॒प्सुरी॑शत॒ प्र सु॒शंसा॑ म॒तिभि॑स्तारिषीमहि ॥ १० ॥

त्वया॑ । व॒यं । उ॒त्ऽत॒मं । धी॒म॒हे॒ । वयः॑ । बृह॑स्पते । पप्रि॑णा । सस्नि॑ना । यु॒जा ॥ मा । नः॒ । दुः॒ऽशंसः॑ । अ॒भि॒ऽदि॒प्सुः । ई॒श॒त॒ । प्र । सु॒ऽशंसाः॑ । म॒तिऽभिः॑ । ता॒रि॒षी॒म॒हि॒ ॥ १० ॥

हे बृहस्पते पप्रिणा ॥ पॄ पालनपूरणयोः । आदृगमहनेति किन्प्रत्ययः । छांदसो यणादेशः । कामानां पूरकेण सस्निना शुद्धेन युजा सहायेन त्वया हेतुनोत्तमं वयो हविर्लक्षणमन्नं वयं धीमहे धारयामः । धी धारणे । दैवादिकः । दुःशंसो दुःशंसनीयोऽभिदिप्सुरभिदंभितुमभिभवितुमिच्छुः पुरुषो नोऽस्माकं मा ईशत मा ईशिष्ट ईश्वरो मा भवतु । ईश ऐश्वर्ये । लेट्यडागमः । वयं मतिभिः स्तोत्रैः सुशंसाः शोभनशंसनोपेताः संतः प्रतारिषीमहि प्रकर्षेण वर्धेमहि ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अनानुदो वृषभो जग्मिराहवं निष्टप्ता शत्रुं पृतनासु सासहिः । असि सत्य ऋणया ब्रह्मणस्पत उग्रस्य चिद्दमिता वीळुहर्षिणः ॥ ११ ॥

अननुऽदः । वृषभः । जग्मिः । आऽहवं । निःऽतप्ता । शत्रुं । पृतनासु । सासहिः ॥ असि । सत्यः । ऋणऽयाः । ब्रह्मणः । पते । उग्रस्य । चित् । दमिता । वीळुऽहर्षिणः ॥ ११ ॥

हे ब्रह्मणस्पते अनानुदः अनु पश्चाद्ददातीत्यनुदः स यस्य नास्तीत्यननुदः । दात्रंतरशून्य इत्यर्थः । अत एव वृषभः कामानां वर्षिता । आहवं आहूयतेऽत्रेत्याहवो युद्धं । आङि युद्धे । पा० ३. ३. ७३ । इत्यप्प्रत्ययः संप्रसारणं च । तद्युद्धं जग्मिर्गंता । आदृगमहनेति किन्प्रत्ययः । लिङ्वद्भावादाहवमित्यत्र षष्ठीप्रतिषेधः । शत्रुं शातयितारं निष्टप्ता नितरां तस्य तापकः । तृन्नंतत्वात्षष्ठीप्रतिषेधः । निसस्तपतावनासेवने । पा० ८. ३. १०२. । इति षत्वं । तादौ च नितीति गतेः स्वरः । पृतनासु संग्रामेषु सासहिः शत्रूणामभिभविता एतादृशस्त्वं सत्यः सत्यपराक्रमः सत्यप्रज्ञो वासि । ऋणया ऋणस्य यावयितासि । यु मिश्रणामिश्रणयोः । ण्यंतस्य क्विपि णिलोपे लोपो व्योर्वलीति वलोपः । किंच उग्रस्य चित् ओजस्विनोऽपि दमितोपशमयिता वीळुहर्षिणो दृढहर्षस्य कामुकस्य नास्तिकस्य चिद्दमितासि ॥

अदेवेन मनसा यो रिषण्यति शासामुग्रो मन्यमानो जिघांसति । बृहस्पते मा प्रणक्तस्य नो वधो नि कर्म मन्युं दुरेवस्य शर्धतः ॥ १२ ॥

अदेवेन । मनसा । यः । रिषण्यति । शासां । उग्रः । मन्यमानः । जिघांसति ॥ बृहस्पते । मा । प्रणक् । तस्य । नः । वधः । नि । कर्म । मन्युं । दुःऽएवस्य । शर्धतः ॥ १२ ॥

यः पुमान् अदेवेन देवानमन्यमानेन । यद्वा आसुरवृत्तिविशिष्टेन मनसास्मान् रिषण्यति हिनस्ति । दुरस्युर्द्रविणस्युर्वृषण्यतिरिषण्यतीति निपातितः । यश्चोग्रः पापचित्तो मन्यमान आत्मानं वहुमन्यमानः पुमान् शासामुक्थस्य शंसितारं । यद्वा अस्माकमाशंसां शासितॄणामुग्र इति वा योजनीयं । अस्मान् जिघांसति हंतुमिच्छति । हंतेः सन्यज्झनगमां सनीति दीर्घः । हे वृहस्पते तस्य वधः । वध्यतेऽनेनेति वध आयुधं । नोस्मान्मा पृणक् मा संपर्कयतु । पृची संपर्के श्नम् विकरणी । व्यत्ययेनामागमः । चादिलोप इति न निघातः । व्यत्ययेनाद्युदात्तः । किंच दुरेवस्य दुष्टगमनस्य शर्धतो वल-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वतः । यद्वा दुष्टाभिसंधेर्वेगं कुर्वतस्तस्य मन्युं क्रोधं ज्ञानं वा निकर्म त्वत्प्रसादान्निराकुर्मश्च ॥

भरेषु हव्यो नमसोपसद्यो गंता वाजेषु सनिता धनंधनं । विश्वा इदर्यो अभिदिप्स्वो३मृधो बृहस्पतिर्वि ववर्हा रथाँ इव ॥ १३ ॥

भरेषु । हव्यः । नमसा । उपऽसद्यः । गंता । वाजेषु । सनिता । धनंऽधनं ॥ विश्वाः । इत् । अर्यः । अभिऽदिप्स्वः । मृधः । बृहस्पतिः । वि । ववर्ह । रथान्ऽइव ॥ १३ ॥

स बृहस्पतिर्भरेषु संग्रामेषु हव्यो योद्धृभिः स्वरक्षणार्थमाह्वातव्यो नमसोपसद्यः सर्वैर्नमसोपसदनीयः । किंच वाजेषु गंता संग्रामेषु रक्षार्थं गमनशीलः । तथा धनं धनं सनिता संभक्ता दाता वा । तृन्नंतत्वात्षष्ठीप्रतिषेधः । तथार्यः स्वामी बृहस्पतिरभिदिप्स्वोऽभिभवनेच्छावतीर्विश्वा इत् सर्वा एव मृधो हिंसिकाः सेना रथानिव युद्धे वेगेन परकीयान्रथानिव विववर्ह विशेषेण शिथिलीचकार । यद्वा इवशब्दश्चार्थे । रथांश्च विववर्ह । लडर्थे लिट् ॥

तेजिष्ठया तपनी रक्षसस्तप ये त्वा निदे दधिरे दृष्टवीर्यं । आविस्तत्कृष्व यदसत्त उक्थ्यं१ बृहस्पते वि परिरापो अर्दय १४

तेजिष्ठया । तपनी । रक्षसः । तप । ये । त्वा । निदे । दधिरे । दृष्टऽवीर्यं ॥ आविः । तत् । कृष्व । यत् । असत् । ते । उक्थ्यं । बृहस्पते । वि । परिऽरपः । अर्दय ॥ १४ ॥

हे बृहस्पते तेजिष्ठयातिशयेन तिग्मया तपनी तापकारिण्या हेत्या रक्षसो राक्षसांस्तप तापय । ये राक्षसा दृष्टवीर्यं युद्धेषु दृष्टपराक्रमं त्वा त्वां निदे निंदाया विषयं दधिरे कृतवंतः तान् तापयेति समन्वयः । ते तवोक्थ्यं सर्वैः प्रशंसनीयं यद्वीर्यमसत् पूर्वमासीत् तदधुनाविष्कृष्व प्रकटीकुरु । तेन च वीर्येण परिरापः परिवदतो निंदकानसुरान् व्यर्दय विशेषेण बाधस्व ॥

बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रं १५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

बृहस्पते । अति । यत् । अर्यः । अर्हात् । द्युऽमत् । विऽभाति । क्रतुऽमत् । जनेषु ॥ यत् । दीदयत् । शवसा । ऋतऽप्रजात । तत् । अस्मासु । द्रविणं । धेहि । चित्रं ॥ १५ ॥

ऋतप्रजात सत्येनोत्पन्न हे बृहस्पते अर्यः श्रेष्ठो ब्राह्मणः सर्वान् कामानतीत्य यद्ब्रह्मवर्चसं तेजोऽर्हात् पूजयेत् । अर्ह पूजायां लेट्याडागमः । जनेषु ब्राह्मणेषु द्युमत् दीप्तियुक्तं क्रतुमत् ज्ञानोपेतं यद्ब्रह्मवर्चसं विभाति विशेषेण दीप्यते । यच्च शवसा बलेन स्वाश्रयं जनं दीदयत् । दीदयतिर्दीप्तिकर्मा । दीपयति । चित्रं चायनीयं तद्ब्रह्मवर्चसरूपं द्रविणमस्मासु धेहि निधेहि । यद्वा अर्य उदारोऽपि त्वया दत्तं धनमतीवार्हात् श्रद्दधीत । यच्च त्वद्दत्तं धनं जनेषु तव स्तोत्रं कुर्वाणेषु दीप्तियुक्तं कर्मसाधनं च विभाति । यच्च धनं शवसान्नादिसमृद्ध्या दीदयत् स्वाश्रयं दीपयति तादृशं धनमस्मासु धेहि । तथा च ब्राह्मणं । बृहस्पते अति यदर्यो अर्हादित्येतया परिदध्यात्तेजस्कामो ब्रह्मवर्चसकामोऽतीवान्यान्ब्रह्मवर्चसमर्हति द्युमदिति द्युमदिव वै ब्रह्मवर्चसं विभातीति वीव वै ब्रह्मवर्चसं भाति यद्दीदयच्छवस ऋतप्रजातेति दीदायेव वै ब्रह्मवर्चसं तदस्मासु द्रविणं धेहि चित्रमिति चित्रमिव वै ब्रह्मवर्चसं ब्रह्मवर्चसी ब्रह्मयशसी भवतीति । ४. ११.

मा नः स्तेनेभ्यो ये अभि द्रुहस्पदे निरामिणो रिपवोऽन्नेषु जागृधुः । आ देवानामोहते वि व्रयो हृदि बृहस्पते न परः साम्नो विदुः ॥ १६ ॥

मा । नः । स्तेनेभ्यः । ये । अभि । द्रुहः । पदे । निरामिणः । रिपवः । अन्नेषु । जागृधुः ॥ आ । देवानां । ओहते । वि । व्रयः । हृदि । बृहस्पते । न । परः । साम्नः । विदुः ॥ १६ ॥

हे बृहस्पते नोऽस्मान् स्तेनेभ्यः । स्त्यानमस्ति येष्विति स्तेनाश्चौराः तेभ्यो मा दाः । तान् दर्शयति । ये चौरा द्रुहः प्राणद्रोहस्य पदे स्थाने निरामिणो नितरां रमणशीला रिपवो हिंसकाः संतोऽन्नेषु परकीयेष्वभिजागृधुः अभिकांक्षंति । गृधु अभिकांक्षायां । लिटि रूपं । ये च देवानां विव्रयो विशेषेण वर्जनं । व्री व्ली इति धातू वर्जने वर्तेते । य एवं विद्वान् दक्षिणां प्रतिगृह्णाति नैनं दक्षिणा व्लीनातीत्येकस्य वर्जनार्थे दृष्टत्वादपरस्यापि वर्जनार्थत्वं । तत् हृदि स्वकीये हृदय आ ओहते आवहंति । देवानां यागान् स्तुतींश्च न करवामेति मन्यंत इति यावत् । तेभ्योऽस्मान् मा दा इति समन्वयः । ये पुमांसः साम्नः साममयात्त्वत्तः परः परस्तादन्यदुत्कृष्टं साम यद्रक्षोघ्नं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

साम वै रक्षोहेति न विदुः न जानंति । किंतु सर्वसाधकं साम त्वामेव विदुषोऽस्मान् स्तेनेभ्यो मा दाः ॥

विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः । स ऋणचिदृणया ब्रह्मणस्पतिर्द्रुहो हंता मह ऋतस्य धर्तरि ॥ १७ ॥

विश्वेभ्यः । हि । त्वा । भुवनेभ्यः । परि । त्वष्टा । अजनत् । साम्नःऽसाम्नः । कविः ॥ सः । ऋणऽचित् । ऋणऽयाः । ब्रह्मणः । पतिः । द्रुहः । हंता । महः । ऋतस्य । धर्तरि ॥ १७ ॥

हे ब्रह्मणस्पते त्वष्टा प्रजापतिर्विश्वेभ्यो भुवनेभ्यस्परि सर्वेभ्यो भूतजातेभ्य उत्कृष्टं त्वामजनद्धि अजीजनत् खलु । ततस्त्वं साम्नः सर्वस्यापि साम्नः कविः । कु शब्दे । अच इरिति इप्रत्ययः । उच्चारयिता कर्तासि । यद्वा कविः क्रांतदर्शी त्वष्टा साम्नःसाम्नः सर्वस्यापि साम्नः सारेण त्वामजीजनत् । किंच स ब्रह्मणस्पतिर्महो महत ऋतस्य यज्ञस्य धर्तरि धारके यजमाने ऋणचित् स्तोतृकाममृणमिव चिनोतीति ऋणचित् । किंच ऋणयाः पापरूपस्य ऋणस्य यावयिता पृथक्कर्ता च द्रुहः कर्मणो द्रोग्धुरसुरस्य हंता भवेति ॥

तव श्रिये व्यजिहीत पर्वतो गवां गोत्रमुदसृजो यदंगिरः । इंद्रेण युजा तमसा परीवृतं बृहस्पते निरपामौब्जो अर्णवं ॥ १८ ॥

तव । श्रिये । वि । अजिहीत । पर्वतः । गवां । गोत्रं । उत्ऽअसृजः । यत् । अंगिरः ॥ इंद्रेण । युजा । तमसा । परिऽवृतं । बृहस्पते । निः । अपां । औब्जः । अर्णवं ॥ १८ ॥

अंगिरः आंगिरस हे बृहस्पते गवामावारको बलेनाधिष्ठितः पर्वतस्तव श्रिय आश्रयणार्थं व्यजिहीत विवृतद्वारतामगच्छत् । ततस्त्वं यद्यदा गोत्रं । इनित्रकट्यचश्चेति समूहार्थे त्रप्रत्ययः । गवां समूहमुदसृजः निरगमयः । तदेंद्रेण युजा सहायेन युक्तस्त्वं तमसा वृत्रासुरेण परीवृतं परित आक्रांतमपामर्णवं स्थानभूतं मेघं निरौब्जः नितरामधोमुखमकार्षीः ॥

ब्रह्मणस्पते त्वमस्य यंता सूक्तस्य बोधि तनयं च जिन्व । विश्वं तद्भद्रं यदवंति देवा बृहद्वदेम विदथे सुवीराः ॥१९॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ब्रह्मणः । पते । त्वं । अस्य । यंता । सुऽउक्तस्य । बोधि । तनयं । च । जिन्व ॥ विश्वं । तत् । भद्रं । यत् । अवंति । देवाः । बृहत् । वदेम । विदथे । सुवीराः ॥ १९ ॥

हे ब्रह्मणस्पते ब्रह्मणां स्तोत्राणामधिपते अस्य जगतो यंता नियामकस्त्वं सूक्तस्यास्मदीयमिदं ब्राह्मणस्पत्यं सूक्तं बोधि बुध्यस्व । त्वं तनयं पुत्रपौत्रादिलक्षणं संतानं च जिन्व । जिविः प्रीणनार्थः । लोटि रूपं । प्रीणय । भवादृशा देवा यदवंति रक्षति तत्तादृशं विश्वं सर्वं भद्रं कल्याणं भवति । अतो वयं विदथेऽस्मिन्यज्ञे सुवीराः शोभनपुत्रपौत्राः संतो बृहत्प्रभूतमिदं स्तोत्रं वदेम ब्रूयाम ॥

(मं० २ सू० २८.)

८.

इदं कवेरादित्यस्य स्वराजो विश्वानि सांत्यभ्यस्तु मह्ना । अति यो मंद्रो यजथाय देवः सुकीर्तिं भिक्षे वरुणस्य भूरेः ॥ १ ॥

इदं । कवेः । आदित्यस्य । स्वऽराजः । विश्वानि । संति । अभि । अस्तु । मह्ना ॥ अति । यः । मंद्रः । यजथाय । देवः । सुऽकीर्तिं । भिक्षे । वरुणस्य । भूरेः ॥ १ ॥

कवेः क्रांतदर्शिन आदित्यस्यादितेः पुत्रस्य स्वराजः स्वयमेव राजमानस्येश्वरस्य वा वरुणस्येदं हविः स्तोत्रं वा यजमानः करोतीति शेषः । स च विश्वानि सर्वाणि संति द्वितीयभावविकारभांजि भूतजातानि मह्ना महिम्ना वरुणप्रसादाल्लब्धेनाभ्यस्तु अभिभवतु । यो देवो द्योतमानो वरुणो यजथाय यष्ट्रे पुरुषाय अति अतिशयेन मंद्रः स्तुत्यो हर्षयिता वा भवति तस्य भूरेर्भर्तुर्वरुणस्य सुकीर्तिं शोभनां स्तुतिं भिक्षे प्रार्थये । यद्वा वरुणस्येति तृतीयार्थे षष्ठी । तेन वरुणेन दातव्यां शोभनां कीर्तिमहं याचे ॥

तव व्रते सुभगासः स्याम स्वाध्यो वरुण तुष्टुवांसः । उपायन उषसां गोमतीनामग्नयो न जरमाणा अनु द्यून् ॥ २ ॥

तव । व्रते । सुऽभगासः । स्याम । सुऽआध्यः । वरुण । तुस्तुऽवांसः ॥ उपऽअयने । उषसां । गोऽमतीनां । अग्नयः । न । जरमाणाः । अनु । द्यून् ॥ २ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

हे वरुण स्वाध्यः शोभनाध्यानास्तुष्टुवांसः स्तुतवंतो वयं तव व्रते त्वदीये परिचरणाख्ये कर्मणि वर्तमानाः सुभगासः स्याम शोभनधना भवेम । अपि च गोमतीनां रश्मिभिर्युक्तानामुषसामुपायेन उपागमने सत्यग्नयो न यथाग्नयोऽग्निहोत्रादिकर्मार्थं समिध्यंते एवमनुद्यून् अनुदिनं जरमाणास्त्वां स्तुवंतो वयं दीप्यमाना भवेम ॥

तव॑ स्याम पु॒रु॒वीर॑स्य॒ शर्म॑न्नुरु॒शंस॑स्य वरुण प्रणेतः । यू॒यं नः॑ पुत्रा अदितेरदब्धा अ॒भि क्ष॑मध्वं॒ युज्या॑य देवाः ॥३॥

तव॑ । स्या॒म॒ । पु॒रु॒ऽवीर॑स्य । शर्म॑न् । उ॒रु॒ऽशंस॑स्य । व॒रु॒ण॒ । प्र॒ने॒-त॒रिति॑ प्रऽनेतः ॥ यू॒यं । न॒ः । पु॒त्राः॒ । अ॒दि॒तेः॒ । अ॒द॒ब्धाः॒ । अ॒भि । क्ष॒म॒ध्वं॒ । युज्या॑य । दे॒वाः॒ ॥ ३ ॥

हे प्रणेतः सर्वस्य जगतः प्रकर्षेण नेतर्वरुण पुरुवीरस्य पुरुभिर्बहुभिर्वीरैरुपेतस्य । यद्वा पुरूणां बहूनां शत्रूणां विशेषेण प्रेरकस्योरुशंसस्योरुभिर्बहुभिः स्तूयमानस्य तव शर्मन् शर्मणि सुखे गृहे वा स्याम । अदितेः पुत्रा मित्रादयः । परमपि छंदसीति परस्य षष्ठ्यंतस्य पूर्वामंत्रितांगवद्भावेनानुप्रवेशात् पदद्वयसमुदायस्याष्टमिकं सर्वानुदात्तत्वं । अदब्धाः शत्रुभिरहिंसिताः एवंभूता हे देवा यूयं नोऽस्मान् कृतापराधान् युज्याय सख्यायाभिक्षमध्वं अस्माभिः कृतमपराधं सहध्वं ॥

प्र सी॑मादि॒त्यो अ॑सृजद्वि॒ध॒र्ताँ ऋ॒तं सिंध॑वो॒ वरु॑णस्य यंति । न श्रा॑म्यंति॒ न वि मु॑चंत्ये॒ते वयो॒ न प॑प्तू रघु॒या परि॑ज्मन् ॥ ४ ॥

प्र । सीं॒ । आ॒दि॒त्यः । अ॒सृ॒ज॒त् । वि॒ऽध॒र्ता । ऋ॒तं । सिंध॑वः । वरु॑णस्य । यं॒ति॒ ॥ न । श्रा॒म्यं॒ति॒ । न । वि । मु॒चं॒ति॒ । ए॒ते । वयः॑ । न । प॒प्तुः । र॒घु॒या । परि॑ऽज्मन् ॥ ४ ॥

विधर्ता सेतुरिव जलस्य विधारयितादित्योऽदितेः पुत्रो वरुण ऋतं विधारणहेतुभूतं सत्यं । यद्वा नदीनामुपादानभूतमुदकं सीं सर्वतः प्रासृजत् प्रकर्षेण सृष्टवान् । अणोऽप्रगृह्यस्यानुनासिक इत्याकारः सानुनासिकः । तेन वरुणस्यर्तेन सिंधवः स्यंदनशीला नद्यो यंति गच्छंति प्रवहंति । एते सिंधवो न श्राम्यंति श्रांतिं न प्राप्नुवंति न विमुचंति उपरता न भवंति । अनलसाः सर्वदैकरूप्येण प्रवहंतीत्यर्थः । एतदेवोच्यते । वयो न वयः पक्षिण इव रघुया रघवः शीघ्रगामिनः परिज्मन् परिज्मनि भूम्यां पप्तुः पतंति गच्छंति । पत्लृ गतौ । लिट्युसि तनिपत्योश्छंदसीत्युपधालोपः । स्थानिवद्भावाद्द्विर्वचनादि । रघुया इत्यत्र सुपां सुलुगिति जसो याजादेशः ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वि मच्छ्रथाय रशनामिवाग ऋध्याम ते वरुण खामृतस्य। मा तंतुश्छेदि वयतो धियं मे मा मात्रा शार्यपसः पुर ऋतोः ॥ ५ ॥

वि। मत्। श्रथय। रशनांऽइव। आगः। ऋध्याम। ते। वरुण। खाम्। ऋतस्य ॥ मा। तंतुः। छेदि। वयतः। धियं। मे। मा। मात्रा। शारि। अपसः। पुरा। ऋतोः ॥ ५ ॥

हे वरुण मत् मत्सकाशात् रशनामिव रज्जुमिवागो विहितानन्नुष्ठानजनितं पापं विश्रथय शिथिलीकुरु। विमोचयेत्यर्थः। ते त्वत्संबंधिन ऋतस्योदकस्य पूर्णां खां नदीं। खा इति नदीनाम। तामृध्याम लभेमहि। अपि च धियं कर्म वयतः संतन्वतो मे मम तंतुः कर्मसंततिर्मा छेदि छिन्नो मा भूत्। नैरंतर्येणेत्यर्थः। तथा ऋतोः समाप्तिकालात्पुरा पूर्वमपसः कर्मणो मात्रा शरीरं प्राच्योदीच्यांगलक्षणं मा शारि। शीर्णं विकलं मा भूत् ॥ शॄ हिंसायां। कर्मणि लुङ्। पुर ऋतोरित्यत्र ऋत्यक इति प्रकृतिभावः ॥

अपो सु म्यक्ष वरुण भियसं मत्सम्राळृतावोऽनु मा गृभाय। दामेव वत्साद्वि मुमुग्ध्यंहो न हि त्वदारे निमिषश्चनेशे ॥ ६ ॥

अपो इति। सु। म्यक्ष। वरुण। भियसं। मत्। संराट्। ऋतऽवः। अनु। मा। गृभाय ॥ दामऽइव। वत्सात्। वि। मुमुग्धि। अंहः। नहि। त्वत्। आरे। निऽमिषः। चना। ईशे ॥ ६ ॥

हे वरुण भियसं भयं मत् मत्तः सु सुष्टु अपो म्यक्ष। अपगमय। हे सम्राट् सम्यग्राजमान हे ऋतावः सत्यवन् यज्ञवन्वा वरुण मा मामनुगृभाय। अनुगृहाण ॥ छंदसि शायजपीति श्नः शायजादेशः। हृग्रहोर्भ इति भत्वं। अपि च दामेव वत्सात् यथा दोग्धा वत्ससकाशाद्बंधनीं रज्जुं विमुंचति तथांहः पापं मत्सकाशाद्विमुमुग्धि। विमुंच। छांदसः शपः श्लुः। पृथक्कुरु। त्वदारे त्वत्तो दूरदेशे वर्तमानः। त्वदन्य इत्यर्थः। त्वत्तोऽन्यः कश्चित् निमिषश्चन निमेषस्यापि अक्षिपक्ष्मचलनस्यापि नहीशे। नेष्टे। त्वमेवेश्वर इत्यर्थः। लोपस्त आत्मनेपदेष्विति तलोपः ॥

मानो वधैर्वरुण ये त इष्टावेनः कृण्वंतमसुर भ्रीणंति। मा ज्योतिषः प्रवसथानि गन्म वि षू मृधः शिश्रथो जीवसे नः ॥ ७ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मा । नः । वधैः । वरुण । ये । ते । इष्टौ । एनः । कृण्वंतं । असुर । भ्रीणंति ॥ मा । ज्योतिषः । प्रऽवसथानि । गन्म । वि । सु । मृधः । शिश्रथः । जीवसे । नः ॥ ७ ॥

हे वरुण नोऽस्मान् वधैर्हननसाधनैरायुधैर्मा हिंसीरिति शेषः । हे असुर पापकर्तां निरसितः ते त्वदीय इष्टौ यज्ञे एनो विहिताननुष्ठानेन जनितं पापं कृण्वंतं कुर्वंतं पुरुषं ये वधा भ्रीणंति हिंसंति तैरिति पूर्वत्र संबंधः ॥ भ्रीष् हिंसायां क्रैयादिकः । अपि च ज्योतिषो गृहे वर्तमानादग्नेः सौरप्रकाशाद्वा प्रवसथानि प्रवासान्मा गन्म मा गच्छाम । सर्वदा गृहे वर्तमानः सूर्यं पश्यंश्चिरकालं जीवेयमित्यर्थः ॥ गमेर्लुङि मंत्रे घसेति च्लेर्लुक् । तथा नोऽस्माकं जीवसे जीवनाय मृधो हिंसकान् सु सुष्ठु विशिश्रथः विश्लेषय । बाधस्वेत्यर्थः ॥

नमः पुरा ते वरुणोत नूनमुतापरं तुविजात ब्रवाम । त्वे हि कं पर्वते न श्रितान्यप्रच्युतानि दूळभ व्रतानि ॥ ८ ॥

नमः । पुरा । ते । वरुण । उत । नूनं । उत । अपरं । तुविऽजात । ब्रवाम ॥ त्वे इति । हि । कं । पर्वते । न । श्रितानि । अप्रऽच्युतानि । दुःऽदभ । व्रतानि ॥ ८ ॥

हे वरुण पुरा पूर्वस्मिन्काले ते तुभ्यं नमो नमस्कारप्रतिपादकं नम इति शब्दमवादिष्म । उत अपि च नूनमद्यापि ब्रवाम । उत अपि च हे तुविजात बहुषु प्रदेशेषु प्रादुर्भूत वरुणापरमागामिन्यपि काले नमःशब्दं ब्रवाम उच्चारयाम । कस्मादिति चेदुच्यते । दूळभ दुर्दभ दंभितुं हिंसितुमशक्य । दुरो दाशनाशदमध्येषु । पा० ६. ३. १०९. ५. । इति रेफस्योत्वमुत्तरपदादेः ष्टुत्वं च कमित्येतत्पादपूरणं ॥ हि यस्मात् त्वे त्वयि पर्वते न शिलोच्चय इवाप्रच्युतान्यन्यैः प्रच्यावयितुमशक्यानि व्रतानि कर्माणि विधरणानि श्रितानि आश्रितानि । तस्मादित्यर्थः ॥

परा ऋणा सावीरध मत्कृतानि माहं राजन्नन्यकृतेन भोजं । अव्युष्टा इन्नु भूयसीरुषास आ नो जीवान्वरुण तासु शाधि ९

परा । ऋणा । सावीः । अध । मत्ऽकृतानि । मा । अहं । राजन् । अन्यऽकृतेन । भोजं ॥ अविऽउष्टाः । इत् । नु । भूयसीः । उषसः । आ । नः । जीवान् । वरुण । तासु । शाधि ॥ ९ ॥

हे वरुण ऋणा ऋणानि पित्रादिभिः कृतान्यस्माभिर्देयानि परा सावीः परासुव पराचीनं प्रेरय । षू प्रेरणे छांदसो लुङ् । अध अधुना मत्कृतानि मया निष्पादि-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तानि ऋणानि परासुव । अपि च हे राजन् स्वामिन् वरुण अहमन्यकृतेनान्यैरर्जितेन धनेन मा भोजं भोगं मा लभेयं । किं कारणमिति चेदुच्यते । भूयसीर्भूयस्यो बहुतरा उषसोऽव्युष्टा इन्नु सत्यमव्युष्टा एव । अपररात्रेषूत्थाय ऋणानि चिंतयतो जाग्रतो मम व्युष्टा अप्यव्युष्टकल्पा आसन् । हे वरुण तासूषःसु नोऽस्मान् जीवान् जीवनवत आशाधि आ समंतादनुशिष्टान् कुरु । ऋणान्यपहृत्य भोगपर्याप्तं धनं प्रयच्छेत्यर्थः ॥

यो मे राजन्युज्यो वा सखा वा स्वप्ने भयं भीरवे मह्य-माह । स्तेनो वा यो दिप्सति नो वृको वा त्वं तस्माद्वरुण पाह्यस्मान् ॥ १० ॥

यः । मे । राजन् । युज्यः । वा । सखा । वा । स्वप्ने । भयं । भीरवे । मह्यं । आह ॥ स्तेनः । वा । यः । दिप्सति । नः । वृकः । वा । त्वं । तस्मात् । वरुण । पाहि । अस्मान् ॥ १० ॥

हे राजन् वरुण मे मदीयो युज्यो योजनसमर्थः पित्रादिर्वा सखा समानख्यानो बांधवो वा स्वप्ने दृष्टं त्वद्विषयं भयं भीरवे भयशीलाय मह्यं य आह ब्रूते । तथा स्तेनश्चौरो वा वृकोऽरण्यश्वा वा यो नोऽस्मान् दिप्सति जिघांसति ॥ सनीवंतर्धेति विकल्पनादिड्भावः । दंभ इच्चेतीत्वं । हे वरुण त्वं तस्मात्सर्वस्मादस्मान्पाहि रक्ष ॥

माहं मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः । मा रायो राजन्त्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः ११

मा । अहं । मघोनः वरुण । प्रियस्य । भूरिऽदाव्नः । आ । विदं । शूनं । आपे ॥ मा । रायः । राजन् । सुऽयमात् । अव । स्थां । बृहत् । वदेम । विदथे । सुऽवीराः ॥ ११ ॥

हे वरुण मघोनो धनवतः प्रियस्यानुकूलस्य भूरिदाव्नो भूरेर्बहुलस्य दातुराव्यस्याहं मा आविदं मावेदयानि आवेदनं विज्ञापनं मा करवाणि । किं तदनावेद्यं । आपेर्ज्ञातेः शूनं शून्यं दारिद्र्यं । वर्णलोपश्छांदसः । यद्वा शूनं गतं प्राप्तं दारिद्र्यं । टुओश्वि गतिवृद्ध्योः । श्वीदितो निष्ठायामितीट्प्रतिषेधः । यजादित्वात्संप्रसारणं । ओदितश्चेति नकारः । वृषादित्वादाद्युदात्तत्वं । एतदुक्तं भवति । अस्मदीयाः पुत्रादयः क्षुधिता इति प्रभुप्रभुसमीपेऽभिधाय याचमानो मा भूवमिति । हे राजन् सुयमात् । सुष्ठु नियम्यतेऽनेन पुरुषो गृह इति सुयमः ॥ ईषद्दुःसुष्विति खल् ॥ तादृशाद्रायो धनान्मा-वस्थां अवयुत्य स्थितो मा भूवं । वयं सुवीराः शोभनपुत्रा विदथे यज्ञे गृहे वर्तमानाः संतो बृहत् प्रौढं स्तोत्रं वदेम उच्चारयाम ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(मं० २ सू० ३८.)

९.

उदु ष्य देवः सविता सवाय शश्वत्तमं तदपा वह्निरस्थात् ।
नूनं देवेभ्यो वि हि धाति रत्नमथाभजद्वीतिहोत्रं स्वस्तौ ॥१॥

उत् । ऊं इति । स्यः । देवः । सविता । सवाय । शश्वत्ऽतमं । तत्ऽअपाः । वह्निः । अस्थात् ॥ नूनं । देवेभ्यः । वि । हि । धाति । रत्नं । अथ । आ । अभजत् । वीतिऽहोत्रं । स्वस्तौ ॥ १ ॥

स्यः स देवो द्योतमानः सविता सवाय लोकानां प्रसवायानुज्ञायै शश्वत्तमं प्रतिदिनमुदस्थात् उत्तिष्ठति । कीदृशः सविता । तदपाः तत्प्रसवकर्मा ॥ अपः अप्नः इति कर्मनामसु पाठात् । वह्निर्वोढा जगतां । किंच नूनं संप्रति देवेभ्यः स्तोतृभ्यो रत्नं धनं वि हि धाति प्रयच्छति । हीति पूरणे । अथ अपि च वीतिहोत्रं क्रांतयज्ञं यजमानं स्वस्तावविनाशे क्षेमे आअभजत् भागिनं करोतु । यद्यपि स्वस्तिशब्दो विभक्त्यंतनिर्दिष्टशब्दपरस्तथाप्यपर्यवसानादर्थपरो भवति ॥

विश्वस्य हि श्रुष्टये देव ऊर्ध्वः प्र बाहवा पृथुपाणिः सिसर्ति । आपश्चिदस्य व्रत आ निमृग्रा अयं चिद्वातो रमते परिज्मन् ॥ २ ॥

विश्वस्य । हि । श्रुष्टये । देवः । ऊर्ध्वः । प्र । बाहवा । पृथुऽपाणिः । सिसर्ति ॥ आपः । चित् । अस्य । व्रते । आ । निऽमृग्राः । अयं । चित् । वातः । रमते । परिऽज्मन् ॥ २ ॥

देवो द्योतमानः सविता पृथुपाणिर्महाकारो विश्वस्य श्रुष्टये जगतः सुखायोर्ध्वं उद्गतः सन् बाहवा बाहू प्रसिसर्ति प्रसारयति । आपश्चित् आपोऽप्यस्य व्रते प्रसवाख्ये कर्मणि सति । व्रतं कर्वरमिति तन्नामसु पाठात् । आ स्यंदंत इति शेषः । ताश्च निमृग्रा नितरां शोधयित्र्यो गंगादिरूपेण जगत्पावयंतीत्यर्थः । अयं चिद्वातोऽयमपि वायुः परिज्मन् परितो गते व्याप्तेंऽतरिक्षे रमते ॥

आशुभिश्चिद्यान्वि मुंचाति नूनमरीरमदतमानं चिदेतोः ।
अह्यर्षूणां चिन्न्ययाँ अविष्यामनु व्रतं सवितुर्मोक्यागात् ॥३॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

आशुऽभिः । चित् । यान् । वि । मुचाति । नूनं । अरीरमत् । अतमानं । चित् । एतोः ॥ अह्यर्षूणां । चित् । नि । अयान् । अविष्यां । अनु । व्रतं । सवितुः । मोकी । आ । अगात् ॥ ३ ॥

यान् गच्छन् सविता आशुभिश्चिच्छीघ्रगामिभिरपि रश्मिभिर्विमुचाति विमुच्यते । नूनमिति पूरणः । अतमानं चित्सततं गच्छंतमपि जनमेतोर्गमनादरीरमत् उपरमयति । किंच अह्यर्षूणांचित् । अहिमाहंतारं शत्रुमर्षत्यभिगच्छंतीत्यह्यर्षवः । तेषामप्यविष्यां गमनेच्छां न्ययान् नियच्छति । सवितुः प्रेरकस्य सूर्यस्य व्रतं कर्मानु पश्चान्मोकी रात्रिः । मोकी शोकीति रात्रिनामसु पाठात् । आगात् आगच्छति । सवितुश्चेष्टोपरतौ रात्रिरागच्छतीति यावत् ॥

पुनः समव्यद्विततं वयंती मध्या कर्तोर्न्यधाच्छक्म धीरः। उत्संहायास्थाद्व्यृ१तूँरदर्धररमतिः सविता देव आगात्॥४॥

पुनरिति । सं । अव्यत् । विऽततं । वयंती । मध्या । कर्तोः । नि । अधात् । शक्म । धीरः ॥ उत् । संऽहाय । अस्थात् । वि । ऋतून् । अदर्धः । अरमतिः । सविता । देवः । आ । अगात् ॥ ४ ॥

वयंती वस्त्रं वयंती नारीव रात्रिर्विततमालोकं पुनः समव्यत् संवेष्टयते । पुनःशब्दः पूर्वेद्युरप्येवमकार्षीदिति द्योतयति । धीरः प्राज्ञोऽपि सर्वो लोकः कर्तोः क्रियमाणं कर्म । कर्तोः कर्तवा इति तन्नामसु पाठात् । शक्म कर्तुं शक्यमपि मध्या मध्य उपक्रांतं कर्मापरिसमाप्येत्यर्थः । न्यधात् निहितवान् । सवितर्युपरत इति शेषः । सर्वो लोकः संहाय शय्यां विहायोदस्थात् अवशिष्टं कर्म कर्तुं पुनरुत्तिष्ठति । संपूर्वो जहातिः शय्यापरित्यागे वर्तते । तथा च श्रूयते । कलिः शयानो भवति संजिहानस्तु द्वापर इति । सविता सर्वस्य प्रसविता सूर्योऽरमतिरनुपरतिर्देवो द्योतमान आगात् आगच्छति । उदेतीति यावत् । ऋतून् कालविशेषांश्च व्यदर्धः विदारयति ॥

नानौकांसि दुर्यो विश्वमायुर्वि तिष्ठते प्रभवः शोको अग्नेः । ज्येष्ठं माता सूनवे भागमाधादन्वस्य केतमिषितं सवित्रा ॥ ५ ॥

नाना । ओकांसि । दुर्यः । विश्वं । आयुः । वि । तिष्ठते । प्रऽभवः । शोकः । अग्नेः ॥ ज्येष्ठं । माता । सूनवे । भागं । आ । अधात् । अनु । अस्य । केतं । इषितं । सवित्रा ॥ ५ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रभवः प्रभूतोऽग्नेः शोकस्तेजो दुर्यो गृह्यो गृहे भवो नानौकांसि यजमानानां पृथग्भूतान्गृहान्वितिष्ठते अधितिष्ठति । विश्वमायुः सर्वमन्नं चाधितिष्ठति । आयुः सूनृतेत्यन्ननामसु पाठात् । मातोषाः सवित्रान्विधितं प्रेषितमस्य केतं प्रज्ञापकमग्नेर्ज्येष्ठं प्रथममग्निहोत्राख्यं भागं सूनवेऽग्नय आधात् आदधाति ॥

समाववर्ति विष्ठितो जिगीषुर्विश्वेषां कामश्चरतामभूत् ।
शश्वाँ अपो विकृतं हित्व्यागादनु व्रतं सवितुर्दैव्यस्य ॥ ६ ॥

सम्ऽआववर्ति । विऽस्थितः । जिगीषुः । विश्वेषां । कामः । चरतां । अमा । अभूत् ॥ शश्वान् । अपः । विऽकृतं । हित्वी । आ । अगात् । अनु । व्रतं । सवितुः । दैव्यस्य ॥ ६ ॥

जिगीषुर्विजयेच्छुर्योद्धा विष्ठितो युद्धार्थं प्रस्थितः समाववर्ति समावर्तयति । विश्वेषां सर्वेषां चरतां जंगमानाममा । अमा दम इति गृहनामसु पाठात् । गृहं प्रति कामोऽभूत् भवति । शश्वान् नित्यं कर्मरतोऽपः कर्म विकृतमर्द्धकृतं हित्वी हित्वागात् गृहमागच्छति । एतत्सर्वं दैव्यस्य दिवि भवस्य सवितुः प्रेरकस्य सूर्यस्य व्रतमस्तमयाख्यं कर्मानु जायत इत्यर्थः ॥

त्वया हितमप्यमप्सु भागं धन्वान्वा मृगयसो वि तस्थुः ।
वनानि विभ्यो नकिरस्य तानि व्रता देवस्य सवितुर्मिनंति ७

त्वया । हितं । अप्यं । अप्ऽसु । भागं । धन्व । अनु । आ । मृगयसः । वि । तस्थुः ॥ वनानि । विऽभ्यः । नकिः । अस्य । तानि । व्रता । देवस्य । सवितुः । मिनंति ॥ ७ ॥

हे सवितस्त्वयाप्स्वंतरिक्षे । आपः पृथिवीत्यंतरिक्षनामसु पाठात् । जलाधारे वा हितं निहितमप्यमपां संबंधिनं भागं धन्वानु निर्जलप्रदेशेष्वरण्येषु मृगयसो मृगयमाणा मृगा आ समंताद्वितस्थुः अधितिष्ठंति । किंच वनानि वृक्षा विभ्यः पक्षिभ्य आवासादिरूपेण त्वया भागो दत्तः । अस्य देवस्य सवितुस्तानि तादृशानि व्रता व्रतानि कर्माणि नकिर्मिनंति केऽपि न हिंसंति ॥

याद्राध्यं वरुणो योनिमप्यमनिशितं निमिषि जर्भुराणः ।
विश्वो मार्तांडो व्रजमा पशुर्गात्स्थशो जन्मानि सविता व्याकः ॥ ८ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यात्ऽराध्यं । वरुणः । योनिं । अप्यं । अनिऽशितं । निऽमिषि । जर्भुराणः ॥ विश्वः । मार्तांडः । व्रजं । आ । पशुः । गात् । स्थऽशः । जन्मानि । सविता । वि । आ । अकरित्यकः ॥ ८ ॥

वरुणो याद्राध्यं यातां गच्छतां राध्यं राधनीयमप्यमाप्तुं योग्यमनिशितमतीक्ष्णं । सुखकरमिति यावत् । योनिं स्थानं निमिषि निमेषे सवितुरस्तमये सति विश्रमार्थं प्राणिभ्यः प्रयच्छति । वरुणस्य रात्रेर्निर्वाहकत्वात् । जर्भुराणो भृशं गच्छन् विश्वः सर्वो मार्तांडो मृताद्भिन्नादंडादुत्पद्यमानः पक्ष्यागात् आगच्छति । विश्वः पशुरपि व्रजं गोष्ठमागात् । सविता प्रेरकः स्थशः स्थाने स्थाने जन्मानि जातानि भूतानि व्याकः पृथगकार्षीत् ॥

न यस्येंद्रो वरुणो न मित्रो व्रतमर्यमा न मिनंति रुद्रः । नारातयस्तमिदं स्वस्ति हुवे देवं सवितारं नमोभिः ॥ ९ ॥

न । यस्य । इंद्रः । वरुणः । न । मित्रः । व्रतं । अर्यमा । न । मिनंति । रुद्रः ॥ न । अरातयः । तं । इदं । स्वस्ति । हुवे । देवं । सवितारं । नमःऽभिः ॥ ९ ॥

यस्य सवितुर्देवस्य व्रतं प्रसवाख्यं कर्मेंद्रो न मिनाति न हिनस्ति । वरुणश्च न मिनाति । मित्रश्चार्यमा च न मिनाति । रुद्रश्च न मिनाति । अरातयोऽसुराश्च न मिनंति मिनातीति श्रुतमाख्यातं यथायोगं विपरिणामेन प्रत्येकमभिसंबध्यते । तं सवितारं सर्वस्य प्रेरकं देवं द्योतमानमिदमिदानीं नमोभिरन्नरूपैर्हविर्भिः सह । नमः आयु-रित्यन्ननामसु पाठात् । स्वस्ति क्षेमाय हुवे स्तौमि ॥

भगं धियं वाजयंतः पुरंधिं नराशंसो ग्नास्पतिर्नो अव्याः । आये वामस्य संगथे रयीणां प्रिया देवस्य सवितुः स्याम १०

भगं । धियं । वाजयंतः । पुरंऽधिं । नराशंसः । ग्नाः । पतिः । नः । अव्याः ॥ आऽअये । वामस्य । संऽगथे । रयीणां । प्रियाः । देवस्य । सवितुः । स्याम ॥ १० ॥

भगं भजनीयं धियं ध्यातव्यं पुरंधिं पुरस्य धारयितारं बहुप्रज्ञं वा सवितारं । पुरंधिर्बहुधिरिति यास्कः । वाजयंतो वाजिनं बलिनं कुर्वंतः । विभक्तिव्यत्ययः । नः स्तुवतोऽस्मान् नराशंसो नरैः शंसनीयो ग्नास्पतिर्देवपत्नीनां पतिश्छंदसा पतिर्वा । तथा च श्रूयते । छंदांसि वै ग्ना इति उत ग्ना व्यंतु देवपत्नीरिति च । सविता व्याः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अव्यात् । किंच वामस्य धनस्य रयीणां पशूनां च । तथा च श्रूयते । पशवो वै रयिरिति । आय आगमने संगथे संगमने च निमित्ते देवस्य द्योतमानस्य सवितुः प्रेरकस्य वयं प्रियाः स्याम भवेम ॥

अस्मभ्यं तद्दिवो अद्भ्यः पृथिव्यास्त्वया दत्तं काम्यं राध आ गात् । शं यत्स्तोतृभ्य आपये भवात्युरुशंसाय सवितर्जरित्रे ॥ ११ ॥

अस्मभ्यं । तत् । दिवः । अत्ऽभ्यः । पृथिव्याः । त्वया । दत्तं । काम्यं । राधः । आ । गात् ॥ शं । यत् । स्तोतृऽभ्यः । आपये । भवाति । उरुऽशंसाय । सवितः । जरित्रे ॥ ११ ॥

हे सवितः अस्मभ्यं त्वया दत्तं तत् प्रसिद्धं काम्यं कमनीयं राधो धनं दिवो द्युलोकात् अद्भ्योऽन्तरिक्षलोकात् पृथिव्या भूमेश्चागात् आगच्छतु । किंच स्तोतृभ्यः स्तोतॄणामापये बंधवे तद्वंशजाय यद्धनं शं सुखकरं भवाति भवेत् उरुशंसाय बहुस्तुतये जरित्रे स्तोत्रे मह्यं । जरिता कारुरिति स्तोतृनामसु पाठात् । हे सवितः तत्प्रयच्छ ॥

(मं० ३ सू० ९.)

१०.

सखायस्त्वा ववृमहे देवं मर्तास ऊतये । अपां नपातं सुभगं सुदीदितिं सुप्रतूर्तिमनेहसं ॥ १ ॥

सखायः । त्वा । ववृमहे । देवं । मर्तासः । ऊतये ॥ अपां । नपातं । सुऽभगं । सुऽदीदितिं । सुऽप्रतूर्तिं अनेहसं ॥ १ ॥

विश्वामित्रः स्तौति । हे अग्ने सखायः सोमाज्यादिहविःप्रदानेनोपकारकत्वान्मित्राणि मर्तासो मनुष्या ऋत्विजो वयमपांनपातमपां नप्तारं सुभगं शोभनधनयुक्तं सुदीदितिं शोभनदीप्तिं सुप्रतूर्तिं शोभनप्रतरणं कर्मानुष्ठातृभिः सुखेन गंतव्यमनेहसमुपद्रवरहितमेतादृशं देवं त्वामूतये रक्षणाय ववृमहे वृणीमहे । सखायः । ख्या प्रकथने । समाने ख्यश्चोदात्त इति समान उपपदे डिदित्यनुवृत्तौ ख्यातेरिण् । तस्य डित्त्वाट्टिलोपः । तत्संनियोगेन यलोपः । समानस्य छंदस्यमूर्द्धेति सभावः । उ-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पपदस्योदात्तत्वं । णिदित्यनुवृत्तौ सख्युरसंबुद्धौ । पा० । ७. २. ५२. । इति णिद्वद्भावः । वृद्ध्यायादेशौ । आद्युदात्तः । ववृमहे । वृङ् संभक्तौ । छंदसि लुङ्लङ्लिट इति वर्तमाने लिट् । क्रादित्वादिडभावः । निघातः । ऊतये । अव रक्षण इत्यस्य उदात्त इत्यनुवृत्तावूतियूतीत्यादिना क्तिन्नंतत्वेन निपातनादंतोदात्तः । अपां । ऊडिदमिति विभक्तेरुदात्तत्वं । सुभगं । आद्युदात्तं द्व्यच् छंदसीत्युत्तरपदाद्युदात्तत्वं । सुप्रतूर्तिं । क्त्वादयश्चेत्युत्तरपदाद्युदात्तत्वं ॥

कायमानो वना त्वं यन्मातॄरजंगन्नपः । न तत्ते अग्ने प्रमृषे निवर्तनं यद्दूरे सन्निहाभवः ॥ २ ॥

कायमानः । वना । त्वं । यत् । मातॄः । अजंगन् । अपः ॥ न । तत् । ते । अग्ने । प्रऽमृषे । निऽवर्तनं । यत् । दूरे । सन् । इह । अभवः ॥ २ ॥

हे अग्ने वना काननानि रक्षितुं कायमानः कामयमानस्त्वं यद्यस्मात्कारणात्तानि विहाय मातृरपो मातृभूता अपोऽजगन् अगमः गतवानसि अप्सु प्रविष्टत्वाच्छांतो वर्तसे । तत्तस्मात्ते तव निवर्तनं नितरां तत्रैव वर्तनं । तेन च विनाशो लक्ष्यते । स विनाशो न प्रमृषे न प्रमृष्यते न सह्यते । कुत इत्यत आह । यद्यस्मात्कारणाद्दूरे सन् अदृश्यतया वर्तमानस्त्वमिहास्मत्संबंधिष्वरणिरूपेषु काष्ठेष्वभवः मंथनात् क्षणमात्रेणास्माकं समीपे भवसि । तस्मात्तव दूरतो वर्तनमस्मभ्यं न रोचते । अस्मिन्नर्थे यास्कः । कायमानश्चायमानः कामयमान इति वा । वनानि त्वं यन्मातॄरपोजगन् उपशाम्यन् । न तत्ते अग्ने प्रमृष्यते निवर्तनं दूरे यत्सन्निह भवसि जायमानः । नि० ४. १४. । इति ॥ कायमानः । कमु कांतौ । कमेर्णिङ् । लटः शानच् । मकारलोपश्छांदसः । अजगन् । गम्लृ गतावित्यस्य लङि बहुलं छंदसीति शपः श्लुः । हल्ङ्यादिना सिलोपः । मो नो धातोरिति नकारः । यच्छब्दयोगादनिघातः । अडागमस्वरः । प्रमृषे । मृष तितिक्षायां । व्यत्ययेन कर्मणि तप्रत्ययः । लोपस्त आत्मनेपदेष्विति तलोपः । धातुस्वरः । अभवः छंदसि लुङ्लङ्लिट इति लडर्थे लङ् यद्योगादनिघातः ॥

अतिं तृष्टं ववक्षिथाथैव सुमना असि । प्रप्रान्ये यंति पर्यन्य आसते येषां सख्ये असि श्रितः ॥ ३ ॥

अतिं । तृष्टं । ववक्षिथ । अथ । एव । सुऽमनाः । असि ॥ प्रऽप्र । अन्ये । यंति । परि । अन्ये । आसते । येषां । सख्ये । असि । श्रितः ॥ ३ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

हे अग्ने तृष्टं स्तोतुस्तृष्णाभिलाषं तदुचितफलप्रदानेन सफलं कर्तुमतिववक्षिथ अतिशयेन वोढुमिच्छसि । अथैव अथापि त्वं सुमना असि संतुष्टमनस्को वर्तसे । किंच त्वं येषां षोडशानामृत्विजां सख्ये मैत्र्ये श्रितोऽसि वर्तसे तेषां मध्येऽन्येऽध्वर्युप्रभृतयो द्वादशर्त्विजः प्रयंति प्रकर्षेण होतुं गच्छंति । अन्य उद्गातृप्रभृतयश्चत्वारः पर्यासते परित आसीना वर्तंते ॥ ववक्षिथ । वह प्रापण इत्यस्य सनि रूपं । अभ्यासस्य सन्यत इतीत्वाभावश्छांदसः । तदंताद्वर्तमाने लिट् । थल आर्द्धधातुकस्येड्वलादेरितीट् । कास्प्रत्ययादामित्याम् न भवति । मंत्रत्वात् निघातः । प्रप्र । प्रसमुपोद इति द्विर्वचनं । यंति । इण् गताविलस्य लटि रूपं । एकान्याभ्यां समर्थाभ्यामित्यन्यशब्दयोगात्पूर्वस्य निघाताभावः । आसते । आस उपवेशने । उत्तरत्वान्निघातः । असि । अस् भुवि । तासस्त्योर्लोपः इति सकारलोपः । यद्वृत्तयोगान्न निहन्यते ॥

ई॒यि॒वांस॒मति॒ स्रिधः॒ शश्व॑तीरति॑ स॒श्चतः॑ । अन्वी॑मविंदन्नि॒चि॒रासो॑ अ॒द्रुहो॒ऽप्सु सिं॒हमि॑व श्रि॒तं ॥ ४ ॥

ई॒यि॒ऽवांसं॑ । अति॑ । स्रिधः॑ । शश्व॑तीः । अति॑ । स॒श्चतः॑ ॥ अनु॑ । ई॒ । अविं॑द॒न् । नि॒ऽचि॒रासः॑ । अ॒द्रुहः॑ । अ॒प्ऽसु । सिं॒हंऽइ॑व । श्रि॒तं ४

हे अग्ने अद्रुहोऽद्रोग्धारो निचिरासो नितरां चिरासश्चिरंतना विश्वेदेवाः स्रिधः शोषकाञ्छत्रून्वलेनातिक्रम्येयिवांसं गच्छंतं शश्वतीर्वह्वीः सश्चतः संगतिकारिणीः सेनाश्चात्यतिक्रम्य गच्छन्तमप्सु श्रितं तिरोहितमत एव सिंहमिव गुहाप्रविष्टं सिंहमिव भीममीमेनं त्वामन्वविंदन् अनुगम्यालभंत ॥ ईयिवांसं । इण् गताविलस्य क्वसावुपेयिवाननाश्वाननूचानश्च । पा० ३. २. १०९. । इति निपातितः । प्रत्ययस्वरः । स्रिधः । स्रिधेः क्षयार्थस्य शोषणार्थस्य वा क्विप् चेति क्विप् । धातुस्वरः । सश्चतः । षस्ज गतौ । जकारस्य व्यत्ययेन चकारः । लटः शत्रादेशः । प्रत्ययस्वरः । अविंदन् । विद्लृ लाभ इत्यस्य लङि रूपं । निचिरासः नितरां चिराः । आज्जसेरसुगित्यसुक् । समासस्वरः । अद्रुहः द्रुह जिघांसायां । संपदादित्वाद्भावे क्विप् । बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । श्रितं । श्रिञ् सेवायामित्यस्य श्र्युकः कितीतीट्प्रतिषेधः । प्रत्ययस्वरः ॥

स॒सृ॒वांस॑मिव॒ त्मना॒ग्निमि॒त्था ति॒रोहि॑तं । ऐनं॑ नयन्मात॒रिश्वा॑ परा॒वतो॑ दे॒वेभ्यो॑ मथि॒तं परि॑ ॥ ५ ॥

स॒सृ॒वांसं॑ऽइव । त्मना॑ । अ॒ग्निं । इ॒त्था । ति॒रःऽहि॑तं ॥ आ । ए॒नं॒ । न॒य॒त् । मा॒त॒रिश्वा॑ । प॒रा॒ऽवतः॑ । दे॒वेभ्यः॑ । म॒थि॒तं । परि॑ ॥ ५ ॥

मातरिश्वा वायुरित्थेत्थं त्मना स्वेच्छयाप्सु प्रवेशेन तिरोहितं निलीनं परि प-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

रितो मथितं मंथनेन निष्पादितमेनमग्निं देवेभ्यः । तादर्थ्ये चतुर्थी । देवार्थं परावतो दूरदेशादानयत् आनीतवान् । तत्र दृष्टांतः । ससृवांसमिव यथा स्वाच्छंद्येन ससृवांसं सरंतं गच्छंतं पुत्रं पिता बलादानयति तद्वत् ससृवांसमिव । सृ गताविल्यस्माल्लिट् तस्य क्वसुः । इवेन विभक्त्यलोप इत्युक्तत्वात्प्रत्ययस्वरः । त्मना । आत्मन्शब्दस्य मंत्रेष्वाङ्यादेरात्मन इत्याकारलोपः । इत्था । था हेतौ च छंदसीति व्यत्ययेन थाप्रत्ययः । प्रत्ययस्वरः । एनं । अन्वादेशे द्वितीयाटौःस्वेन इत्येनादेशः अनुदात्तश्च । नयत् । णीञ् प्रापण इत्यस्य लङि रूपं । अडभावश्छांदसः । मातरिश्वा मातर्यंतरिक्षे श्वसितीति श्वन्नुक्षन्नित्यादिना निपातितः ॥

तं त्वा मर्ता अगृभ्णत देवेभ्यो हव्यवाहन । विश्वान्यद्यज्ञाँ अभिपासि मानुष तव क्रत्वा यविष्ठ्य ॥ ६ ॥

तं । त्वा । मर्ताः । अगृभ्णत । देवेभ्यः । हव्यऽवाहन ॥ विश्वान् । यत् । यज्ञान् । अभिऽपासि । मानुष । तव । क्रत्वा । यविष्ठ्य ॥ ६ ॥

हे हव्यवाहन हव्यानां वोढर्हे अग्ने मर्ता मनुष्या अध्वर्युप्रभृतयस्तं तादृशमप्सु तिरोहितं त्वा त्वां देवेभ्यो यष्टव्यदेवतार्थमगृभ्णत अगृह्णत । मानुष मनुष्याणां हितकारिन्यविष्ठ्य युवतम हे अग्ने तव क्रत्वाकर्मणा माहात्म्येन विश्वान्सर्वानस्माभिः क्रियमाणान्यज्ञान्यद्यस्मात्कारणादभिपासि सर्वतः पालयसि तस्मात्त्वामगृह्णतेति पूर्वेणान्वयः ॥ अगृभ्णत । ग्रह उपादाने । क्र्यादित्वात्श्ना । ग्रहिज्यावयीति संप्रसारणं । हृग्रहोर्भश्छंदसीति हकारस्य भकारः । तिङ्ङतिङ इति निघातः । हव्यवाहन । वह प्रापण इति धातोर्ल्युडित्यनुवृत्तौ हव्येऽनंतः पादमिति ल्युट् । उपधावृद्धिः । योरनादेशः । अपादादित्वादाष्टमिकमनुदात्तत्वं । विश्वान् । विश प्रवेशन इत्यस्मादशिप्रुषिलटिरणिकणिखदिविशिभ्यः क्वन्निति क्वन् । कित्त्वाद्गुणाभावः । नित्वादाद्युदात्तत्वं । अभिपासि । पा रक्षणे । अस्य धातो रक्षणार्थत्वान्न पिबादेशः । यच्छब्दयोगान्न निघातः । धातुस्वरः । क्रत्वा । टा । जसादयश्छंदसि विकल्प्यंत इत्यत्र नादेशाभावः । यणादेशः । प्रत्ययस्वरः । यविष्ठ्य । युवशब्दादसिशायने तमबिष्ठनावितीष्ठन् । स्थूलदूरयुवेति यणादिपरं लुप्यते पूर्वस्य च गुणः । वस्वादित्वात्स्वार्थिको यप्रत्ययः ॥

तद्भद्रं तव दंसना पाकाय चिच्छदयति । त्वां यदग्ने पशवः समासते समिद्धमपिशर्वरे ॥ ७ ॥

तत् । भद्रं । तव । दंसना । पाकाय । चित् । छदयति ॥ त्वां । यत् । अग्ने । पशवः । संऽआसते । संऽइद्धं । अपिऽशर्वरे ॥ ७ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

हे अग्ने तव संबंधि तदिदं भद्रं शोभनं दंसनाग्निहोत्रादिकं कर्म पाकाय चित् । चिच्छब्दोऽप्यर्थे । पाकायेति कर्मणि चतुर्थी । पाकोर्भकः । तद्वदज्ञमपि यजमानं छदयति स्वफलप्रदानेन पूजयति । पशुपुत्रादिभिः परिवृतं करोतीत्यर्थः । छदयतिशब्दोऽर्चतिकर्मा ॥ छंदयति छदयतीति तन्नामसु पाठात् । यद्वा । पाकशब्दः प्रशस्यं वक्ति । पाको वाम इति प्रशस्यनामसु पठितत्वात् । तद्भद्रं कर्म प्रशस्यं यजमानमभिमतफलप्रदानेन पूजयतीत्यर्थः । यद्यस्मात्कारणादपिशर्वरे शर्वरीमुखेऽग्निविहरणकाल एव समिद्धं दीप्यमानं त्वां पशवो द्विपदाश्चतुष्पदाश्चोभये पशवः समासते सम्यगासते । पर्युपासत इत्यर्थः । तदिदं पश्वादिलक्षणं फलं यजमानाय प्रयच्छतीत्यर्थः ॥ भद्रं । भदि कल्याण इत्यस्माद्धातोरुपरि रक्प्रत्ययेन निपातनादंतोदात्तत्वं । पाकाय पा रक्षण इत्यस्मादिण्भीकापाशलेत्यादिना कन् । पायते रक्ष्यते राजादिनेति पाकः । नित्वादाद्युदात्तः । छदयति । छद अपवारणे । स्वार्थे णिच् । अदंतत्वाद्वृद्ध्यभावः । निघातः । समासते । आस उपवेशने । अदादित्वाच्छपो लुक् । अनकारांतत्वाज्झस्यादादेशः । यद्योगादनिघातः । तिङि चोदात्तवतीति गतेर्निघातः । धातुस्वरः ॥

आ जुहोता स्वध्वरं शीरं पावकशोचिषं । आशुं दूतमजिरं प्रत्नमीड्यं श्रुष्टी देवं सपर्यत ॥ ८ ॥

आ । जुहोत । सुऽअध्वरं । शीरं । पावकऽशोचिषं ॥ आशुं । दूतं । अजिरं । प्रत्नं । ईड्यं । श्रुष्टी । देवं । सपर्यत ॥ ८ ॥

ऋत्विजो यजमानः प्रेरयति । हे ऋत्विजः पावकशोचिषं शोधकदीप्तिं शीरं काष्ठेष्वोषधीषु चानुशायिनं स्वध्वरं शोभनयज्ञोपेतमिममग्निमा जुहोत आहुतिभिरा समंतात्तर्पयत । अपि च । आशुं कर्मणि व्याप्तं दूतमाह्वानकारित्वेन देवानां दूतमजिरं क्षिप्रं गंतारं प्रत्नं पुरातनमीड्यं स्तोतव्यं देवं द्योतमानमिममग्निं श्रुष्टी सपर्यत । श्रुष्टीति क्षिप्रनामेति यास्कः । क्षिप्रं पूजयत ॥ जुहोत । हु दानादनयोः । अस्माद्धातोर्लोट् । जुहोत्यादिभ्यः श्लुरिति शपः श्लुः । श्लाविति द्विर्वचनं । लोटो लङ्वदिति लङ्वद्भावे तस्थस्थमिपामिति थस्य तादेशः । छंदसीत्यनुवृत्तौ तस्य तप्तनप्तनथनाश्चेति तबादेशः । पित्त्वाद्गुणः । निघातः स्वध्वरं । बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । शीरं । शीङ् स्वप्ने । अस्माद्धातोः स्फायितंचिवंचीत्यादिना रक्प्रत्ययः । कित्त्वाद्गुणाभावः । प्रत्ययस्वरः । पावकशोचिषमित्यत्र पवनं पावः शुद्धिः तं कायतीति पावकः । आतोऽनुपसर्गेकः । प्रत्ययस्वरः । बहुव्रीहौ प्रकृत्या पूर्वपदमिति पूर्वपदप्रकृतिस्वरत्वं । आशुं । अशू व्याप्तौ । अस्माद्धातोः कृवापाजिमीत्यादिना उण् । उपधावृद्धिः । प्रत्ययस्वरः । अजिरं । अज गतिक्षेपणयोरित्यस्माद्धातो-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

रजिरशिशिरशिथिलेति किरच् । प्रत्ययांतत्वेन निपातनादंतोदात्तत्वं । प्रत्नं प्रगस्य छंदसि गलोपश्च । पा० ४. ३. २३. २. । इति गलोपः । चकारात् त्नप्रत्ययः । प्रत्ययस्वरः । ईड्यं । ईड स्तुतौ अस्माण्ण्यत् । ईडवंदेत्यादिनाद्युदात्तत्वं । सपर्यत । सपरशब्दात्कंड्वादिभ्यो यक् पूजायां वर्तते । लोण्मध्यमपुरुषबहुवचनं । शप् । अतो गुण इति पूर्वरूपत्वं । निघातः ॥

त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन् । औक्षन्घृतैरस्तृणन्बर्हिरस्मा आदिद्धोतारं न्यसादयंत ९

त्रीणि । शता । त्री । सहस्राणि । अग्निं । त्रिंशत् । च । देवाः । नव । च । असपर्यन् ॥ औक्षन् । घृतैः । अस्तृणन् । बर्हिः । अस्मै । आत् । इत् । होतारं । नि । असादयंत ॥ ९ ॥

त्रीणि शता त्रीणि शतानि त्री सहस्राणि त्रीणि सहस्राणि त्रिंशच्च नव चैकोनचत्वारिंशदधिकशतत्रयोपेतत्रिसहस्रसंख्याका देवा इममग्निमसपर्यन् अपूजयन् । किंच ते देवा घृतैरिममग्निमौक्षन् असिंचन् । अथास्मा अग्नये तदर्थं बर्हिरस्तृणन् बर्हिषास्तरणं वेद्याच्छादनमकुर्वन् । आदिदनंतरमेव ते देवास्तस्मिन्बर्हिष्येनमग्निं होतारं कृत्वा न्यसादयंत उपावेशयन् । देवैः पूज्यमिममग्निं सपर्यतेति पूर्वेणान्वयः । देवसंख्या च बृहदारण्यकेऽभिहिता । महिमानमेवैषामेते त्रयस्त्रिंशत्त्वेव देवा इति । कतमे ते त्रयस्त्रिंशदष्टौ वसव एकादश रुद्रा द्वादशादित्यास्त एकत्रिंशदिंद्रश्चैव प्रजापतिश्च त्रयस्त्रिंशत् । बृ० आ० ३. ९. । इति ॥ शता । दशानां दशतां शभावस्तश्च प्रत्ययः । दश दशतः परिमाणमेषां शतानि । सुपां सुलुगित्यादिना सुपो डादेशः । प्रत्ययस्वरः । त्री । सुपां सुलुगिति पूर्वसवर्णदीर्घः फिट्स्वरः । सहस्राणि । कर्दमादित्वान्मध्योदात्तः । त्रिंशत् । त्रयाणां दशतां त्रिन्भावः शच्च प्रत्ययः । त्रयोदशतः परिमाणमस्य त्रिंशत् । प्रत्ययस्वरः । नव कनिन्नित्यनुवृत्तौ णु स्तुतावित्यस्माद्धातोर्णुदंशोर्नुदश्चेति कनिन् गुणश्च । नित्त्वादाद्युदात्तः । असपर्यन् । लङ्रूपं । निघातः । औक्षन् उक्ष सेचने । लङि आडजादीनामित्याडागमः । वृद्धिः । पादादित्वान्न निहन्यते । आगमस्वरः । अस्तृणन् । स्तृञ् आच्छादने । लङ् बहुवचने क्र्यादित्वाच्छ्ना । झेरंतादेशः नित्यं ङित इतीकारलोपः संयोगांतलोपः श्नाभ्यस्तयोरात इत्याकारलोपः । लुङ्लङ्लृङ्क्ष्वित्यडागमः । स चोदात्तः । आगमस्वरः । वाक्येत्यनुवृत्तौ चादित्वान्निघाताभावः । बर्हिः । इसिरित्यनुवृत्तौ बृंहेर्नलोपश्चेतीसिः तत्संनियोगेन नलोपः । प्रत्ययस्वरः । असादयंत । षद्लृ विशरणगत्यवसादनेषु । अस्माद्धेतुमति चेति णिच् । उपधावृद्धिः । णिचश्चेत्यात्मनेपदं । लङि बहुवचने रूपं । निघातः ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(मं० ३ सू० ३२.)

११.

**इंद्र सोमं सोमपते पिबेमं माध्यंदिनं सवनं चारु यत्ते ।
प्रप्रुथ्या शिप्रे मघवन्नृजीषिन्विमुच्या हरी इह मादयस्व १**

इंद्र । सोमं । सोमऽपते । पिब । इमं । माध्यंदिनं । सवनं । चारु । यत् । ते ॥ प्रऽप्रुथ्य । शिप्रेइति । मघऽवन् । ऋजीषिन् । विऽमुच्य । हरी इति । इह । मादयस्व ॥ १ ॥

विश्वामित्रो ब्रूते । सोमपते सोमस्याधिपते हे इंद्र इममस्माभिर्माध्यंदिने सवने क्रियमाणं सोमं सोमरसं पिब । यद्यस्मात्ते त्वदर्थं क्रियमाणं माध्यदिनं मध्यदिनसंबंधि सवनं निष्केवल्याख्यं शस्त्रं चारु रमणीयं वर्तते । मघवन् धनवन् ऋजीषिन् । ऋजीषशब्देन गतसारं सोमद्रव्यमुच्यते । तद्वन् हे इंद्र हरी रथे योजितावश्वौ रथाद्विमुच्य शिप्रे हनू प्रप्रुथ्यात्रत्येन ग्रासेन पूरयित्वेह देवयजनदेशे मादयस्व तावश्वौ हर्षय ॥ प्रप्रुथ्य । प्रोथृ पर्याप्तावित्यस्य ल्यपि रूपं ह्रस्वश्छांदसः । लित्स्वरः । ऋजीषिन् । अर्ज षर्ज अर्जन इत्यस्मादर्जेश्च ऋजि च । उ० ४. २८ । इतीषन्प्रत्ययः ऋजि इत्यादेशश्च धातोः । अर्ज्यत । इत्यृजीषं । तदस्यास्तीतीनिप्रत्ययः । आमंत्रितत्वान्निघातः । मादयस्व । मदि स्तुत्यादिषु । हेतुमण्णिच् । निघातः ॥

**गवाशिरं मंथिनमिंद्र शुक्रं पिबा सोमं ररिमा ते मदाय ।
ब्रह्मकृता मारुतेना गणेन सजोषा रुद्रैस्तृपदा वृषस्व ॥ २ ॥**

गोऽआशिरं । मंथिनं । इंद्र । शुक्रं । पिब । सोमं । ररिम । ते । मदाय ॥ ब्रह्मऽकृता । मारुतेन । गणेन । सऽजोषाः । रुद्रैः । तृपत् । आ । वृषस्व ॥ २ ॥

हे इंद्र गवाशिरं गव्यस्य पयस आशीर्मिश्रणं यस्मिन् तं सोमं । अपि च मंथिनं मंथसंयुक्तं शुक्रमभिनवं । यद्वा शुक्रामंथिग्रहे वर्तमानं एवं त्रिषु सवनेषु वर्तमानमिमं सोमं पिब । ते तव मदाय हर्षाय ररिम तं सोमं वयं प्रयच्छामः । मारुतेन । मरुतां गणो मारुतः । स च ब्रह्मकृता । ब्रह्मस्तोत्रं करोतीति ब्रह्मकृत् इंद्रस्तोत्रं कुर्वाणेन मारुतेन गणेन रुद्रैरेकादशसंख्याकै रुद्रैश्च सजोषाः संगतस्त्वं तृपत् सोमपानेन तृप्यन् आ वृषस्व तमिमं सर्वतो जठरे सिंच धारय ॥ गवाशिरं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

श्रिणातेराङ् पूर्वात्क्विप्यपस्पृधेथामानृचुरित्यादिना निपातनादाशिरादेशः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः । पिबा । द्व्यचोऽतस्तिङ इति संहितायां दीर्घः । ररिम । रातेश्छांदसे वर्तमाने लिटि रूपं । असमानवाक्यत्वान्निघाताभावः । आगमा अनुदात्ता इतीटोऽनुदात्तत्वात्प्रत्ययस्वरः । तृपत् । तृप प्रीणने । तुदादिः । आगमानुशासनस्यानित्यत्वान्नुमभावः । वृषस्व । वृषु सेचने । व्यत्ययेन शः ॥

ये ते शुष्मं ये तविषीमवर्धन्नर्चंत इंद्र मरुतस्त ओजः ।
माध्यंदिने सवने वज्रहस्त पिबा रुद्रेभिः सगणः सुशिप्र ॥ ३ ॥

ये । ते । शुष्मं । ये । तविषीं । अवर्धन् । अर्चंतः । इंद्र । मरुतः ते । ओजः ॥ माध्यंदिने । सवने । वज्रऽहस्त । पिब । रुद्रेभिः । सऽगणः । सुऽशिप्र ॥ ३ ॥

हे इंद्र ये मरुतस्ते तव शुष्मं शत्रूणां शोषकं तेजो ये च मरुतस्तविषीं बलं चावर्धन् युद्धसहकारितयावर्धयन् ते मरुतोऽर्चंतस्त्वां स्तुवंतः संतस्ते तवौजो युद्धसामर्थ्यमवर्धयन् । वज्रहस्त वज्रयुक्तौ हस्तौ यस्येति तादृश । सुशिप्र शोभनहनो । शिप्रे हनू नासिके वेति यास्कः । हे इंद्र रुद्रेभिः रोदयंति शत्रूनिति रुद्रा मरुतः तैः सगणस्त्वं माध्यंदिने सवने सोमं पिब ॥ अवर्धन् । वृधु वर्धने । अंतर्भावितण्यर्थः । यद्वृत्तयोगादनिघातः । माध्यंदिने । उत्सादित्वादञ् । ञित्वादाद्युदात्तः ॥

त इन्न्वस्य मधुमद्विविप्र इंद्रस्य शर्धो मरुतो य आसन् ।
येभिर्वृत्रस्येषितो विवेदामर्मणो मन्यमानस्य मर्म ॥ ४ ॥

ते । इत् । नु । अस्य । मधुऽमत् । विविप्रे । इंद्रस्य । शर्धः । मरुतः । ये । आसन् ॥ येभिः । वृत्रस्य । इषितः । विवेद । अमर्मणः । मन्यमानस्य । मर्म ॥ ४ ॥

ये मरुतः इंद्रस्य शर्धो बलभूता आसन् त इत् त एव मरुतोऽस्य । द्वितीयार्थे षष्ठी । इममिंद्रं मधुमत् तव सहाया वयमास्महे त्वं युद्धमभिगच्छेति माधुर्योपेतं वाक्यं यथा भवति तथा विविप्रे नु क्षिप्रं प्रैरयन् । येभिर्यैर्युद्धसहायैर्मरुद्भिरिषितः प्रेरित इंद्रोऽमर्मणः परैरविदितमर्मस्थानस्यात एव मन्यमानस्य न कोऽपि मम हंतेत्यभिमन्यमानस्य वृत्रस्यासुरस्य मर्म यस्मिन् स्थाने प्रहृतौ सत्यां स मरिष्यति तादृशं स्थानं विवेद अज्ञासीत् ॥ विविप्रे । विप क्षेपण इत्यस्य लिटि व्यत्ययेनात्मनेपदं । इरेचः इरयो र इति रे इत्यादेशः । निघातः । आसन् अस भुवीत्यस्य लङि रूपं । यद्वृत्तयोगान्निघाताभावः । विवेद । विद ज्ञाने लिटि रूपं । लित्स्वरः । मर्म । मृङ् प्राणत्यागे इत्यस्मादौणादिको मनिन् । नित्स्वरः ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मनुष्वदिंद्र सवनं जुषाणः पिबा सोमं शश्वते वीर्याय ।
स आ ववृत्स्व हर्यश्व यज्ञैः सरण्युभिरपो अर्णा सिसर्षि ॥ ५ ॥

मनुष्वत् । इंद्र । सवनं । जुषाणः । पिब । सोमं । शश्वते । वीर्याय ॥ सः । आ । ववृत्स्व । हरिऽअश्व । यज्ञैः । सरण्युऽभिः । अपः । अर्णा । सिसर्षि ॥ ५ ॥

हे इंद्र मनुष्वत् मनोर्यज्ञमिव ममेदं सवनं यज्ञं जुषाणः सेवमानस्त्वं शश्वते शाश्वताय वीर्याय परपरिभवलक्षणाय सामर्थ्यायेमं सोमं पिब । हे हर्यश्व स तादृशस्त्वं यज्ञैर्यजनीयैर्मरुद्भिः साकमाववृत्स्व आगच्छ । किंच सरण्युभिरेकश्रुतिमन्मंत्रानात्मन इच्छद्भिः । यद्वा सरण्युभिः सरणशीलैर्मरुद्भिः सहितस्त्वमपोंऽतरिक्षस्थितान्युदकानि अर्णा पार्थिवान्युदकानि सिसर्षि प्रापय । यद्वा अपः । पंचम्यंतमेतत्पदं । अपो व्याप्तादंतरिक्षात्सकाशादर्णांसि प्रापय ॥ ववृत्स्व । वृतु वर्तने । व्यत्ययेन शपः श्लुः । लोटि रूपं । सरण्युभिः । रण शब्दार्थः । क्विप् । समानो रणो ध्वनिर्येषां ते सरणा मंत्राः । तानिच्छंतः । सुपः क्यच् । क्यादित्युप्रत्ययः । यद्वा सृ गतौ । सृयुवचिभ्योन्युजागूचक्नुचः । उ० ३. ८०. । इत्यन्युच्प्रत्ययः । रषाभ्यां । पा० ८. ४. १. । इति णत्वं । चित्त्वादंतोदात्तः । अपः । आपॢ व्याप्तौ आप्नोतेः क्विप् ह्रस्वश्चेति क्विप् धातोर्ह्रस्वश्च । सावेकाच इति विभक्तेरुदात्तत्वं । सिसर्षि । सृ गतौ । छांदसो जुहोत्यादिः । बहुलं छंदसीत्यभ्यासस्येत्वं ॥

त्वमपो यद्ध वृत्रं जघन्वाँ अत्याँ इव प्रासृजः सर्तवाजौ ।
शयानमिंद्र चरता वधेन वव्रिवांसं परि देवीरदेवं ॥ ६ ॥

त्वं । अपः । यत् । ह । वृत्रं । जघन्वान् । अत्यान्ऽइव । प्र । असृजः । सर्तवै । आजौ ॥ शयानं । इंद्र । चरता । वधेन । वव्रिऽवांसं । परि । देवीः । अदेवं ॥ ६ ॥

हे इंद्र त्वं देवीर्देवनशीला अपः परि वव्रिवांसं परित आवृत्य वर्तमानं अत एवादेवं बहूदकतया स्वच्छत्वेनाप्रतिभासमानं शयानमेकत्र निश्चलतया वर्तमानं वृत्रं मेघं यद्यदा चरता तमुद्दिश्य वर्तमानेन वधेन युद्धेन जघन्वान् हतवानसि यदा त्वमाजौ युद्धे सर्तवै अतिवेगगमनायात्यानिव यथाश्वान् प्रेरयसि तथा त्वमप उदकान्यंतरिक्षादाकाशात् प्रासृजो ह प्रकर्षेण मेघभेदनं कृत्वासृजः खलु । तं यजाम इत्युत्तरेणान्वयः ॥ जघन्वान् । हनहिंसागत्योरित्यस्य क्वसौ विभाषा गमहनविदविशामितीटो विकल्पितत्वादत्रेडभावः ॥ अभ्यासाच्चेति हकारस्य घत्वं । प्रत्ययस्वरः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

असृजः । सृज विसर्गे । शविकरणी । यद्योगादनिघातः । सर्तवै । सृ गतौ । तुमर्थे तवैप्रत्ययः । अंतश्च तवै युगपदिति धातोः प्रत्ययस्य चोदात्तत्वं । आजौ । अज गतिक्षेपणयोः । अज्यतिभ्यां च । उ० ४. १३९. । इति इण्प्रत्ययः । णित्त्वादुपधावृद्धिः । अजंति गच्छंत्यस्मिन्नित्याजिर्युद्धं । प्रत्ययस्वरः । सर्तवाजावित्यत्र संहितायामायादेशे कृते तस्य लोपः शाकल्यस्येति यकारलोपः । सर्वविधीनां च्छंदसि विकल्पितत्वात्सवर्णदीर्घत्वे कर्तव्ये यलोपो नासिद्धो भवति । सवर्णदीर्घः । शयानं । शीङ् स्वप्ने । शानच् । अदादित्वाच्छपो लुक् । ङित्त्वाल्लसार्वधातुकस्वरेण शानचोऽनुदात्तत्वे धातुस्वरः । वधेन । हंतेर्भावे हनश्च वध इत्यप्प्रत्ययो वधादेशश्च धातोरंतोदात्तश्च । वव्रिवांसं । वृञ् वरण इत्यस्य क्रसाविडागमश्छांदसः । प्रत्ययस्वरः ॥

यजा॑म॒ इन्नम॑सा वृ॒द्धमिंद्रं॑ बृ॒हंत॑मृ॒ष्वम॒जरं॒ युवा॑नं । यस्य॑ प्रि॒ये म॒मतु॑र्य॒ज्ञिय॑स्य॒ न रोद॑सी महि॒मानं॑ म॒माते॑ ॥ ७ ॥

यजा॑मः । इत् । नम॑सा । वृ॒द्धं । इंद्रं॑ । बृ॒हंतं॑ । ऋ॒ष्वं । अ॒जरं॑ । युवा॑नं ॥ यस्य॑ । प्रि॒ये इति॑ । म॒मतुः॑ । य॒ज्ञिय॑स्य । न । रोद॑सी इति॑ । म॒हि॒मानं॑ । म॒माते॒ इति॑ ॥ ७ ॥

नमसा हविर्लक्षणेनान्नेन वृद्धं प्रवृद्धं अत एव बृहंतं महांतमृष्वं । ऋष्यते गम्यते स्तुतिलक्षणैर्मंत्रैरिति ऋष्वं स्तोतव्यं अजरं जरारहितं अत एव युवानं नित्यतरुणं एवंविधमिंद्रं यजाम इत् । कुशिका वयं यज्ञसिद्ध्यर्थं स्तुतिवाक्यैः पूजयामः । प्रिये प्रियतमे अपरिमिते रोदसी द्यावापृथिव्यौ यज्ञियस्य यज्ञार्हस्य यस्येंद्रस्य तव महिमानं वैभवं न ममतुः न परिच्छेत्तुं शक्नुतः । न ममाते इति द्वितीयं क्रियापदमादरार्थं । यजामः । यजेर्लटि रूपं । ऋष्वं । ऋषि गतौ । सर्वनिघृष्व ऋष्वेत्यादिना वप्रत्ययांतो निपातितः । प्रत्ययस्वरः । प्रिये ईदूदेदिति प्रगृह्यसंज्ञा । ममतुः । मा मान इत्यस्य लिट्यतुसि रूपं । यद्वृत्तयोगादनिघातः । प्रत्ययस्वरः । महिमानं । महिशब्दात्तस्य भाव इत्यर्थे पृथ्वादिलादिमनिच् चित्स्वरः । ममाते । माङ् माने शब्दे चेत्यस्य लिट्यातामि रूपं ॥

इंद्र॑स्य॒ कर्म॒ सुकृ॑ता पु॒रूणि॑ व्र॒तानि॑ दे॒वा न मि॑नंति॒ विश्वे॑ । दा॒धार॒ यः पृ॑थि॒वीं द्यामु॒तेमां ज॒जान॒ सूर्य॑मु॒षसं॑ सु॒दंसाः॑ ८

इंद्र॑स्य । कर्म॑ । सु॒ऽकृ॑ता । पु॒रूणि॑ । व्र॒तानि॑ । दे॒वाः । न । मि॒नंति॒ । विश्वे॑ ॥ दा॒धार॑ । यः । पृ॒थि॒वीं । द्यां । उ॒त । इ॒मां । ज॒जान॑ । सूर्यं॑ । उ॒षसं॑ । सु॒ऽदंसाः॑ ॥ ८ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विश्वे सर्वे देवाः इंद्रस्य तव कर्म कर्माणि सुकृता सुकृतानि सुष्ठु निर्मितानि पृथिव्यादीनि पुरूणि बहूनि व्रतानि यज्ञादीनि च न मिनंति एतानि सर्वाणि तव कर्माणि न हिंसंति । किंत्वाद्रियंते । किंच योऽयमिंद्रः पृथिवीं भूलोकं द्यां द्युलोकं उत अपि चेमामिममंतरिक्षलोकं च एतांस्त्रीन् लोकान् दाधार । किंच सुदंसाः सुकर्मा शोभनकर्मा सन्निंद्रः सूर्यं लोकप्रकाशकमादित्यमुषसमग्निहोत्रादिकर्मनिर्वाहकमुषःकालं जजान उत्पादयामास ॥ इंद्रस्य कर्म सुकृता पुरूणीत्येतत्पदकदंबकमेको द्वे वसुमतीत्यस्मिन्वर्गे । ऋग्वे० ३. २. ३. । पठितं अत्रापि तदेव पठ्यते । पदकाले नोत्सृज्यत इति चेत् न । वाक्यभेदात् । तत्रेंद्रस्य कर्म सुकृता पुरूणीत्येकं वाक्यं । अत्र तु कर्म सुकृतेत्येकं वाक्यं । पुरूणि व्रतानीत्यपरं । किंच तत्रत्यं पदकदंबकं प्रथमांतं अत्रत्यं द्वितीयांतं । अतो वाक्यभेदाद्विभक्तिभेदाच्च पदकाले नोत्सृज्यते । मिनंति । मीञ् हिंसायामित्यस्य लटि रूपं । निघातः । दाधार । धृञ् धारण इत्यस्य लिटि रूपं । तुजादित्वादभ्यासस्य दीर्घः । लित्स्वरः । जजान । जन जनन इत्यस्यांतर्भावितण्यर्थस्य लिटि रूपं । लित्स्वरः । सुदंसाः । सोर्मनसी इत्युत्तरपदाद्युदात्तत्वं ॥

अद्रो॑घ स॒त्यं तव॒ तन्म॑हि॒त्वं स॒द्यो यज्जा॒तो अपि॑बो ह॒ सोम॑म् । न द्याव॑ इंद्र त॒वस॑स्त॒ ओजो॒ नाहा॒ न मासाः॑ श॒रदो॑ वरंत ॥ ९ ॥

अद्रो॑घ । स॒त्यं । तव॑ । तत् । म॒हि॒ऽत्वं । स॒द्यः । यत् । जा॒तः । अपि॑बः । ह॒ । सोम॑म् ॥ न । द्याव॑ः । इं॒द्र॒ । त॒वस॑ः । ते॒ । ओज॑ः । न । अहा॑ । न । मासा॑ः । श॒रद॑ः । व॒रं॒त॒ ॥ ९ ॥

अद्रोघ द्रोहवर्जित हे इंद्र ते तव तन्महित्वं तादृशं माहात्म्यं सत्यं यथार्थं । यद्यस्माज्जात उत्पन्नः सद्यस्तदानीमेव सोममस्माभिर्दीयमानं सोमरसमपिबः । ह प्रसिद्धौ । किंच तवसो बलवतस्ते तवौजः सामर्थ्यं द्यावो दिवोपलक्षिताः सर्वे लोका न वरंत न वारयंति । किंच । अहा प्रतिपदादीन्यहानि न वारयंति । तथा मासाश्चैत्राद्याः शरदः संवत्सराश्च तव सामर्थ्यं न वारयंति । किंतु तव सामर्थ्यमनुसृत्य सर्वे वर्तंत इति भावः ॥ अद्रोघ । आमंत्रितस्य चेति षाष्ठिकमाद्युदात्तत्वं । अपिबः । यद्योगाद् निघातः । मासाः । मसी परिमाणे । मस्यते परिमीयते त्रिंशता दिनैरिति मासः । कर्मणि घञ् । ञित्त्वादाद्युदात्तः । शरदः । शॄ हिंसायामित्यस्मात् शॄदृभसोऽदिरित्यधिकरणेऽदिप्रत्ययः । शीर्यंतेऽस्यां तृणगुल्मवनस्पतीनां तेजांसीति शरत् । प्रत्ययस्वरः । वरंत । वृञ् वरणे । अंतर्भावितण्यर्थोऽत्रातिवारणे वर्तते । भौवादिकः । छांदसे लङि रूपं । निघातः ॥

८

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

त्वं स॒द्यो अ॑पिबो जा॒त इं॑द्र॒ मदा॑य॒ सोमं॑ पर॒मे व्यो॑मन् ।
यद्ध॒ द्यावा॑पृथि॒वी आवि॑वेशी॒रथा॑भवः पू॒र्व्यः का॒रुधा॑याः १०

त्वं । स॒द्यः । अ॒पि॒बः । जा॒तः । इं॒द्र॒ । मदा॑य । सोम॑ । प॒र॒मे । विऽओ॑मन् ॥ यत् । ह॒ । द्यावा॑पृथि॒वी इति॑ । आ । अवि॑वेशीः । अथ॑ । अ॒भ॒वः । पू॒र्व्यः । का॒रुऽधा॑याः ॥ १० ॥

हे इंद्र सद्यस्तदानीमेव जातः परमे व्योमन् उत्तमे स्थाने स्थितस्त्वं मदाय हर्षाय सोममपिबः । यद्यदा त्वं द्यावापृथिवी द्यावापृथिव्यावाविवेशीर्ह आ समंताद्भृशं प्रविष्टोऽसि खलु । अथानंतरं पूर्व्यः पुरातनः सन् कारुधायाः कर्मणां विधाताभवः खलु ॥ व्योमन् । अव रक्षणगत्यादिषु । विपूर्वस्यावतेर्नामन्सामन्नित्यादिना मनिन् । ज्वरत्वरेत्यादिना ऊठ् । विशेषेणौम व्याप्तिर्यस्य तत् । सुपां सुलुगित्यादिना सुपो लुक् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः । आविवेशीः । विश प्रवेशन इत्यस्य यङ्लुकि लङि सिपि यङो वेतीडागमः । इतश्चेति सिप इकारलोपः । यद्योगादनिघातः । कारुधायाः । कारुः । करोतेः कृवापाजिमिस्वदिसाध्यशूभ्य उण्प्रत्ययः । णित्त्वाद्वृद्धिः । दधातेर्वहिहाधाञ्भ्यश्छंदसीत्यसुन् । णिदित्यनुवृत्तेरातो युक् चिण्कृतोरिति युगागमः । समासे गतिकारकोपपदादिति पूर्वपदप्रकृतिस्वरत्वं चेति सूत्रात्पूर्वपदप्रकृतिस्वरः ॥

अह॒न्नहिं॑ परि॒शया॑न॒मर्णं॑ ओ॒जायमा॑नं तुविजात॒ तव्या॑न् ।
न ते॑ महि॒त्वमनु॑ भू॒दध॒ द्यौर्यद॒न्यया॑ स्फि॒ग्या॒३॑ क्षामव॑स्थाः ११

अह॑न् । अहि॑ं । प॒रि॒ऽशया॑नं । अर्णः॑ । ओ॒जा॒यमा॑नं । तु॒वि॒ऽजा॒त॒ । तव्या॑न् ॥ न । ते॒ । म॒हि॒ऽत्वं । अनु॑ । भू॒त् । अध॑ । द्यौः । यत् । अ॒न्यया॑ । स्फि॒ग्या॑ । क्षां । अव॑स्थाः ॥ ११ ॥

तुविजात बहूनि जातानि पृथिव्यादीनि यस्मात्सोऽयं तुविजातः । हे तुविजात इंद्र तव्यानतिशयेन प्रवृद्धस्त्वमर्णः परिशयानमुदकं परितः शयानमुदकमंतः कृत्वा परितो वर्तमानं अत एवौजायमानं बलमाचरंतमहिं । आ समंताद्धंत्यपहरत्युदकमित्यहिर्मेघः तमिमं मेघमहन् उदकप्रेरणाय हतवानसि । अध अथ ते महित्वं महिमानं द्यौर्नानुभूत् नानुभवति न जानाति । यद्यस्मात्त्वमन्ययैकतरया स्फिग्या कट्या क्षां भूमिमवस्थाः अवच्छाद्य तिष्ठसि ॥ अहन् हंतेर्लङि सिब्लोपे रूपं । अहिं । हन हिंसागत्योः । आङि श्रिहनिभ्यां ह्रस्वश्चेति इण्प्रत्ययः । डिच्च पूर्वपदस्य ह्रस्वश्च । वृषादित्वादाद्युदात्तत्वं । ओजायमानं । ओजःशब्दादा-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

चारार्थे कर्तुः क्यङ् सलोपश्चेति क्यङ्प्रत्ययः सलोपश्च । ङित्त्वादात्मनेपदं । प्रत्ययस्वरः । तव्यान् । तु इति सौत्रो धातुः । अस्मात्तृजंतात्तुश्छंदसीतीयसुन् । तुरिष्ठेमेयःस्विति तृचो लोपः । भसंज्ञायामोर्गुणः । इकारलोपश्छांदसः । नित्स्वरः । भूत् । भवतेर्लुङि रूपं । स्फिग्या । यचि भमिति भसंज्ञां वाधित्वा स्वादिष्वसर्वनामस्थान इति पदसंज्ञायां जश्त्वं । तृतीयायाः पूर्वसवर्णः । क्षां । क्षि निवासगत्योः । अन्येभ्योऽपि दृश्यत इति निरुपपदादपि डप्रत्ययः । ततष्टाप् । क्षियंति निवसंत्यस्यां प्राणिन इति क्षा भूमिः । उदात्तनिवृत्तिस्वरेणांतोदात्तः । अवस्थाः । वस आच्छादन इत्यस्य लङ्यनुदात्तत्वादात्मनेपदं । थास्यदादित्वाच्छपो लुक् । यद्योगादनिघातः । अडागमस्वरः ॥

य॒ज्ञो हि त॑ इं॒द्र॒ वर्ध॑नो॒ भूदु॒त प्रि॒यः सु॒तसो॑मो मि॒येधः॑ ।
य॒ज्ञेन॑ य॒ज्ञम॑व य॒ज्ञियः॒ सन्य॒ज्ञस्ते॒ वज्र॑मह॒हत्य॑ आवत् ॥१२॥

य॒ज्ञः । हि॒ । ते॒ । इं॒द्र॒ । वर्ध॑नः । भूत् । उ॒त । प्रि॒यः । सु॒तऽसो॑मः । मि॒येधः॑ ॥ य॒ज्ञेन॑ । य॒ज्ञं । अ॒व॒ । य॒ज्ञियः॑ । सन् । य॒ज्ञः । ते॒ । वज्रं॑ । अ॒हि॒ऽहत्ये॑ । आ॒व॒त् ॥ १२ ॥

हे इंद्र अस्मदीयो यज्ञस्ते तव वर्धनो हविःप्रदानेन वर्धयिता भूद्धि भवति खलु । उत अपि च सुतसोमोऽभिषुतसोमवान्मियेधः सारभूतो यज्ञस्तव प्रियः । स त्वं यज्ञियो यज्ञार्हः सन् यज्ञं यज्ञस्य कर्तारं यजमानं यज्ञेनानुष्ठीयमानेनानेनाव फलप्रदानेन रक्ष । किंचायं यज्ञस्ते तव वज्रमहिहत्ये वृत्रहनने कर्मण्यावत् । रक्षतु ॥ वर्धनः । वृधु वर्धन इत्यस्य ण्यंतस्य नंद्यादित्वात् ल्युप्रत्ययः । लित्स्वरः । भूत् हियोगादनिघातः । अव । अवतेर्लोटि रूपं । निघातः । सन् । असेः शतरि रूपं । प्रत्ययस्वरः । अहिहत्ये । हन हिंसागत्योरित्यस्य भावे हनस्त चेति क्यप् तकारश्चांतादेशः । कृदुत्तरपदस्वरः । आवत् । अवतेश्छांदसे लङि रूपं । निघातः ॥

य॒ज्ञेनेंद्र॒मव॑सा चं॑क्रे अ॒र्वागैनं॑ सु॒म्नाय॒ नव्य॑से ववृत्यां॑ ।
यः स्तोमे॑भिर्वावृ॒धे पू॒र्व्येभि॒र्यो मध्य॒मेभि॑रु॒त नूत॑नेभिः ॥१३॥

य॒ज्ञेन॑ । इंद्रं॑ । अव॑सा । आ । च॒क्रे॒ । अ॒र्वाक् । आ । ए॒नं॒ । सु॒म्नाय॑ । नव्य॑से । व॒वृ॒त्यां॒ ॥ यः । स्तोमे॑भिः । व॒वृ॒धे । पू॒र्व्येभिः॑ । यः । म॒ध्य॒मेभिः॑ । उ॒त । नूत॑नेभिः ॥ १३ ॥

हे इंद्र सर्वो यजमानोऽवसा स्वरक्षकेण यज्ञेनेंद्रं त्वामर्वागाचक्रे हविःप्रदानेनाभिमुखं करोति । तथाहं नव्यसे नवतराय सुम्नाय धनायैनं त्वामा ववृत्यां यज्ञेना-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

वृतं मदभिमुखं कुर्यां । कीदृशस्त्वं । यः पूर्व्येभिः पुरातनैः स्तोमेभिः स्तोत्रैर्ववृधे । तथा य इंद्रो मध्यमेभिर्मध्ये भवैः स्तोत्रैरुतापि च नूतनेभिरस्माभिः क्रियमाणैरधुनातनैः स्तोत्रैर्वर्धते ॥ चक्रे करोतेर्लिटि रूपं । नव्यसे । नवशब्दादीयसुनि भसंज्ञायामकारलोप ईकारलोपश्छांदसः । नित्वादाद्युदात्तः । वव्रृत्यां । वृतु वर्तने । लिङि बहुलं छंदसीति शपः श्लुः । व्यत्ययेन परस्मैपदं । निघातः । वव्रृधे । वृधु वर्धन इत्यस्य लिटि रूपं । प्रत्ययस्वरः । मध्यमेभिः । मध्यशब्दात् शैषिकार्थे मध्यान्मः । पा० ४. ३. ८. । इति मप्रत्ययः प्रत्ययस्वरः । नूतनेभिः । नवशब्दस्य त्नप्तनप्खाश्च प्रत्यया वक्तव्या नू इत्यादेशश्चेति तनप्प्रत्ययो नू इत्यादेशश्च ॥

वि॒वेष॒ यन्मा॑ धि॒षणा॑ ज॒जान॒ स्तवै॑ पु॒रा पार्या॒दिंद्र॒मह्नः॑ । अंह॑सो॒ यत्र॑ पी॒पर॒द्यथा॑ नो ना॒वेव॒ यांत॑मु॒भये॑ हवंते ॥ १४ ॥

वि॒वेष॑ । यत् । मा॒ । धि॒षणा॑ । ज॒जान॑ । स्तवै॑ । पु॒रा । पार्या॑त् । इंद्र॑ । अह्नः॑ ॥ अंह॑सः । यत्र॑ । पी॒पर॑त् । यथा॑ । न॒ः । ना॒वाऽई॑व । यांत॑ । उ॒भये॑ । ह॒वं॒ते ॥ १४ ॥

यद्यदा धिषणेंद्रं स्तवानीति मदीया बुद्धिर्मा विवेष व्याप्नोत् तदाहं स्तोत्रं जजान करोमि । बुद्धेः स्वरूपं दर्शयति । अहं पार्यात्पारे भवादतिदूरवर्तिनो विघ्नकारिणोऽह्नः पुरा पूर्वं इंद्रं स्तवै स्तवानि । यत्र यस्यां धिषणायामेव जातायां सत्यां स इंद्रो नोऽस्मानंहसः पापरूपाद्दारिद्र्याद्यथा पीपरत् यथा पारं नयेत् तथास्मदुभयपार्श्ववर्तिधनार्थिनो जना हवंते आह्वयंति । तत्र दृष्टांतः । नावेव यांतं । यथा नद्यादिषु नौकया यांतं गच्छंतं पुरुषमुभय उभयकूलवर्तिनो जना हवंते आह्वयंति तद्वत् ॥ विवेष । विष्लृ व्याप्तावित्यस्य लिटि णलि रूपं लित्स्वरः । जजान । जन जनन इत्यस्य लिट्युत्तमे णलि रूपं । वाक्यभेदादनिघातः । अंहसः । अम गत्यादिषु । अमेर्हुक् च । उ० ४. २१२. । इत्यसुन्प्रत्ययो हुगागमश्च । नित्स्वरः । पीपरत् । पॄ पालनपूरणयोरित्यस्य लुङि चङि ह्रस्वाभ्यासेत्वदीर्घगुणाः । यथायोगादनिघातः । लित्स्वरः । नावेव । नुद प्रेरण इत्यस्माद्ग्लानुदिभ्यां डौः । उ० २.६४. । इति डौप्रत्ययः । नुद्यत इति नौः प्लवः । सावेकाच इति तृतीयाया उदात्तत्वं । इवेन नित्यसमासो विभक्त्यलोप इत्यादि । उभये । उभयशब्दात्परस्य तयप उभादुदात्तो नित्यं । पा० ५. २. ४४ । इत्ययजादेशः । वचनसामर्थ्यादादेरुदात्तत्वं । हवन्ते । ह्वयतेर्लटि रूपं ॥

आपू॑र्णो अस्य क॒लश॒ः स्वाहा॒ सेक्ते॑व॒ कोशं॑ सिसिचे॒ पि॒बध्यै॑ । समु॑ प्रि॒या आव॑वृत्र॒न्मदा॑य प्रदक्षि॒णिद॒भि सोमा॑स॒ इंद्र॑ ॥ १५ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

आऽपूर्णः । अस्य । कलशः । स्वाहा । सेक्ताऽइव । कोशं । सिसिचे । पिबध्यै ॥ सं । ऊंइति । प्रियाः । आ । अववृत्रन् । मदाय । प्रऽदक्षिणित् । अभि । सोमासः । इंद्रं ॥ १५ ॥

हे इंद्र अस्य तव पानार्थं कलशो द्रोणकलशः सोमेनापूर्णः । स्वाहा स्वाहाकृतो दत्तश्च सोमसहितः कलशः पिबध्यै तव पानार्थं सिसिचे तं सोमं चोदिताधारे सिंचामि । तत्र दृष्टांतः । कोशं सेक्तेव । यथा सेक्तोत्सेचको जलपूर्णात्कोशात् दृतेः सकाशाज्जलं पात्रांतरे सिंचति तद्वत् । प्रियाः स्वादुतमाः सोमासो दत्तास्ते सोमा इंद्रं त्वामभि अभिलक्ष्यैव मदाय तव हर्षार्थं प्रदक्षिणित् प्रादक्षिण्येन समाववृत्रन् । सम्यगावृत्य वर्तंतां ॥ आपूर्णः । पॄ पालनपूरणयोरित्यस्य कर्मणि निष्ठा । रदाभ्यामिति तस्य नत्वं । गतिरनंतर इति गतिस्वरः । स्वाहा । निपातत्वादाद्युदात्तः । सेक्तेव कोशं । न लोकाव्ययेति षष्ठीप्रतिषेधः । सिसिचे । षिच क्षरण इत्यस्य लिटि रूपं । पिबध्यै । पा पान इत्यस्य तुमर्थे शध्यैन्प्रत्ययः । शित्त्वात्पिबादेशः । नित्त्वादाद्युदात्तः । अववृत्रन् । वृतु वर्तन इत्यस्य लङि शप् । बहुलं छंदसीति तस्य शपः श्लुः । व्यत्ययेन परस्मैपदं । बहुलं छंदसीति हे रुडागमः ॥

नत्वा गभीरः पुरुहूत सिंधुर्नाद्रयः परि षंतो वरंत । इत्था सखिभ्य इषितो यदिंद्रा दृळहं चिदरुजो गव्यमूर्वं १६

न । त्वा । गभीरः । पुरुऽहूत । सिंधुः । न । अद्रयः । परि । संतः । वरंत ॥ इत्था । सखिऽभ्यः । इषितः । यत् । इंद्र । आ । दृळहं । चित् । अरुजः । गव्यं । ऊर्वं ॥ १६ ॥

हे पुरुहूतेंद्र गभीरो गंभीरः सिंधुः समुद्रस्त्वा त्वां न वारयति । ततः परि परितो वर्तमानाः संतोऽद्रयः शैलास्त्वां न वरंत न वारयंति । किंतु त्वामनुसृत्य वर्तंते । यद्यस्मादित्थेत्थमनेन प्रकारेण सखिभ्यः सखिभिर्देवैरिषितः प्रार्थितस्त्वं दृळहं चिदतिप्रबलमपि गव्यं गवि भवमवटे वर्तमानमूर्वमूर्वानलमारुजः सम्यगभांक्षीः ॥ गभीरः । गाधृ प्रतिष्ठालिप्सयोर्ग्रंथे च । अस्मादीरच् प्रत्ययः । धकारस्य भकार आकारस्य ह्रस्वश्च । गभीरगंभीरौ । उ० ४.३५. । इत्यनेन निपात्यते । चित्स्वरः । सिंधुः । स्यंदू प्रस्रवणे । स्यंदेः संप्रसारणं धश्चेत्युप्रत्ययः संप्रसारणं दकारस्य धकारः । निदित्यनुवृत्तेराद्युदात्तः । परिषंतः संतः । अस्तेः शतरि रूपं । उपसर्गप्रादुर्भ्यामस्तिर्यच्पर इति षत्वं । केचित्परेः क्रियान्वयमिच्छंति । तदा षत्वमनुपपन्नं । परि । निपातस्वरः । संतः । प्रत्ययस्वरः । वरंत । वृञ् वरणे । भौवादिकः लङि रूपं । निघातः । अरुजः । रुजो भंग इत्यस्य लङि रूपं । गव्यं । गोर्विकार इत्यर्थे गोपयसोर्यदिति यत् । यतो नाव इत्याद्युदात्तत्वं ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

शुनं हुवेम मघवानमिंद्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वंतमुग्रमूतये समत्सु घ्नंतं वृत्राणि संजितं धनानां ॥१७॥

शुनं । हुवेम । मघऽवानं । इंद्रं । अस्मिन् । भरे । नृऽतमं । वाजऽसातौ ॥ शृण्वंतं । उग्रं । ऊतये । समत्ऽसु । घ्नंतं । वृत्राणि । संऽजितं । धनानां ॥ १७ ॥

हे इंद्र वाजसातौ । वाजस्यान्नस्य सातिर्लाभो यस्मिन् सोऽयं वाजसातिः । तस्मिन्भरे । बिभ्रति जयलक्ष्मीमनेन योद्धार इति भरः संग्रामः । तस्मिन् संग्रामे शुनं शूनमुत्साहेन प्रवृद्धं । यद्वा शुनमिति सुखनाम । सुखकरं मघवानं धनवंतं अत एवेंद्रं निरतिशयैश्वर्यसंपन्नं नृतमं सर्वस्य जगतोऽतिशयेन नेतारं त्वां हुमेव । कुशिका वयं यज्ञार्थमाह्वयाम । तथा श्रृण्वंतमस्माभिः क्रियमाणां स्तुतिं श्रृण्वंतमुग्रं शत्रूणां भयंकरं समत्सु संग्रामेषु वृत्राणि वृत्रोपलक्षितानि सर्वाणि रक्षांसि घ्नंतं हिंसंतं धनानां शत्रुसंबंधिनां संजितं सम्यग्जेतारं त्वामूतये रक्षणाय वयमाह्वयेम ॥ शुनं । टुओश्वि गतिवृद्ध्योरित्यस्य निष्ठायां यस्य विभाषेतीट्प्रतिषेधः । यजादित्वात्संप्रसारणं । दीर्घाभावश्छांदसः । प्रत्ययस्वरः । हुवेम । ह्वयतेर्बहुलं छंदसीति संप्रसारणे कृते शपो लुकि कृते च लिङि रूपं । निघातः । भरे । भृञ् भरणे । घः । वृषादित्वादाद्युदात्तः । वाजसातौ । षणु दाने । भावे क्तिन् । जनसनेत्यादिनानुनासिकस्यात्वं । बहुव्रीहौ पूर्वपदस्वरः । समत्सु । अद भक्षणे । संपूर्वात् क्विप् । संभक्षयंति योद्धॄणामायूंषीति समदः संग्रामाः । कृदुत्तरपदस्वरः । घ्नंतं । हन हिंसागत्योरित्यस्य शतरि गमहनेत्यादिनोपधालोपः । हो हंतेरिति घत्वं । संजितं । जि जये । क्विप् ॥

(मं० ३ सू० ३३.)

१२.

प्र पर्वतानामुशती उपस्थादश्वे इव विषिते हासमाने ।
गावेव शुभ्रे मातरा रिहाणे विपाट्छुतुद्री पयसा जवेते ॥१॥

प्र । पर्वतानां । उशती इति । उपऽस्थात् । अश्वेइवेत्यश्वेऽइव । विसिते इति विऽसिते । हासमाने इति ॥ गावाऽइव । शुभ्रे इति मातरा । रिहाणे इति । विऽपाट् । शुतुद्री । पयसा । जवेते इति ॥ १ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पर्वतानां गिरीणां शैलानामुपस्थादुत्संगान्निर्गत्योशती समुद्रगमनं कामयमाने । गमने दृष्टांतः । अश्वे इव वडवे यथा विषिते मंदुरातो विमुक्ते हासमाने अन्योन्यं जवेन स्पर्धमाने । यद्वा हृष्यंत्यावश्वे इव वडवे इव त्वरया गच्छंत्यौ परस्परं हृष्यंत्यौ । तथा गावेव शुभ्रे । यथा द्वे गावौ शोभमानौ वर्तेते तद्वच्छुभ्रे शोभमाने । किंच मातरा । यथा मातरौ धेनू रिहाणे । अंतर्णीतसनर्थो लिहिः । वत्सं जिह्वया लेढुमिच्छंत्यौ शीघ्रं गच्छतस्तद्वत्समुद्रं गंतुं जवाद्गच्छंत्यौ पयसा संयुक्ते विपाट् कूलविपाटनात् विपाशनाद्वा विमोचनाद्वा विपाट् । शुतुद्री शु क्षिप्रं तु तुन्ना तुन्नेव द्रवति गच्छतीति शुतुद्री । एतन्नामके नद्यौ प्रजवेते समुद्रं प्रति शीघ्रं गच्छतः । अत्र निरुक्तं । पर्वतानामुपस्थादुपस्थानादुशत्यौ कामयमाने अश्वे इव विमुक्ते इति वा विषण्णे इति वा हासमाने हासतिः स्पर्धायां हर्षमाणे वा गावाविव शुभ्रे शोभने मातरौ संरिहाणे विपाट्छुतुद्र्यौ पयसा प्रजवेते । नि० ९. ३९. । इति ॥ उशती । वश कांतौ । अस्य शतुर्ङित्त्वाद्ग्रहिज्यावयीत्यादिना संप्रसारणं । विषिते । षिञ् बंधन इत्यस्य कर्मणि निष्ठा । संहितायां परिनिविभ्यः सेवसितसयसिवुसहेत्यादिना । पा० ८. ३. ७०. । षत्वं । गतिरनंतर इति गतेः प्रकृतिस्वरः । हासमाने । हासतिः स्पर्धाकर्मा । हसे हसने वा । शानच् । तस्य लसार्वधातुकस्वरे कृते धातुस्वरः । रिहाणे । लिह आस्वादने । स्वरितेत्त्वादुभयपदी । शानच् । अदादित्वाच्छपो लुक् । लकारस्य रेफश्छांदसः । रेफमवलंब्य णत्वं । चित्त्वादंतोदात्तः । विपाट् पट गतौ पश बाधनस्पर्शनयोरिति वा ण्यंतावेतौ विपूर्वौ । शकारस्य व्रश्चादिना षत्वं । शुतुद्री । छांदसी रूपसिद्धिः । जवेते । जुङ् गतौ । भौवादिकः । ङित्त्वादात्मनेपदं । आतो ङित इतीयादेशः । निघातः ॥

इंद्रेषिते प्रसवं भिक्षमाणे अच्छा समुद्रं रथ्येव याथः । समाराणे ऊर्मिभिः पिन्वमाने अन्या वामन्यामप्येति शुभ्रे २

इंद्रेषिते इतींद्रऽइषिते । प्रऽसवं । भिक्षमाणे इति । अच्छ । समुद्रं । रथ्याऽइव । याथः ॥ समाराणे इति संऽआराणे । ऊर्मिऽभिः । पिन्वमाने इति । अन्या । वां । अन्यां । अपि । एति । शुभ्रे इति॥२॥

हे नद्यौ इंद्रेषिते इंद्रेण प्रेषिते प्रसवं तस्येंद्रस्यानुज्ञां भिक्षमाणे प्रार्थयमाने युवां समुद्रमच्छाभिमुख्येन याथः गच्छथः । तत्र दृष्टांतः । रथ्येवेति । यथा रथिनौ लक्ष्यं देशमभिगच्छतस्तद्वत् । किं कुर्वत्यौ । समाराणे परस्परं संगच्छंत्यावूर्मिभिस्तरंगैः पिन्वमाने परिसरप्रदेशं संतर्पयंत्यौ शुभ्रे शोभमाने । युवां समुद्रं गच्छथ इति पूर्वेणान्वयः । तथा वां युवयोर्मध्येऽन्यैकान्यामपरां नदीमप्येति अपि गच्छति । परस्परमैक्यमापद्यत इत्यर्थः ॥ इंद्रेषिते । इष गताविल्यस्य कर्मणि निष्ठायास्तीषसहेत्यादिना

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

इडागमः । तृतीया कर्मणीति पूर्वपदस्वरः । प्रसवं । षू प्रेरण इत्यस्याप् । थाथादिस्वरः । भिक्षमाणे । भिक्ष याञ्चायां । आत्मनेपदी । शानचो लसार्वधातुकस्वरेणानुदात्तत्वे धातुस्वरः । रथ्येव । रथस्येमौ । तस्येदमित्यर्थे रथाद्यदिति यत्प्रत्ययः । तित्स्वरितः । इवेन विभक्त्यलोपः । याथः । यातेर्लेटि रूपं । समाराणे । ऋ गतावित्यस्य लिट् । संपूर्वस्यार्तेः समो गमीत्यादिनात्मनेपदत्वात्तस्य कानजादेशः । ऋच्छत्यृतामिति गुणः । पिन्वमाने । पिवि सेचने । भूवादिः । लसार्वधातुकस्वरेण शानचोऽनुदात्तत्वे धातुस्वरः ॥

अच्छा सिंधुं मातृतमामयासं विपाशमुर्वीं सुभगामगन्म । वत्समिव मातरा संरिहाणे समानं योनिमनु संचरंती ॥ ३ ॥

अच्छं । सिंधुं । मातृऽतमां । अयासं । विऽपाशं । उर्वीं । सुऽभगां । अगन्म ॥ वत्संऽइव । मातरा । संरिहाणे इति संऽरिहाणे । समानं । योनिं । अनु । संचरंती इति संऽचरंती ॥ ३ ॥

हे नद्यौ मातृतमामतिशयेन मातरं सिंधुं स्रवंतीं शुतुद्रीं त्वामच्छाभिमुख्येनायासं विश्वामित्रोऽहं प्राप्तोऽभूवं । उर्वीं महतीं सुभगां सौभाग्यवतीं विपाशं त्वामगन्म वयं प्राप्ताः स्मः । किं कुर्वत्यौ । मातरा मातरौ द्वे धेनू वत्समिव संरिहाणे । अंतर्णीतसनर्थो लिहिः । जिह्वया लेढुमिच्छंत्यौ यथा वत्समनुगच्छतस्तद्वत् समानमेकं योनिं स्थानं समुद्रमनु अभिलक्ष्य संचरंती सम्यक् चरंत्यौ । युवामयासमिति पूर्वेणान्वयः ॥ अयासं । या प्रापण इत्यस्य रूपं । इडभावश्छांदसः । अगन्म । गमेर्लङि बहुलं छंदसीति शपो लुक् । म्वोश्चेति मकारस्य नकारः । निघातः । संचरंति । चरतिर्गत्यर्थः । तृतीयायुक्तत्वाभावादात्मनेपदाभावः । शतुर्लसार्वधातुकस्वरेणानुदात्तत्वे कृते धातुस्वरः ॥

एना वयं पयसा पिन्वमाना अनु योनिं देवकृतं चरंतीः । न वर्तवे प्रसवः सर्गतक्तः किंयुर्विप्रो नद्यो जोहवीति ॥ ४ ॥

एना । वयं । पयसा । पिन्वमानाः । अनु । योनिं । देवऽकृतं । चरंतीः ॥ न । वर्तवे । प्रऽसवः । सर्गऽतक्तः । किंऽयुः । विप्रः । नद्यः । जोहवीति ॥ ४ ॥

एवं स्तुते नद्यौ विश्वामित्रं प्रत्यूचतुः । एनैनेन पयसा पिन्वमानाः संतर्पयंत्यो देवकृतं देवेनेंद्रेण कृतं संदिष्टं योनिं स्थानं समुद्रमनु लक्षीकृत्य चरंतीर्गच्छंत्यो व-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यमास्महे । द्वयोर्बहुवचनं पूजार्थं । तासामस्माकं सर्गतक्तः सर्गे गमने प्रवृत्तः प्रसव उद्योगो न वर्त्तवे निवर्तनाय न भवति । किंयुः किमिच्छन्नसौ विप्रो ब्राह्मणो नद्यो नदीरस्मान् जोहवीति भृशमाह्वयति ॥ एना । इदंशब्दस्य तृतीयाया एनादेशः । सुपां सुलुगिति तृतीयाया आजादेशः । ऊडिदमिति विभक्तेरुदात्तत्वं । पिन्वमानाः । पिवि सेचने । देवकृतं । तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरः । वर्त्तवे । वृतु वर्तने । तुमर्थे तवेन्प्रत्ययः । नित्स्वरः । सर्गतक्तः । क्ते चेति पूर्वपदप्रकृतिस्वरः । किंयुः । किमिच्छन् । क्यचो मांताव्ययप्रतिषेध इति छांदसत्वादत्र प्रतिषेधो न भवतीति क्यच् क्याच्छंदसीत्युप्रत्ययः । प्रत्ययस्वरः । नद्यः । छांदसो यणादेशः । जोहवीति । ह्वयो यङ्लुक्यभ्यस्तस्य चेति संप्रसारणे कृते गुणो यङ्लुकोरित्यभ्यासस्य गुणः । यङो वेतीडागमः । गुणः । निघातः ॥

रमध्वं मे वचसे सोम्याय ऋतावरीरुप मुहूर्तमेवैः । प्र सिंधुमच्छा बृहती मनीषावस्युरह्वे कुशिकस्य सूनुः ॥ ५ ॥

रमध्वं । मे । वचसे । सोम्याय । ऋतऽवरीः । उप । मुहूर्तं एवैः ॥ प्र । सिंधुं । अच्छ । बृहती । मनीषा । अवस्युः । अह्वे । कुशिकस्य । सूनुः ॥ ५ ॥

विश्वामित्रो नदीः प्रतिब्रूते । ऋतावरीः । ऋतमुदकं । तद्वत्यो हे नद्यो यूयं मे विश्वामित्रस्य मम सोम्याय उत्तीर्याहं सोमं संपादयामीत्येवं सोमसंपादिने वचसे तदर्थमेवैः । पंचम्यर्थे तृतीया । शीघ्रगमनेभ्यो मुहूर्तं मुहूर्तमात्रमुपरमध्वं । उपपूर्वो रमिरुपसंहारे वर्तते । क्षणमात्रं शीघ्रगमनादुपरता भवत । सामान्येन नदीषूच्यमानासु समीहितं प्रयोजनमकुर्वतीषु पुरोवर्तिनीं शुतुद्रीं प्रति ब्रूते । कुशिकस्य राजर्षेः सूनुर्विश्वामित्रोऽहं बृहती महत्या मनीषा मनीषया स्तुत्यावस्युरात्मनो रक्षणमिच्छन् सन् सिंधुं शुतुद्रीं त्वामच्छाभ्याभिमुख्येन प्राह्वे प्रकर्षेणाह्वयामि । अत्र निरुक्तं । उपरमध्वं मे वचसे सोम्याय सोमसंपादिन ऋतावरीर्ऋतवत्य ऋतमित्युदकनाम प्रत्यृतं भवति मुहूर्तमेवैरयनैरवनैर्वा । प्राभिह्वयामि सिंधुं बृहत्या महत्या मनीषया मनस ईषया स्तुत्या प्रज्ञया वा वनाय कुशिकस्य सूनुः कुशिको राजा बभूव । नि० २. २५. । इति ॥ रमध्वं । रमु उपरमे । उपपूर्वाद्रमतेर्विभाषाकर्मकात् । पा० १. ३. ८५. । इत्यात्मनेपदं । ऋतावरीः । ऋतशब्दान्मत्वर्थे छंदसीवनिपाविति वनिप् । वनो रचेति ङीप् रेफश्चांतादेशः । वा छंदसीति सवर्णदीर्घः । आमंत्रितस्य पादादित्वात्षाष्ठिकमाद्युदात्तत्वं । एवैः । इण् गतौ । इण्शीङ्भ्यां वन् । आर्द्धधातुकलक्षणो गुणः । नित्स्वरः । बृहती मनीषा । उभयत्र तृतीयायाः पूर्वसवर्णदीर्घः । अवस्युः । अवो रक्षणमिच्छन् । सुप आ-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

त्मनः क्यच् । नः क्य इति नकारांतस्य पदसंज्ञाया नियमितत्वादत्र सकारस्य रुर्न भवति । क्याच्छंदसीत्युप्रत्ययः । अह्वे । ह्वयतेर्लुङि सिच आत्मनेपदेष्वन्यतरस्यां । पा० ३. १. ५४. । इत्यङादेशः । गुणः निघातः ॥

इंद्रो॑ अ॒स्माँ अ॑रदद्वज्र॑बाहु॒रपा॑हन्वृ॒त्रं प॑रि॒धिं न॒दीनां॑ ।
दे॒वो॑ऽनयत्सवि॒ता सु॑पा॒णिस्तस्य॑ व॒यं प्र॑स॒वे या॑म उ॒र्वीः ॥ ६ ॥

इंद्रः॑ । अ॒स्मान् । अ॒र॒द॒त् । वज्र॑ऽबाहुः । अप॑ । अ॒ह॒न् । वृ॒त्रं । प॒रि॒ऽधिं । न॒दीनां॑ ॥ दे॒वः । अ॒न॒य॒त् । स॒वि॒ता । सु॒ऽपा॒णिः । तस्य॑ । व॒यं । प्र॒ऽस॒वे । या॒म॒ः । उ॒र्वीः ॥ ६ ॥

नद्यः प्रत्यूचुः । हे विश्वामित्र वज्रबाहुः वज्रयुक्तो बाहुर्यस्यासौ वज्रबाहुः तादृशो बलवानिंद्रो नदीरस्मानरदत् । रदतिः खनतिकर्मा । अखनत् । कथमखनत् । उच्यते । नदीनां शब्दकारिणीनामपां परिधिं परितो निहितमुदकमंतः कृत्वा परितो वर्तमानमित्यर्थः । तादृशं वृत्रं । वृणोत्याकाशमिति वृत्रो मेघः । तं मेघमपाहन् जघान । तस्मिन् हत आपः पतिताः । ताभिर्गच्छंतीभिर्वयं खाताः । एवं मेघहननद्वारेणाखनत् । न केवलमखनत् किं तर्हि सविता सर्वस्य जगतः प्रेरकः सुपाणिः शोभनहस्त उत्पत्तिस्थितिकर्तृत्वात्तादृशो देवो द्योतमान इंद्रोऽस्माननयत् मेघभेदनं कृत्वोदकप्रेरणेन समुद्रमपूरयत् । तस्य तादृशसामर्थ्योपेतस्येंद्रस्य प्रसवेऽभ्यनुज्ञायां वर्तमाना उर्वीरुदकैः प्रभूता वयं यामः गच्छामः । न तव वचनादुपरमामहे । उक्तार्थे यास्को ब्रवीति । इंद्रो अस्मानरदद्वज्रबाहू । रदतिः खनतिकर्मापाहन्वृत्रं परिधिं नदीनामिति व्याख्यानं । देवोऽनयत्सविता सुपाणिः कल्याणपाणिः । पाणिः पणायतेः पूजाकर्मणः । प्रगृह्य पाणी देवान्पूजयंति । तस्य वयं प्रसवे याम ऊर्वीरुर्व्यः । नि० २. २६. । इति ॥ अरदत् । रदतेर्लङि रूपं । वज्रबाहुः । बहुव्रीहौ पूर्वपदस्वरः । अहन् । हंतेर्लङि रूपं । निघातः । परिधिं । डुधाञ् धारणपोषणयोरित्यस्मात्कर्मण्युपसर्गे घोः किरिति किप्रत्ययः । आतो लोपः । कृदुत्तरपदस्वरः । अनयत् । नयतेर्लङि रूपं । सुपाणिः । पण व्यवहारे स्तुतौ च । अशिपणाय्यो रुडायलुकौ च । उ० ४. १३४. । इतीण् । आयलुक् । बहुव्रीहौ नञ्सुभ्यामिति स्वरः । प्रसवे । षू प्रेरणे । ऋदोरविति भावेऽप्प्रत्ययः । थाथघञ्क्तेत्युत्तरपदांतोदात्तत्वं । यामः । या प्रापण इत्यस्य लटि रूपं । निघातः । उर्वीः । उरुशब्दाद्वोतो गुणवचनादिति ङीष् । वा छंदसीति सवर्णदीर्घः । प्रत्ययस्वरः ॥

प्र॒वाच्यं॑ शश्व॒धा वी॒र्यं१॒॑ तदिंद्र॑स्य॒ कर्म॒ यदहिं॑ विवृ॒श्चत् ।
वि वज्रे॑ण परि॒षदो॑ जघा॒नाय॒न्नापोऽय॑नमि॒च्छमा॑नाः ॥ ७ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रऽवाच्यं । शश्वधा । वीर्यं । तत् । इंद्रस्य । कर्म । यत् । अहिं । विऽवृश्चत् ॥ वि । वज्रेण । परिऽसदः । जघान । आयन् । आपः । अयनं । इच्छमानाः ॥ ७ ॥

योऽयमिंद्रोऽहिं मेघं विवृश्चत् उदकप्रेरणार्थं जघानेति यत्कर्म छेदनरूपं तदिदं तस्येंद्रस्य वीर्यं सामर्थ्यं शश्वधा सर्वदा प्रवाच्यं । प्रकर्षेण वचनीयं । तथा स इंद्रः परिषदः परितः सीदत आसीनान् प्रतिबंधकारिणोऽसुरान् वज्रेण विजघान । अथायनं स्थानमिच्छमाना इच्छंत्य आप आयन् यांति ॥ प्रवाच्यं । वच परिभाषण इत्यस्माद्दहलोर्ण्यदिति ण्यत् । णित्त्वादुपधावृद्धिः । वचोऽशब्दसंज्ञायां । पा० ६. ३. ६७. । इति कुत्वाभावः । व्यत्ययेनाद्युदात्तत्वं । यद्वा वाचयतेरचो यत् । यतोऽनाव इति स्वरः । शश्वधा । शश्वच्छब्दात्स्वार्थे धाप्रत्ययस्तकारलोपश्च द्रष्टव्यः । विवृश्चत् । ओव्रश्चू छेदने । तुदादिः । लङि ग्रहिज्यावयीत्यादिना संप्रसारणं । सह सुपेत्यत्र सहेति योगविभागात्समासः । समासस्वरः । परिषदः । क्विप् । संहितायां सदिरप्रतेरिति षत्वं । जघान । हंतेर्लिटि णलि रूपं । निघातः । आयन् । अय गतावित्यस्य लङि रूपं । पादादित्वादनिघातः । इच्छमानाः । इषु इच्छायामित्यस्माद्व्यत्ययेन शानच् । तस्य लसार्वधातुकस्वरे कृते प्रत्ययस्वरः ॥

एतद्वचो जरितर्मापि मृष्ठा आ यत्ते घोषानुत्तरा युगानि । उक्थेषु कारो प्रति नो जुषस्व मा नो नि कः पुरुषत्रा नमस्ते ॥ ८ ॥

एतत् । वचः । जरितः । मा । अपि । मृष्ठाः । आ । यत् । ते । घोषान् । उत्ऽतरा । युगानि ॥ उक्थेषु । कारो इति । प्रति । नः । जुषस्व । मा । नः । नि । करिति कः । पुरुषऽत्रा । नमः । ते ॥ ८ ॥

नद्यः प्रसंगादिंद्रस्तोत्रं कृत्वा विश्वामित्रं प्रत्यूचुः । जरितः स्तोतर्हे विश्वामित्र ते त्वदीयं यत्संवादात्मकं वचस्त्वं नोऽभीत्याघोषानुद्घोषयन्वर्तसे तद्वचो मापिमृष्ठाः मा विस्मार्षीः । किंकारणं । उत्तरा युगान्युत्तरेषु याज्ञिकेषु युगेष्वहःसूक्थेषु कारो शस्त्राणां कर्तस्त्वं नोऽस्मान्प्रति जुषस्व संवादात्मकेन तेन वाक्येन प्रतिसेवस्व । इदानीं नोऽस्मान् पुरुषत्रा पुरुषेषु मा निकः । उक्तिप्रत्युक्तिरूपसंवादवाक्याध्यापनेन नितरां पुंवत् प्रागल्भ्यं मा कार्षीः । ते तुभ्यं नमः ॥ मृष्ठाः । मृजूष् शुद्धावित्यस्य लङि व्यत्ययेनात्मनेपदं । अदादित्वाच्छपो लुक् । व्रश्चादिना षत्वं । निघातः । घोषान् । घुषिर् संशब्दन इत्यस्य शतरि सर्वविधीनां छंदसि विकल्पितत्वादतो गुण इति पररूपत्वाभावः । सवर्णदिर्घः । शतुर्लसार्वधातुकस्वरे कृते धातुस्वरः । युगानि ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

युजिर् योगे। उंछादिषु घञंतत्वेन निपातनादगुणत्वं। विशिष्टविषयं च निपातनमिष्यते। कालविशेषे रथाद्युपकरणे चेति तत्र पाठादेवांतोदात्तत्वं। कालाध्वनोरत्यंतसंयोग इति द्वितीया। कारो। करोतेः कृवापाजिमीत्यादिना उण्प्रत्ययः। आमंत्रितत्वान्निघातः। कः। करोतेर्लुङि च्लेर्मंत्रे घसेत्यादिना लुक्। हल्ङ्यादिना सिचो लोपः। न माङ्योग इत्यडभावः। पुरुषत्रा। देवमनुष्यपुरुषमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलमिति सप्तम्यर्थे त्राप्रत्ययः। प्रत्ययस्वरः॥

ओ षु स्वसारः कारवे शृणोत ययौ वो दूरादनसा रथेन। नि षू नमध्वं भवता सुपारा अधो अक्षाः सिंधवः स्रोत्याभिः॥ ९॥

ओ इति। सु। स्वसारः। कारवे। शृणोत। ययौ। वः। दूरात्। अनसा। रथेन॥ नि। सु। नमध्वं। भवत। सुऽपाराः। अधःऽअक्षाः। सिंधवः। स्रोत्याभिः॥ ९॥

विश्वामित्रो नदीः प्रत्युवाच। स्वसारो भगिन्यः सिंधवो हे नद्यः कारवे स्तोत्रं कुर्वाणस्य मम वचनं सु सुष्ठु ओ श्रृणोत श्रृणुतैव। अनसा शकटेन रथेन च सह दूराद्विप्रकृष्टाद्देशाद्वो युष्मान्ययौ प्राप्तोऽस्मि। यूयं सु सुष्ठु निनमध्वं आत्मना स्वयं प्रह्वा भवत। तथा सुपाराः। रथादीनां तीरात्सुखेनावरोहणारोहणे यथा स्यातां तथा शोभनरोधसश्च भवत। किंच यूयं स्रोत्याभिः स्रवणशीलाभिरद्भिरधो अक्षा रथांगस्याधस्ताद्भवत। यदापोऽक्षस्याधस्ताद्भवंति तदा रथादीनि नेतुं शक्यंते। तस्मात्तत्परिमाणोदका भवतेत्यभिप्रायः॥ ओ इति प्रगृह्यसंज्ञा। श्रृणोत। श्रु श्रवण इत्यस्य लोटि प्रत्ययस्य तप्तनप्तनथनाश्चेति तबादेशः। पित्त्वाद्गुणः, निघातः। ययौ। या प्रापण इत्यस्य भूतमात्रे लिट्युत्तमे णल्यात औ णल इत्यौकारः। एकादेशस्वरः। वः। युष्मच्छब्दस्य द्वितीयाया बहुवचनस्य वस्नसाविति वसादेशः। षू। निपातस्येति संहितायां दीर्घः। नमध्वं। णमु प्रह्वत्वे शब्दे चेत्यस्य कर्मकर्तरि न दुहस्नुनमां यक्चिणाविति प्रतिषेधाद्यगभावः। अधो अक्षाः। अधरशब्दस्य पूर्वाधरावराणामसि पुरधवश्चैषामित्यसिप्रत्ययोऽधादेशश्च। अक्षशब्दोऽशू व्याप्तावित्यस्मादशेर्देवने। उ० ३. ६५. । इति सप्रत्ययांतः। कृदुत्तरपदप्रकृतिस्वरः। सिंधवः। आमंत्रितत्वान्निघातः। स्रोत्याभिः। स्रोतःशब्दात्स्रोतसो विभाषा ड्यड्ड्यौ। पा० ४. ४. ११३. । इति ड्यप्रत्ययः। डित्वाट्टिलोपः। प्रत्ययस्वरः॥

आ ते कारो शृणवामा वचांसि ययाथ दूरादनसा रथेन। नि ते नंसै पीप्यानेव योषा मर्यायेव कन्या शश्वचै ते॥१०॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

आ। ते। कारो इति। शृणवाम। वचांसि। ययाथ। दूरात्। अनसा। रथेन॥ नि। ते। नंसै। पीप्यानाऽइव। योषा। मर्याय-ऽइव। कन्या। शश्वचै। ते इति ते॥ १०॥

नद्यः पूर्वं विश्वामित्रवाक्यं प्रत्याख्यायानयर्चा तस्य वाक्यमाशुश्रुवुः। कारो स्तोत्रं कुर्वाण हे विश्वामित्र ते तव वचांसीमानि वाक्यान्याश्रृणवाम कार्त्स्न्येन श्रृणुमः। तव समीहितं प्रयोजनं कुर्म इत्यर्थः। अनसा शकटेन रथेन च सह ययाथ यतो दूरादागतोऽसि। वयं च ते त्वदर्थं निनंसै नीचैर्नमाम। प्रत्येकविवक्षयात्रैकवचनं। रथेन गंतुं गाधोदका भवामेत्यर्थः। तत्र दृष्टांतः। पीप्यानेव योषा। पीप्याना पुत्रं स्तनं पाययंती योषा माता यथा प्रह्वीभवति। दृष्टांतांतरं यथा कन्या युवतिर्मर्यायेव मनुष्याय पित्रे भ्रात्रे वा शश्वचै परिष्वजनाय नम्रा भवति तद्वत्ते त्वदर्थं प्रह्वीभवामः। ते इति पुनरुक्तिरादरार्थं। एतामृचं यास्क एवं व्याचष्टे। आश्रृणवाम ते कारो वचनानि याहि दूरादनसा च रथेन च निनमाम ते पाययमानेव योषा पुत्रं मर्यायेव कन्या परिष्वजनाय निनमा इति वा। नि० २. २७.। इति॥ कारो। संबुद्धौ शाकल्यस्येतौ। पा० १. १. १६.। इति प्रगृह्यसंज्ञा। श्रृणवाम। श्रु श्रवण इत्यस्य लोट्याडुत्तमस्य पिच्चेत्याडागमः। पित्त्वाद्गुणः। निघातः। ययाथ। या प्रापण इत्यस्य भूतमात्रे लिटि थल्येकाच उपदेशेऽनुदात्तादितीट्प्रतिषेधः। लित्स्वरः। अनसा। सहार्थे तृतीया। नंसै णमु प्रह्वत्व इत्यस्य लेट्युत्तमे लेटि सिब्बहुलमिति सिप्। वैतोऽन्यत्रेत्यैकारादेशः। निघातः। पीप्यानेव। पीङ् पान इत्यस्यान्तर्भावितण्यर्थस्य लिटि कानचि रूपं। चित्स्वरः। योषा। यु मिश्रणे। वृतॄवदिहनीत्यादिना। उ० ३. ६२.। सप्रत्ययः। यौतीति योषा। वृषादित्वादाद्युदात्तः। शश्वचै। ष्वञ्ज परिष्वंग इत्यस्मात्संपदादिलक्षणो भावे क्विप्। पृषोदरादित्वादिष्टरूपसिद्धिरंतोदात्तश्च॥

यदंग त्वा भरताः संतरेयुर्गव्यन्ग्राम इषित इंद्रजूतः। अर्षादह प्रसवः सर्गतक्त आ वो वृणे सुमतिं यज्ञियानां ११

यत्। अंग। त्वा। भरताः। संऽतरेयुः। गव्यन्। ग्रामः। इषितः। इंद्रऽजूतः॥ अर्षात्। अह। प्रऽसवः। सर्गऽतक्तः। आ। वः। वृणे। सुऽमतिं। यज्ञियानां॥ ११॥

विश्वामित्रो नदीः प्रत्युवाच। अंगेत्यामंत्रणे। हे नद्यो यद्यस्माद्युष्माभिरुत्तितीर्षोर्ममोत्तरणमभ्यनुज्ञातं तस्माद्भरता भरतकुलजा मदीयाः सर्वे त्वा परस्परमेकतामापन्नां नदीं त्वां संतरेयुः सम्यगुत्तीर्णा भवेयुः। तदेव विशिनष्टि। गव्यम् गा

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

उदकानि तरीतुमिच्छन्निषितस्त्वयाभ्यनुज्ञात इंद्रजूतो युष्माकं प्रवर्तकेणेंद्रेण च प्रेरितो ग्रामो भरतानां संघोऽर्षात् संचरेत् । यतः सर्गतक्तो गमनाय प्रवृत्तः प्रसवस्तेषामुद्योगोऽह पूर्वं युष्माभिरनुज्ञातः । अहं तु यज्ञियानां यज्ञार्हाणां वो युष्माकं सुमतिं शोभनां स्तुतिमा वृणे सर्वतः संभजे ॥ भरताः । भरतशब्दादुत्सादित्वादञ् । तस्य यञञोश्चेति लुक् । अतच् । प्रत्ययस्वरः । संतरेयुः । तरतेर्लिङि जुसि रूपं । झेर्लसार्वधातुकस्वरे धातुस्वरः । तिङि चोदात्तवतीति गतेर्निघातः । गव्यन् । गा आत्मन इच्छन् । सुपः क्यच् । एकादेशस्वरः । ग्रामः । ग्रसतेरा च । उ० १. १४१. । इति मन्प्रत्यय आकारादेशश्च नित्स्वरः । इंद्रजूतः । जू इति सौत्रो धातुर्गत्यर्थः । श्र्युकः कितीति निष्ठायामिट्प्रतिषेधः । तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरः । अर्षात् । ऋषी गतावित्यस्य लेटि तिपि सिब्बहुलमिति सिप् । लेटोऽडागमः । एकाच इतीट्प्रतिषेधः । गुणः । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः । वृणे । वृङ् संभक्तावित्यस्य लटि रूपं । यज्ञियानां । यज्ञर्त्विग्भ्यां घखञाविति घप्रत्ययः । प्रत्ययस्वरः ॥

अतारिषुर्भरता गव्यवः समभक्त विप्रः सुमतिं नदीनां । प्र पिन्वध्वमिषयंतीः सुराधा आ वक्षणाः पृणध्वं यात शीभं ॥ १२ ॥

अतारिषुः । भरताः । गव्यवः । सं । अभक्त । विप्रः । सुऽमतिं । नदीनां ॥ प्र । पिन्वध्वं । इषयंतीः । सुऽराधाः । आ । वक्षणाः । पृणध्वं । यात । शीभं ॥ १२ ॥

गव्यवो गा आत्मन इच्छंतो भरता भरतकुलजाः सर्वेऽतारिषुः तां नदीं समतरन् । विप्रो मेधावी विश्वामित्रो नदीनां सुमतिं शोभनां स्तुतिं समभक्त समभजत । यूयं तु यथापूर्वमिषयंतीः कुल्यादिद्वारान्नं कुर्वाणा अत एव सुराधाः शोभनधनोपेता यूयं वक्षणाः कृत्रिमसरितः कुल्याः प्र पिन्वध्वं प्रकर्षेण तर्पयत आपृणध्वं । ताः सर्वतः पूरयत च । शीभं शीघ्रं यात गच्छत च ॥ अतारिषुः । तॄ प्लवनतरणयोरित्यस्य लुङि सिचि वृद्धिः परस्मैपदेष्विति वृद्धिः । अडागमस्वरः । गव्यवः । सुपः क्यच् क्याच्छंदसीत्युप्रत्ययः । तस्य स्वरः । अभक्त । भज सेवायामित्यस्य लुङि सिचो झलो झलीति लोपः । पादादित्वादनिघातः । पिन्वध्वं । पिवि सेचन इत्यस्य लोटि रूपं । निघातः । इषयंतीः इषं कुर्वत्यः । तत्करोतीति णिच् । णाविष्ठवत्प्रातिपदिकस्येतीष्ठवद्भावाट्टेरिति टिलोपः । वा छंदसीति सवर्णदीर्घः । प्रत्ययस्वरः । पृणध्वं । पृण प्रीणने । लोटि रूपं । व्यत्ययेनात्मनेपदं । वाक्यभेदादनिघातः । यात या प्रापण इत्यस्य लोटि रूपं । अत्रापि न निघातः । शीभं । शीभृ कत्थने । श्लाघ्यतेऽनेन तद्वानिति करणे घञ् । ञित्स्वरः ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

उद्व॑ ऊ॒र्मिः शम्या॑ ह॒न्त्वापो॒ योक्त्रा॑णि मुंचत । मादु॑ष्कृतौ॒ व्ये॑नसा॒घ्न्यौ॑ शून॒मार॑तां ॥ १३ ॥

उत् । व॒ः । ऊ॒र्मिः । शम्याः॑ । ह॒न्तु । आपः॑ । योक्त्रा॑णि । मु॒ंच॒त ॥
मा । अदुः॑ऽकृतौ । विऽए॑नसा । अ॒घ्न्यौ । शूनं॑ । आ । अ॒र॒तां ॥ १३॥

पूर्वमुत्तितीर्षुर्विश्वामित्रो नदीरुक्त्वाधुनोत्तितीर्षुः पुनराह । हे नद्यो वो युष्माकमूर्मिस्तरंगः शम्या युगकीला युग्यकठपार्श्वादिसंलग्ना रज्जव उदूर्ध्वं यथा भवंति तथा हंतु गच्छतु । स तरंगो रज्जूनामधो गच्छत्वित्यभिप्रायः । तथा हे आपो यूयं योक्त्राणि ता रज्जूर्मुंचत । यथा न स्पृशंति तथा यांत्वित्यभिप्रायः । व्येनसा विगतपापे अत एवादुष्कृतौ कल्याणकर्मकारिण्यौ अघ्न्यावघ्न्ये न केनापि तिरस्करणीये विपाट्छुतुद्र्यौ रथानां शूनं समृद्धिमारतां आगच्छतां । एवं विश्वामित्रो नदीः स्तुत्वा ताभिरनुज्ञातोऽतरदिति ॥ ऊर्मिः । ऋ गतौ । अर्तेरूच्चेति मिप्रत्ययः ऊरित्ययमादेशो धातोः । ऋच्छतीत्यूर्मिः । प्रत्ययस्वरः । शम्याः । शमु उपशमे । पोरदुपधादिति यत्प्रत्ययः । यतोऽनाव इत्याद्युदात्तत्वं । हंतु । हन हिंसागत्योरित्यस्य लोटि रूपं । निघातः । योक्त्राणि । युजिर् योगे । करणे दाम्नीशसयुयुजेत्यादिना ष्ट्रन्प्रत्ययः । नित्स्वरः। मुंचत । मुच्लृ मोक्षणे । निघातः । अदुष्कृतौ । इसुसोः सामर्थ्ये इति विसर्जनीयस्य षत्वं । व्येनसा । बहुव्रीहौ पूर्वपदस्वरः । सुपो डादेशः । अघ्न्यौ । हन हिंसागत्योरित्यस्य नञ्पूर्वस्याघ्न्यादयश्चेति निपातनाद्यक् । कित्त्वादुपधालोपः । हो हंतेरिति घत्वं । सर्वविधीनां छंदसि विकल्पितत्वादत्रौङः शीभावाभावः । एकादेशस्वरः । शूनं । श्वयतेर्नपुंसके भावे क्त इति क्तः । यजादित्वात्संप्रसारणं । हल इति दीर्घत्वं । ओदितश्चेति निष्ठानत्वं । निष्ठा च द्व्यजनादित्याद्युदात्तः । अरतां । ऋ गतावित्यस्य लुङि च्लेः सर्तिशास्त्यर्तिभ्यश्चेत्यङादेशः । ऋदृशोऽङि गुणः । न माङ्योग इत्यडभावः । निघातः ॥

(मं० ३ सू० ४२.)

१३.

उप॑ नः सु॒तमा ग॑हि॒ सोम॑मिंद्र॒ गवा॑शिरं । हरि॑भ्यां॒ यस्ते॑ अस्म॒युः ॥ १ ॥

उप॑ । न॒ः । सु॒तं । आ । ग॒हि॒ । सोम॑ । इं॒द्र॒ । गोऽआ॑शिरं ॥
हरि॑ऽभ्यां । यः । ते॒ । अ॒स्म॒ऽयुः ॥ १ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

हे इंद्र नोऽस्मदीयं सुतमभिषुतं गवाशिरं पयसा मिश्रितं सोमं प्रति उपागहि समीप आगच्छ । यतो हरिभ्यामश्वाभ्यां युक्तस्तव रथोऽस्मयुरस्मान्कामयमानो वर्तते॥ गवाशिरं । अङ्पूर्वस्य श्रीणातेः क्विप्यपस्पृधेथामानृचुरित्यादिनाशिर इत्यादेशः । बहुव्रीहौ पूर्वपदस्वरः ॥

तमिंद्र मदमा गहि बर्हिःष्ठां ग्रावभिः सुतं । कुविन्न्वस्य तृप्णवः ॥ २ ॥

तं । इंद्र । मदं । आ । गहि । बर्हिःऽस्थां । ग्रावऽभिः । सुतं ॥ कुवित् । नु । अस्य । तृप्णवः ॥ २ ॥

हे इंद्र ग्रावभिः सुतमभिषुतं बर्हिःष्ठां बर्हिषि स्थितं मदं । मद्यतेऽनेनेति मदः सोमः । तमिमं सोममागहि आगच्छ । कुवित्प्रभूतं यथा भवति तथास्य सोमस्य पाने नु क्षिप्रं तृप्णवः तृप्तो भव ॥ मदं । मदी हर्षे । मदोऽनुपसर्ग इत्यप्प्रत्ययः । तस्य पित्त्वादनुदात्तत्वे धातुस्वरः । बर्हिःष्ठां । ष्ठा गतिनिवृत्तौ । क्विप् । संहितायां पूर्वपदसकारस्यादेशप्रत्यययोरिति षत्वं । ष्टुत्वं । कृदुत्तरपदस्वरः । तृप्णवः । तृप प्रीणन इत्यस्य लेट्यडागमः । कुवियोगादनिघातः । क्षुभ्नादिषु तृमनतप्नोतीति पठितं । तथापि सर्वविधीनां छंदसि विकल्पितत्वादत्र णत्वप्रतिषेधो न भवति । प्रत्ययस्वरः ॥

इंद्रमित्था गिरो ममाच्छागुरिषिता इतः । आवृते सोमपीतये ॥ ३ ॥

इंद्रं । इत्था । गिरः । मम । अच्छ । अगुः । इषिताः । इतः ॥ आऽवृते । सोमऽपीतये ॥ ३ ॥

हे इंद्र इषितास्त्वदर्थं प्रेरिता इत्थेत्थमनेन प्रकारेणोच्यमाना मम गिरः स्तुतिलक्षणा वाच इंद्रं त्वामितोऽस्माद्देवयजनदेशादच्छागुः आभिमुख्येन गच्छंतु । किमर्थं । सोमपीतये सोमपानार्थमावृते त्वामावर्तयितुं इत्था । इदंशब्दात्था हेतौ च छंदसीति व्यत्ययेन थाप्रत्ययः । इदम एतेतौ रथोरितीदित्यादेशः । प्रत्ययस्वरः । अच्छ । अच्छ गत्यर्थवदेष्विति गतिसंज्ञा । अगुः । इण् गतावित्यस्य लुङि रूपं । निघातः ॥

इंद्रं सोमस्य पीतये स्तोमैरिह हवामहे । उक्थेभिः कुविदागमत् ॥ ४ ॥

इंद्रं । सोमस्य । पीतये । स्तोमैः । इह । हवामहे ॥ उक्थेभिः । कुवित् । आऽगमत् ॥ ४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स्तोमैस्त्रिवृत्पंचदशादिस्तोमसाध्यैः स्तोत्रैरुक्थेभिरुक्थैः शस्त्रैश्चेह कर्मणि सोमस्य प्रीतये सोमपानार्थमिंद्रं हवामहे वयमाह्वयामः । कुविद्बहुवारमाहूतः स इंद्र आगमत् यज्ञं प्रत्यागच्छतु । आगमत् । गमेर्लेट्यडागमः । आगमा अनुदात्ता इत्यटोऽनुदात्तत्वाद्धातुस्वरः । तिङि चोदात्तवतीति गतेर्निघातः । कुवियोगादनिघातः ॥

इंद्र सोमाः सुता इमे तान्दधिष्व शतक्रतो । जठरे वाजिनीवसो ॥ ५ ॥

इंद्र । सोमाः । सुताः । इमे । तान् । दधिष्व । शतक्रतो इति शतऽक्रतो ॥ जठरे । वाजिनीवसो इति वाजिनीऽवसो ॥ ५ ॥

हे शतक्रतो इंद्र इमे सोमाः सुताः ग्रावभिस्त्वदर्थमभिषुताः । हे वाजिनीवसो अन्नधन । यद्वा वाजोऽन्नमासु फलत्वेनास्तीति वाजिन्यः क्रियाः । तासां वासक हे इंद्र तान्सोमरसान् जठरे दधिष्व धारय ॥ वाजिनीवसो । वाजशब्दान्मत्वर्थेऽत इनिठनावितीनिप्रत्ययः । ऋन्नेभ्यो ङीबिति ङीप् । तासां वसो । संबुद्धौ चेति गुणः । आमंत्रितत्वादाष्टमिकमनुदात्तत्वं ॥

विद्मा हि त्वा धनंजयं वाजेषु दधृषं कवे । अधा ते सुम्नमीमहे ॥ ६ ॥

विद्म । हि । त्वा । धनम्ऽजयं । वाजेषु । दधृषं । कवे ॥ अध । ते । सुम्नं । ईमहे ॥ ६ ॥

हे कवे क्रांतदर्शिन्निंद्र वाजेषु युद्धेषु दधृषं शत्रूणामभिभवितारं अत एव धनंजयं । धनं जयतीति धनंजयः । तादृशं त्वा त्वां विद्म हि जानीमः खलु । अथानंतरं ते तव सुम्नं धनमीमहे याचामहे ॥ विद्म । विदेर्लटि विदो लटो वेति मसो मादेशः । पादादित्वादनिघातः । धनंजयं । जि जय इत्यस्माद्धन उपपदे संज्ञायां भृतॄवृजिधारिसहितपिदम इति खच्प्रत्ययः । अरुर्द्विषदजंतस्य मुमिति पूर्वपदस्य मुमागमः । चित्त्वादंतोदात्तः । दधृषं । ञिधृषा प्रागल्भ्य इत्यस्य यङ्लुक्यभ्यासस्य रीगागमाभावश्छांदसः । तदंतात्पचाद्यचि यङोऽचि चेति यङो लुक् लघूपधगुणे प्राप्ते न धातुलोप इति तस्य प्रतिषेधः । चित्त्वादंतोदात्तः ॥

इममिंद्र गवाशिरं यवाशिरं च नः पिब । आगत्या वृषभिः सुतं ॥ ७ ॥

इमं । इंद्र । गोऽआशिरं । यवऽआशिरं । च । नः । पिब ॥ आऽगत्य । वृषऽभिः । सुतं ॥ ७ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

हे इंद्र गवाशिरं गव्यमिश्रणोपेतं सोमं तथा यवाशिरं यवमिश्रणोपेतं ग्रावभिर्ग्रावभिः सुतमभिषुतं नोऽस्मदीयमिमं सोमं देवयजनमागत्य पिब ॥ गवाशिरं यवाशिरमित्यत्र आङ्पूर्वस्य श्रीणातेः क्विप्यपस्पृधेथामानृचुरित्यादिनाशिर् इत्यादेशः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः ॥

तुभ्येदिंद्र स्व ओक्ये सोमं चोदामि पीतये । एष रारंतु ते हृदि ॥ ८ ॥

तुभ्यं । इत् । इंद्र । स्वे । ओक्ये । सोमं । चोदामि । पीतये ॥ एषः । ररंतु । ते । हृदि ॥ ८ ॥

हे इंद्र तुभ्येत्तुभ्यमेव पीतये पानार्थं स्वे स्वकीय ओक्ये स्थाने जठरेऽभिषुतमिमं सोमं चोदामि प्रेरयामि । एष पीतः सोमस्ते तव हृदि हृदये ररंतु अत्यर्थं रमतां ॥ तुभ्यं । युष्मच्छब्दस्य चतुर्थ्येकवचने तुभ्यमह्याविति तुभ्यादेशः। सुपां सुलुगिति सुपो लुक् । ङयि चेत्याद्युदात्तः । ओक्ये । वस्त्रादित्वात्स्वार्थिको यत्प्रत्ययः । तित्स्वरितः । चोदामि । चुद प्रेरणे । ण्यंतस्य लटि रूपं । बहुलमन्यत्रापीति णेर्लुक् । निघातः । ररंतु । रमु क्रीडायामित्यस्य यङ्लुकि लोटि सर्वविधीनां छंदसि विकल्पितत्वादत्राभ्यासस्य नुमभावः । संहितायामन्येषामपीत्यभ्यासस्य दीर्घः । निघातः । हृदि । हृदयशब्दस्य पद्दन्नोमास् हृदित्यादिना हृदादेशः । ऊडिदमिति विभक्तेरुदात्तत्वं ॥

त्वां सुतस्य पीतये प्रत्नमिंद्र हवामहे । कुशिकासो अवस्यवः ॥ ९ ॥

त्वां । सुतस्य । पीतये । प्रत्नं । इंद्र । हवामहे ॥ कुशिकासः । अवस्यवः ॥ ९ ॥

हे इंद्र अवस्यवस्त्वत्तो रक्षणमिच्छंतः कुशिकासः कुशिकगोत्रोत्पन्ना वयं सुतस्य ग्रावभिरभिषुतस्य सोमस्य पीतये पानार्थं प्रत्नं पुरातनं त्वां हवामहे स्तुतिलक्षणाभिर्गीर्भिराह्वयामः ॥ पीतये । स्थागापापचो भाव इति क्तिन् । हिष्ठवत्सरतिशत्थांतानां । फि० १. ७. । इत्यंतोदात्तत्वं । हवामहे । ह्वयतेर्लटि बहुलं छंदसीति संप्रसारणे रूपं । अवस्यवः । अव इच्छंतीत्यत्रार्थे सुपः क्यच् । क्याच्छंदसीत्युप्रत्ययः । कुशिकासो अवस्यव इत्यत्र संहितायामव्यादवद्यादित्यादिना । पा० ६. १. ११६. । एङः प्रकृतिभावः ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(मं० ४ सू० ३०.)

१४.

नकिरिंद्र त्वदुत्तरो न ज्यायाँ अस्ति वृत्रहन् । नकिरेवा यथा त्वं ॥ १ ॥

नकिः । इंद्र । त्वत् । उत्ऽतरः । न । ज्यायान् । अस्ति । वृत्रऽहन् ॥ नकिः । एव । यथा । त्वं ॥ १ ॥

हे वृत्रहन्निंद्र वृत्रस्य नाशकेंद्र । लोक एकोऽपीति शेषः । त्वत्त्वत्त उत्तर उत्कृष्टतरो नकिरस्ति न भवति । त्वत्तो ज्यायान् प्रशस्यतर एकोऽपि नास्ति । हे इंद्र त्वं लोके यथा प्रसिद्धो भवसि तथाविध एकोऽपि नकिरेवास्ति नैव भवति । कश्चिदपि लोक इंद्रसदृशो नास्तीत्यर्थः ॥

सत्रा ते अनु कृष्टयो विश्वा चक्रेव वावृतुः । सत्रा महाँ असि श्रुतः ॥ २ ॥

सत्रा । ते । अनु । कृष्टयः । विश्वा । चक्राऽइव । ववृतुः ॥ सत्रा । महान् । असि । श्रुतः ॥ २ ॥

हे इंद्र कृष्टयः प्रजास्ते त्वामनुलक्षीकृत्य सत्रा सत्यमेव वव्रृतुः वर्तते । तत्र दृष्टांतः । विश्वा विश्वानि व्याप्तानि चक्रेव चक्राणीव । यथा चक्राणि शकटमनुवर्तते तद्वत् हे इंद्र महांस्त्वं सत्रा सत्यमेव श्रुतो विश्रुतोऽसि गुणैः प्रख्यातो भवसि ॥

विश्वे चनेदना त्वा देवास इंद्र युयुधुः । यदहा नक्तमातिरः ॥ ३ ॥

विश्वे । चन । इत् । अना । त्वा । देवासः । इंद्र । युयुधुः ॥ यत् । अहा । नक्तं । आ । अतिरः ॥ ३ ॥

हे इंद्र विश्वे चनेत्सर्वे एव देवासोऽसुरान्विजिगीषवो देवा अना प्राणरूपेण बलेन त्वा त्वां सहायं लब्ध्वा युयुधुः असुरैः सह युद्धं चक्रुः । यद्यस्मात्कारणादहा अहःसु नक्तं रात्रिषु चातिरः आ समंतात् शत्रूनवधीः।अतःकारणाद्युयुधुरिति पूर्वेण संबंधः॥

यत्रोत बाधितेभ्यश्चक्रं कुत्साय युध्यते । मुषाय इंद्र सूर्यं ॥ ४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

यत्र । उत । बाधितेभ्यः । चक्रं । कुत्साय । युध्यते ॥ मुषायः । इंद्र । सूर्यं ॥ ४ ॥

यत्र यस्मिन्युद्धे उतापि च हे इंद्र त्वं वाधितेभ्यः कुत्ससहायेभ्यो युध्यते युद्धं कुर्वते कुत्साय च सूर्यं सूर्यसंवंधि चक्रं मुषायः अमुष्णाः । अपहृतवानसीत्यर्थः। तस्मिन्युद्धे प्रावः शचीभिरेतशमिति परेण संबंधः ॥

यत्र देवाँ ऋघायतो विश्वाँ अयुध्य एक इत् । त्वमिंद्र वनूँरहन् ॥ ५ ॥

यत्र । देवान् । ऋघायतः । विश्वान् । अयुध्यः । एकः । इत् ॥ त्वं । इंद्र । वनून् । अहन् ॥ ५ ॥

हे इंद्र त्वमेक इदसहाय एव यत्र यस्मिन् संग्रामे देवानिंद्रादीनृघायतो बाधमानान्विश्वान् सर्वान्राक्षसादीनयुध्यः युद्धमकरोः । तथा वनून् हिंसकानहन् अवधीः ॥

यत्रोत मर्त्याय कमरिणा इंद्र सूर्यं । प्रावः शचीभिरेतशं ॥ ६ ॥

यत्र । उत । मर्त्याय । कं । अरिणाः । इंद्र । सूर्यं ॥ प्र । आवः । शचीभिः । एतशं ॥ ६ ॥

यत्र यस्मिन् संग्रामे उतापि च हे इंद्र त्वं मर्त्याय मनुष्यायैतशाख्याय ऋषये सूर्यमरिणाः अहिंसीः । कमिति पूरणः । तदानीं शचीभिर्युद्धकर्मभिरेतशमेतत्संज्ञकमृषिं प्रावः प्रकर्षेणारक्षः ॥

किमादुतासि वृत्रहन्मघवन्मन्युमत्तमः । अत्राह दानुमातिरः ॥ ७ ॥

किं । आत् । उत । असि । वृत्रऽहन् । मघऽवन् । मन्युमत्ऽतमः ॥ अत्र । अह । दानुं । आ । अतिरः ॥ ७ ॥

हे वृत्रहन् वृत्राणामावरकाणां तमसां हंतर्मघवन्धनवन्निंद्र त्वमादनंतरमेव उतापि च । किमिति प्रश्ने । मन्युमत्तमोऽसि अत्यंतं क्रोधवान् भवसि । अत्रास्मिन्नंतरिक्षेऽहैवं दानुं दनोः पुत्रं वृत्रमातिरः । आ समंतादहिंसीः ॥

एतद्घेदुत वीर्यमिंद्र चकर्थ पौंस्यं । स्त्रियं यद्दुर्हणायुवं वधीर्दुहितरं दिवः ॥ ८ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

एतत् । घ । इत् । उत । वीर्यं । इंद्र । चकर्थ । पौंस्यं ॥ स्त्रियं । यत् । दुःऽहना । युवं । वधीः । दुहितरं । दिवः ॥ ८ ॥

हे इंद्र उतापि च यद्यस्त्वमेतदुपलक्षितं पौंस्यं बलं वीर्यं सामर्थ्योपेतं चकर्थ कृतवानसि घेदिति पूरणौ । किंच दुर्हणायुवं दुष्टं हननमिच्छितीं दिवो दुहितरं द्युलोकसकाशादुत्पन्नां स्त्रियमुषसं वधीः अवधीः ॥

दिवश्चिद्घा दुहितरं महान्महीयमानां । उषासमिंद्र संपिणक् ॥ ९ ॥

दिवः । चित् । घ । दुहितरं । महान् । महीयमानां ॥ उषसं । इंद्र । सं । पिणिक् ॥ ९ ॥

हे इंद्र महांस्त्वं दिवो दुहितरं द्युलोकस्य पुत्रीं महीयमानां पूज्यमानामुषसमुषोदेवीं संपिणक् चिद्घ संपिष्टवानसि खलु ॥

अपोषा अनसः सरत्संपिष्टादह बिभ्युषी । नि यत्सीं शिश्नथद्वृषा ॥ १० ॥

अप । उषाः । अनसः । सरत् । संऽपिष्टात् । अह । बिभ्युषी ॥ नि । यत् । सीं । शिश्नथत् । वृषा ॥ १० ॥

वृषा कामानां वर्षितेंद्रो यद्यदा सीमेतदुषःसंबंधि शकटं निशिश्नथत् न्यवधीत् तदोषा उषोदेवता बिभ्युषींद्रसकाशाद्भीता सती संपिष्टादिंद्रेण संचूर्णितादनसः शकटादपसरत् अपजगाम । अहेति पूरणः ॥

एतदस्या अनः शये सुसंपिष्टं विपाश्या । ससार सीं परावतः ॥ ११ ॥

एतत् । अस्याः । अनः । शये । सुऽसंपिष्टं । विऽपाशि । आ ॥ ससार । सीं । पराऽवतः ॥ ११ ॥

सुसंपिष्टमिंद्रेण सुष्ठु संचूर्णितमस्या उषसः संबंध्येतदनः शकटं विपाशि विपाडाख्या नदी तस्यां तत्तीर आशये आ समंताच्छेते अशेत । सीमियमुषोदेवता शकटे भग्ने सति परावतो दूरदेशात्ससार अपससार ॥

उत सिंधुं विबाल्यं वितस्थानामधि क्षमि । परि ष्ठा इंद्र मायया ॥ १२ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

उत । सिंधुं । विऽब्राल्यं । विऽतस्थानां । अधि । क्षमि ॥ परि । स्थाः । इंद्र । मायया ॥ १२ ॥

हे इंद्र उतापि च विबाल्यं विगतबाल्यावस्थां संपूर्णजलां वितस्थानां वितिष्ठमानां सिंधुं नदीमधिक्षमि क्षमायां मायया प्रज्ञया परिष्ठाः पर्यस्थाः सर्वतः स्थापनं कृतवानसि ॥

उत शुष्णस्य धृष्णुया प्र मृक्षो अभि वेदनं । पुरो यदस्य संपिणक् ॥ १३ ॥

उत । शुष्णस्य । धृष्णुऽया । प्र । मृक्षः । अभि । वेदनं ॥ पुरः । यत् । अस्य । संऽपिणक् ॥ १३ ॥

उतापि च हे इंद्र धृष्णुया धर्षकस्त्वं शुष्णस्य शुष्णनाम्नोऽसुरस्य संबंधि वेदनं वित्तमभि अभितः सर्वतः प्र मृक्षः प्रकर्षेणाबाधथाः । यद्यदास्य शुष्णस्य पुरः पुराणि नगराणि संपिणक् संपिष्टवानसि तदा प्र मृक्ष इति संबंधः ॥

उत दासं कौलितरं बृहतः पर्वतादधि । अवाहन्निंद्र शंबरं ॥ १४ ॥

उत । दासं । कौलिऽतरं । बृहतः । पर्वतात् । अधि ॥ अव । अहन् । इंद्र । शंबरं ॥ १४ ॥

उतापि च हे इंद्र त्वं दासमुपक्षपयितारं कौलितरं कुलितरनाम्नोऽपत्यं शंबरमसुरं बृहतो महतः पर्वतादद्रेरध्युपरि अव अवाचीनं कृत्वाहन् हतवानसि ॥

उत दासस्य वर्चिनः सहस्राणि शतावधीः । अधि पंच प्रधीँरिव ॥ १५ ॥

उत । दासस्य । वर्चिनः । सहस्राणि । शता । अवधीः ॥ अधि । पंच । प्रधीन्ऽइव ॥ १५ ॥

उतापि च हे इंद्र त्वं प्रधीनिव चक्रस्य परितःस्थितान् शंकूनिव हिंसकान्पंच शता पंचशतानि पंचशतसंख्याकान् सहस्राणि सहस्रसंख्याकान्दासस्य लोकानामुपक्षपयितुर्वर्चिनो वर्चिनामकस्यासुरस्य संबंधिनोऽनुचरान्पुरुषानध्यधिकमवधीः हतवानसि ॥

उत त्यं पुत्रमग्रुवः परावृक्तं शतक्रतुः । उक्थेष्विंद्र आभजत् ॥ १६ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

उत । त्वं । पुत्रं । अग्रुवः । पराऽवृक्तं । शतऽक्रतुः ॥ उक्थेषु । इंद्रः । आ । अभजत् ॥ १६ ॥

उतापि च शतक्रतुरिंद्रस्त्वं तं प्रसिद्धमग्रुव एतन्नाम्न्याः पुत्रं परावृक्तमेतन्नामकमुक्थेषु स्तोत्रेष्वाभजत् भागिनं कृतवान् । अयमर्थो वम्रीभिः पुत्रमग्रुवः । ऋग्वे० ४. १९. ९. । इत्यस्यामृचि प्रतिपादित इति ॥

उत त्या तुर्वशायदू अस्नातारा शचीपतिः । इंद्रो विद्वाँ अपारयत् ॥ १७ ॥

उत । त्या । तुर्वशायदू इति । अस्नातारा । शचीऽपतिः ॥ इंद्रः । विद्वान् । अपारयत् ॥ १७ ॥

उतापि च अस्नातारास्नातारौ ययातिशापादनभिषिक्तौ त्या त्यौ तौ प्रसिद्धौ तुर्वशायदू तुर्वशनामानं यदुनामकं च राजानौ शचीपतिः कर्मणां पालकः । यद्वा शचींद्रस्य भार्या तस्याः पतिर्भर्ता विद्वान् सकलमपि जानन्निंद्रोऽपारयत् अभिषेकार्हावकरोत् ॥

उत त्या सद्य आर्या सरयोरिंद्र पारतः । अर्णा चित्ररथावधीः ॥ १८ ॥

उत । त्या । सद्यः । आर्या । सरयोः । इंद्र । पारतः ॥ अर्णा । चित्ररथा । अवधीः ॥ १८ ॥

उतापि च सद्यः सपदि हे इंद्र त्वं त्या त्यौ तावार्यावार्यत्वाभिमानिनौ संतावपि। इंद्रविषयभक्तिश्रद्धारहितावित्यर्थः । सरयोः सरय्वा नद्याः पारतः पारे तीरे वसंतावर्णा चित्ररथा अर्णनामकं चित्ररथनामकं च राजानाववधीः अहिंसीः ॥

अनु द्वा जहिता नयोऽधं श्रोणं च वृत्रहन् । न तत्ते सुम्नमष्टवे ॥ १९ ॥

अनु । द्वा । जहिता । नयः । अंधं । श्रोणं । च । वृत्रऽहन् ॥ न । तत् । ते । सुम्नं । अष्टवे ॥ १९ ॥

हे वृत्रहन् वृत्रस्य हिंसकेंद्र त्वं जहिता जहितौ सर्वैर्बंधुभिस्त्यक्तावंधं चक्षुर्हीनमेकं श्रोणं च पंगुमपरं च द्वा एतौ द्वावनुनयः अंधपंगुत्वपरिहारेणानुनीतवानसि । हे इंद्र ते त्वया दत्तं तत्सुम्नं सुखमष्टवे व्याप्तुं कोऽपि न प्रभवतीति शेषः ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

शतमश्मन्मयीनां पुरामिंद्रो व्यास्यत् । दिवोदासाय दाशुषे ॥ २० ॥

शतं । अश्मन्ऽमयीनां । पुरां । इंद्रः । वि । आस्यत् ॥ दिवःऽदासाय । दाशुषे ॥ २० ॥

इंद्रोऽश्मन्मयीनां पाषाणैर्निर्मितानां पुरां शंबरस्य संबंधिनां नगराणां शतं शतसंख्याकं दिवोदासायैतन्नामकाय दाशुषे हविर्दत्तवते यजमानाय व्यास्यत् व्यक्षिपत् ॥

अस्वापयद्दभीतये सहस्रा त्रिंशतं हथैः । दासानामिंद्रो मायया ॥ २१ ॥

अस्वापयत् । दभीतये । सहस्रा । त्रिंशतं । हथैः ॥ दासानां । इंद्रः । मायया ॥ २१ ॥

इंद्रो मायया स्वकीयया शक्त्या दासानां लोकानामुपक्षपयितॄणां राक्षसादीनां त्रिंशतं त्रिंशत्संख्याकानि सहस्रा सहस्राणि दभीतये दभीतिनामकस्यार्थाय हथैर्हननसाधनैरायुधैरस्वापयत् अवधीत् ॥

स घेदुतासि वृत्रहन्त्समान इंद्र गोपतिः । यस्ता विश्वानि चिच्युषे ॥ २२ ॥

सः । घ । इत् । उत । असि । वृत्रऽहन् । समानः । इंद्र । गोऽपतिः ॥ यः । ता । विश्वानि । चिच्युषे ॥ २२ ॥

उतापि च हे इंद्र यस्त्वं ता तानि विश्वा विश्वानि समस्तान् शत्रून् चिच्युषे प्राच्यावयः । हे वृत्रहन् वृत्राणां शत्रूणां हिंसकेंद्र गोपतिर्गवां पालकः स त्वं समानः सर्वेषां यजमानानां समः सन् प्रख्यातोऽसि । घेदिति पूरणौ ॥

उत नूनं यदिंद्रियं करिष्या इंद्र पौंस्यं । अद्या नकिष्टदामिनत् ॥ २३ ॥

उत । नूनं । यत् । इंद्रियं । करिष्याः । इंद्र । पौंस्यं ॥ अद्य । नकिः । तत् । आ । मिनत् ॥ २३ ॥

उतापि च हे इंद्र यत्पौंस्यं त्वदीयं बलमिंद्रियं सामर्थ्योपेतं नूनं करिष्याः कृतवानसि खलु । अद्याद्यतनः कश्चित्तद्बलं नकिरामिनत् न हिंस्यात् ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वामं वामं त आदुरे देवो ददात्वर्यमा। वामं पूषा वामं भगो वामं देवः करूळती ॥ २४ ॥

वामंऽवामं। ते। आऽदुरे। देवः। ददातु। अर्यमा ॥ वामं। पूषा। वामं। भगः। वामं। देवः। करूळती ॥ २४ ॥

हे आदुरे शत्रूणां दारयितरिंद्र ते तव वामं वामं यद्यद्वननीयं संभजनीयं धनमस्ति लोके तद्वामं वस्वर्यमारीणां नियमयितैतन्नामको देवो ददातु प्रयच्छतु। तथा करूळती कृत्तदंतः पूषा पोषको देवो वामं धनं ददातु। भगोपि धनं ददातु। अत्र करूळतीत्येतत्संनिहितत्वाद्भग इत्यनेन संबंधनीयं। अथवार्यमादीनां त्रयाणामपि विशेषणत्वेन भाव्यं। कथं पूष्णो विशेषणं स्यादिति साकांक्षत्वात् न। सांनिध्याकांक्षयोः सद्भावेऽपि योग्यतामंतरेणान्वयायोगात्। तस्मात्पूषा प्रपिष्टभागोऽदंतको हीत्यादिश्रुतिषु पूष्ण एवादंतकत्वेन प्रसिद्धेर्व्यवहितस्यापि तस्यैव विशेषणत्वं युक्तं। वामं वननीयं भवतीत्यादि निरुक्तं। ६. ३१.। अत्र द्रष्टव्यं ॥

(मं० ५ सू० १)

१६.

अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासं। यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सिस्रते नाकमच्छ १

अबोधि। अग्निः। संऽइधा। जनानां। प्रति। धेनुंऽइव। आऽयतीं। उषसं ॥ यह्वाःऽइव। प्र। वयां। उत्ऽजिहानाः। प्र। भानवः। सिस्रते। नाकं। अच्छ ॥ १ ॥

अयमग्निर्जनानामध्वर्य्वादीनां समिधा समिद्भिरबोधि प्रबुद्धोऽभूत् धेनुमिव। अग्निहोत्रार्थधेनुं प्रति यथा प्रातर्बुध्यते तद्वदायतीमागच्छंतीमुषसं प्रति। उषःकाल इत्यर्थः। अथ प्रबुद्धस्याग्नेर्भानवो ज्वाला यह्वा महांतो वयां शाखां प्रोज्जिहानाः प्रोद्गमयंतो वृक्षा इव प्रोज्जिहानाः स्वाधिष्ठानं त्यजन्तो नाकमंतरिक्षमच्छाभिमुख्येन प्रसिस्रते प्रसरंति ॥

अबोधि होता यजथाय देवानूर्ध्वो अग्निः सुमनाः प्रातरस्थात्। समिद्धस्य रुशददर्शि पाजो महान् देवस्तमसो निरमोचि ॥ २ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

अबोधि । होता । यजथाय । देवान् । ऊर्ध्वः । अग्निः । सुऽमनाः । प्रातः । अस्थात् ॥ संऽइद्धस्य । रुशत् । अदर्शि । पाजः । महान् । देवः । तमसः । निः । अमोचि ॥ २ ॥

अयं होता होमनिष्पादकोऽग्निर्देवान्यष्टव्यान्यजथाय यष्टुमबोधि बुध्यते । सोऽग्निः प्रातःकाले सुमनाः शोभनमनस्को यजमानानुग्रहबुद्धिः सन् ऊर्ध्वोऽस्थात् उत्तिष्ठति । समिद्धस्यास्य रुशद्रोचमानं पाजो बलं ज्वालालक्षणमदर्शि दृश्यते । अथ तथाभूतो महान्देवस्तमसोंऽधकारान्निरमोचि निर्मुक्तोऽभूत् ॥

यदीं गणस्य रशनामजीगः शुचिरंक्ते शुचिभिर्गोभिरग्निः । आद्दक्षिणा युज्यते वाजयंत्युत्तानामूर्ध्वो अधयज्जुहूभिः ॥ ३॥

यत् । ईं । गणस्य । रशनां । अजीगरिति । शुचिः । अंक्ते । शुचिऽभिः । गोभिः । अग्निः ॥ आत् । दक्षिणा । युज्यते । वाजऽयंती । उत्तानां । ऊर्ध्वः । अधयत् । जुहूभिः ॥ ३ ॥

यद्यदा ईमयमग्निर्गणस्य संघात्मकस्य जगतो रशनां रज्जुरिव व्यापारप्रतिबंधकं तमोऽजीगर्गिरति गृह्णाति वा । समिद्धो भवतीत्यर्थः । तदा शुचिर्दीप्तोऽग्निः शुचिभिर्गोभिर्दीप्तै रश्मिभिरंक्ते व्यनक्ति विश्वं जगत् । आदनंतरमेव दक्षिणा प्रवृद्धा वाजयंत्यन्नमिच्छंत्याज्यधारा युज्यते युक्ता भवति । अथवा दक्षिणा प्रवृद्धाज्यधारा युज्यते। तां च धारामुत्तानामूर्ध्वंतानामुपरि विस्तृतामूर्ध्व उन्नतः सन् जुहूभिरधयत् पिबति ॥

अग्निमच्छा देवयतां मनांसि चक्षूंषीव सूर्ये सं चरंति । यदीं सुवाते उषसा विरूपे श्वेतो वाजी जायते अग्रे अह्नां ४

अग्निं । अच्छ । देवऽयतां । मनांसि । चक्षूंषिऽइव । सूर्ये । सं । चरंति ॥ यत् । ईं । सुवाते इति । उषसा । विरूपे इति विऽरूपे । श्वेतः । वाजी । जायते । अग्रे । अह्नां ॥ ४ ॥

अग्निं देवमच्छाभिमुख्येन देवयतां देवानात्मन इच्छतां यजमानानां मनांसि संचरंति । देवा यष्टव्यास्तदर्थं कदायं वर्धिष्यतीति ध्यायंतीत्यर्थः । चक्षूंषीव सर्वेषां प्राणिनां यथा सूर्ये संचरंति तद्वत् । यद्यदाईमेनमग्निमुषसा सह विरूपे द्यावापृथिव्यौ सुवाते जनयतः तदानीं श्वेतः प्रकृष्टवर्णोपेतो वाजी वेजनवानग्निरह्नाय उदयकाले जायते । प्रवर्धंत इत्यर्थः ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

जनिष्ट हि जेन्यो अग्रे अह्नां हितो हितेष्वरुषो वनेषु ।
दमेदमे सप्त रत्ना दधानोऽग्निर्होता नि षसादा यजीयान् ५

जनिष्ट । हि । जेन्यः । अग्रे । अह्नां । हितः । हितेषु । अरुषः । वनेषु ॥ दमेऽदमे । सप्त । रत्ना । दधानः । अग्निः । होता । नि । ससाद । यजीयान् ॥ ५ ॥

अयमग्निर्जेन्य उत्पादनीयोऽह्नामग्र उदयकालेऽजनिष्ट प्रादुरभूत् । पश्चात् हितेषु वनेषु वनोत्थेषु काष्ठेष्वरुष आरोचमानः सन् हितः स्थापितः । पश्चाद्दमे दमे तत्तद्यागगृहे सप्त रत्ना रमणीयाः सप्तज्वाला दधानो धारयमाणः। अथवा यजमानेभ्यः सप्तविधानि रत्नानि दधानोऽग्निर्होता होमनिष्पादकः सन् यजीयान्यष्टव्यः सन् निषसाद निषण्णो भवति ॥

अग्निर्होता न्यसीदद्यजीयानुपस्थे मातुः सुरभा उ लोके ।
युवा कविः पुरुनिष्ठ ऋतावा धर्ता कृष्टीनामुत मध्य इद्धः ६

अग्निः । होता । नि । असीदत् । यजीयान् । उपऽस्थे । मातुः । सुरभौ । ऊं इति । लोके ॥ युवा । कविः । पुरुनिःऽस्थः । ऋतऽवा । धर्ता । कृष्टीनां । उत । मध्ये । इद्धः ॥ ६ ॥

अयमग्निर्होता होमनिष्पादकः सन् यजीयान्यष्टव्यश्च सन् न्यसीदत् निषसाद । कुत्रेति तदुच्यते । मातुः सर्वस्य निर्मातुर्भूम्या उपस्थ उत्संगे तत्रापि सुरभावाज्यादिसौरभ्ययुक्ते लोके सर्वैर्द्रष्टव्ये स्थाने वेदिलक्षणे । उतापि च युवा नित्यतरुणः सर्वत्र मिश्रितो वा कविर्मेधावी पुरुनिष्ठो बहुस्थान ऋतावा यज्ञवान्धर्ता सर्वस्य धारक एवंभूतः सन् कृष्टीनामृत्विग्यजमानानां मध्य इद्धः दीप्तः सन् वर्तत इति शेषः ॥

प्र णु त्यं विप्रमध्वरेषु साधुमग्निं होतारमीळते नमोभिः ।
आ यस्ततान रोदसी ऋतेन नित्यं मृजंति वाजिनं घृतेन ७

प्र । नु । त्यं । विप्रं । अध्वरेषु । साधुं । अग्निं । होतारं । ईळते । नमःऽभिः ॥ आ । यः । ततान । रोदसी इति । ऋतेन । नित्यं । मृजंति । वाजिनं । घृतेन ॥ ७ ॥

त्यं तमग्निं नमोभिः स्तुतिभिर्नु क्षिप्रमीळते स्तुवंति । कीदृशं तं । विप्रं मेधाविनमध्वरेषु साधुं फलसाधकं होतारं होमनिष्पादकं । यो देवो रोदसी द्यावापृथि-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

व्यावृतेनोदकेनातताान विस्तारितवान् । अग्नौ प्रास्ताहुतेरादित्यद्वारा वृष्ट्युत्पादकत्वात्। अथवा ऋतेन सत्यभूतेन हविषा दिवं तथाभूतेन वृष्ट्यादिफलेन भुवं चाततान। वाजिनमन्नवंतं देवं यजमाना नित्यं घृतेनोदकेनाज्येन वा मृजंति परिचरंति ॥

मार्जाल्यो मृज्यते स्वे दमूनाः कविप्रशस्तो अतिथिः शिवो नः। सहस्रशृंगो वृषभस्तदोजा विश्वाँ अग्ने सहसा प्रास्यन्यान् ॥ ८ ॥

मार्जाल्यः। मृज्यते। स्वे। दमूनाः। कविऽप्रशस्तः। अतिथिः। शिवः। नः॥ सहस्रऽशृंगः। वृषभः। तत्ऽओजाः। विश्वान्। अग्ने। सहसा। प्र। असि। अन्यान् ॥ ८ ॥

मार्जाल्यः संमार्जनीयोऽयमग्निर्मृज्यते परिचर्यते स्वे स्वकीये स्थाने। कीदृशोऽयं। दमूना दानमना दांतमना वा कविप्रशस्तः कविभिर्मेधाविभिः प्रशस्तः प्रकर्षेण स्तुत्यो नोऽस्माकमतिथिवत्पूज्यः शिवः सुखकरश्च । सहस्रशृंगोऽपरिमितज्वालो वृषभो वर्षिता फलानां तदोजाः यत्प्रसिद्धं बलं तेजो वास्ति तदेवौजो यस्य तादृशः। सर्वबलस्वरूप इत्यर्थः । अथ प्रत्यक्षवादः । हे अग्ने विश्वानन्यान् स्वव्यतिरिक्तान् सर्वान् सहसा बलेन प्रासि। प्रेति परेत्यर्थे। पराभवसि व्याप्तुं वा प्रभवसि ॥

प्र सद्यो अग्ने अत्येष्यन्यानाविर्यस्मै चारुतमो बभूथ। ईळेन्यो वपुष्यो विभावा प्रियो विशामतिथिर्मानुषीणां ॥९॥

प्र। सद्यः। अग्ने। अति। एषि। अन्यान्। आविः। यस्मै। चारुऽतमः। बभूथ॥ ईळेन्यः। वपुष्यः। विभाऽवा। प्रियः। विशां। अतिथिः। मानुषीणां ॥ ९ ॥

हे अग्ने त्वं यज्ञमासाद्य सद्यस्तदानीमेवान्यान् स्वसमानानत्येषि अतिक्रामसि । यस्मै चारुतमः सन्नाविर्बभूथ। किंच त्वमीळेन्यः स्तुत्यो वपुष्यो वपुष्करो दीप्तिकरो वा विभावा विशिष्टदीप्तिमान् प्रियः प्रियभूतो विशां सर्वेषां प्राणिनां तथातिथिः पूज्यो मानुषीणां प्रजानां भवसि ॥

तुभ्यं भरंति क्षितयो यविष्ठ बलिमग्ने अंतित ओत दूरात्। आ भंदिष्ठस्य सुमतिं चिकिद्धि बृहत्ते अग्ने महि शर्म भद्रं ॥ १० ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तुभ्यं । भरंति । क्षितयः । यविष्ठ । बलिं । अग्ने । अंतितः । आ । उत । दूरात् ॥ आ । भंदिष्ठस्य । सुऽमतिं । चिकिद्धि । बृहत् । ते । अग्ने । महि । शर्म । भद्रं ॥ १० ॥

हे यविष्ठ युवतमाग्ने तुभ्यं क्षितयो मनुष्या भरंति संपादयंति । किं । बलिं पूजां हविर्लक्षणामंतितोऽतिकादुतापि च दूरात् । आ इति चार्थे । किंच भंदिष्ठस्यातिशयेन स्तोतुः सुमतिं स्तुतिमाचिकिद्धि आजानीहि । हे अग्ने ते तव शर्म सुखमस्मभ्यं दातव्यं बृहन्महद्भद्रं स्तुत्यं च ॥

आद्य रथं भानुमो भानुमंतमग्ने तिष्ठं यजतेभिः समंतं । विद्वान्पथीनामुर्व१ंतरिक्षमेह देवान्हंविरद्याय वक्षि ॥ ११ ॥

आ । अद्य । रथं । भानुऽमः । भानुऽमंतं । अग्ने । तिष्ठ । यजतेभिः । संऽअंतं ॥ विद्वान् । पथीनां । उरु । अंतरिक्षं । आ । इह । देवान् । हविःऽअद्याय । वक्षि ॥ ११ ॥

हे भानुमो दीप्तिमन्नग्ने अद्यास्मिन्यागदिने भानुमंतं दीप्तिमंतं समंतं समीचीनप्रांतोपेतं रथं यजतेभिर्यष्टव्यैर्देवैः सहातिष्ठ आरोह । विद्वान्यष्टव्यदेवपरिज्ञानवांस्त्वं पथीनां देवयजनमार्गान्प्रति । द्वितीयार्थे षष्ठी । उर्वंतरिक्षं प्रभूतेंऽतरिक्षे देवान्यष्टव्यान्हविरद्याय हविर्भक्षणायेहावक्षि आवहसि ॥

अवोचाम कवये मेध्याय वचो वंदारु वृषभाय वृष्णे । गविष्ठिरो नमसा स्तोममग्नौ दिवीव रुक्ममुरुव्यंचमश्रेत् ॥ १२ ॥

अवोचाम । कवये । मेध्याय । वचः । वंदारु । वृषभाय । वृष्णे ॥ गविष्ठिरः । नमसा । स्तोमं । अग्नौ । दिविऽइव । रुक्मं । उरुऽव्यंचं । अश्रेत् ॥ १२ ॥

वयमात्रेयाः कवये मेधाविने मेध्याय मेधार्हाय वृषभाय वर्षकाय फलानां वृष्णे सेक्त्रे यूने वंदारु वंदनशीलं वचः स्तोत्रमवोचाम । अथ ऋषिरात्मानं परोक्षेणैव निर्दिश्य स्तुतिमुपसंहरति गविष्ठिरोऽयमृषिर्नमसा नमस्कारेण हविषा वा युक्तं स्तोमं स्तोत्रमग्नावश्रेत् श्रयतिस्म । दिवि रुक्मं रोचमानमुरुव्यंचमुरुगमनमादित्यमिव ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

(मं० ५ सू० ६३)

१६.

ऋतस्य गोपावधि तिष्ठथो रथं सत्यधर्माणा परमे व्योमनि । यमत्र मित्रावरुणावथो युवं तस्मै वृष्टिर्मधुमत्पिन्वते दिवः ॥ १ ॥

ऋतस्य । गोपौ । अधि । तिष्ठथः । रथं । सत्यऽधर्माणा । परमे । विऽओमनि ॥ यं । अत्र । मित्रावरुणा । अवथः । युवं । तस्मै । वृष्टिः । मधुऽमत् । पिन्वते । दिवः ॥ १ ॥

हे ऋतस्योदकस्य गोपौ रक्षितारौ सत्यधर्माणा सत्यधर्माणौ युवां रथमधितिष्ठथः आरोहथोऽस्मद्यज्ञमागमनार्थं । कुत्र । परमे व्योमनि निरतिशय आकाशे । हे मित्रावरुणौ युवं युवामत्रास्मिन्यज्ञे यं यजमानमवथो रक्षथः तस्मै यजमानाय वृष्टिः पर्जन्यो मधुमदुदकं दिवो द्युलोकात्पिन्वते सिंचति वर्धयति ॥

सम्राजावस्य भुवनस्य राजथो मित्रावरुणा विदथे स्वर्दृशा । वृष्टिं वां राधो अमृतत्वमीमहे द्यावापृथिवी वि चरंति तन्यवः ॥ २ ॥

सम्ऽराजौ । अस्य । भुवनस्य । राजथः । मित्रावरुणा । विदथे । स्वःऽदृशा ॥ वृष्टिं । वां । राधः । अमृतऽत्वं । ईमहे । द्यावापृथिवी इति । वि । चरंति । तन्यवः ॥ २ ॥

हे मित्रावरुणौ सम्राजौ सम्यग्राजमानौ युवामस्य भुवनस्य राजथः ईशाथे । स्वर्दृशा स्वर्गस्य द्रष्टारौ युवां विदथेऽस्मद्यज्ञे सम्राजाविति संबंधः । वां युवां वृष्टिं राधो धनं वृष्ट्याख्यं धनममृतत्वं स्वर्गं चेमहे प्रार्थयामहे । युवयोस्तन्यवो विस्तृता रश्मयो द्यावापृथिवी वि चरंति विविधं प्राप्नुवंति । अथवा वृष्टिं धनममृतत्वं चेमहे ॥

सम्राजा उग्रा वृषभा दिवस्पती पृथिव्या मित्रावरुणा विचर्षणी । चित्रेभिरभ्रैरुप तिष्ठथो रवं द्यां वर्षयथो असुरस्य मायया ॥ ३ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

संऽराजौ । उग्रा । वृषभा । दिवः । पती इति । पृथिव्याः । मित्रावरुणा । विचर्षणी इति विऽचर्षणी ॥ चित्रेभिः । अभ्रैः । उप । तिष्ठथः । रवं । द्यां । वर्षयथः । असुरस्य । मायया ॥ ३ ॥

सम्राजौ सम्यग्राजमानावुग्रोद्गूर्णवलौ वृषभा वर्षितारौ दिवो द्युलोकस्य पती स्वामिनौ पृथिव्याश्च पती विचर्षणी सर्वस्य द्रष्टारौ मित्रावरुणौ । एवं महानुभावौ चित्रेभिश्चायनीयैरभ्रैर्मेघैः सह रवं स्तोत्रमुपतिष्ठथः । पश्चात् द्यां च वर्षयथोऽसुरस्योदकनिरसितुः पर्जन्यस्य मायया प्रज्ञया सामर्थ्येन ॥

माया वां मित्रावरुणा दिवि श्रिता सूर्यो ज्योतिश्चरति चित्रमायुधं । तमभ्रेण वृष्ट्या गूहथो दिवि पर्जन्य द्रप्सा मधुमंत ईरते ॥ ४ ॥

माया । वां । मित्रावरुणा । दिवि । श्रिता । सूर्यः । ज्योतिः । चरति । चित्रं । आयुधं ॥ तं । अभ्रेण । वृष्ट्या । गूहथः । दिवि । पर्जन्य । द्रप्साः । मधुऽमंतः । ईरते ॥ ४ ॥

हे मित्रारुणा वां युवयोर्माया दिवि श्रिता आश्रिता । कैषा युवयोर्मायोच्यते । सूर्यः सर्वस्य प्रेरको ज्योतिर्दीप्यमानश्चित्रं चायनीयमायुधमुक्तलक्षणायुधरूपश्चरति परिभ्रमत्यंतरिक्षे । शत्रुमारकत्वादायुधमुच्यते । तं सूर्यमभ्रेण मेघेन वृष्ट्या दिवि गूहथः गोपायथः । हे पर्जन्य देव त्वया मित्रावरुणाभ्यां प्रेरितेन मधुमंतो द्रप्सा आपः ईरते ईर्यते । त्वत्स्रष्टा वा गच्छंति ॥

रथं युंजते मरुतः शुभे सुखं शूरो न मित्रा वरुणा गविष्टिषु । रजांसि चित्रा वि चरंति तन्यवो दिवः सम्राजा पयसा न उक्षतं ॥ ५ ॥

रथं । युंजते । मरुतः । शुभे । सुऽखं । शूरः । न । मित्रावरुणा । गोऽइष्टिषु ॥ रजांसि । चित्रा । वि । चरंति । तन्यवः । दिवः । संऽराजा । पयसा । नः । उक्षतं ॥ ५ ॥

हे मित्रावरुणौ युवयोरनुग्रहात् मरुतः शुभ उदकार्थं सुखं शोभनाक्षद्वारं रथं युंजते अश्वैर्योजयंति । शूरो न शूर इव । स यथा युद्धार्थं रथं युनक्ति तद्वत् । गविष्टिषु गवामुदकानामेषणेषु निमित्तेषु चित्रा चायनीयानि रजांसि लोकान् त-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

न्यवस्ततास्ते मरुतो वि चरंति विविधं चरंति । तस्मात्तैः सहितौ हे सम्राजा युवां दिवो द्युलोकात्पयसोदकेन नोऽस्मानुक्षतं सिंचतं ॥

वाचं सु मित्रावरुणाविरावतीं पर्जन्यश्चित्रां वदति त्विषीमतीं। अभ्रा वसत मरुतः सुमायया द्यां वर्षयतमरुणामरेपसं ॥ ६ ॥

वाचं । सु । मित्रावरुणौ । इरावतीं । पर्जन्यः । चित्रां । वदति । त्विषिऽमतीं ॥ अभ्रा । वसत । मरुतः । सु । मायया । द्यां । वर्षयतं । अरुणां । अरेपसं ॥ ६ ॥

हे मित्रावरुणौ युवयोरनुग्रहात् पर्जन्यो मेघः सु सुष्ठिरावतीमन्नवतीमन्नसाधिकां चित्रां चायनीयां त्विषीमतीं दीप्तिमतीं वाचं गर्जनशब्दं वदति शब्दयति वृष्ट्यर्थं। मरुतश्चाभ्राऽभ्राणि मेघान् सु सुष्ठु वसत आच्छादयंति मायया स्वप्रज्ञया । युवां च पर्जन्येन मरुद्भिश्च सहारुणामरुणवर्णामरेपसमपापां वृष्ट्यविघातिनीं द्यां वर्षयतं ॥

धर्मणा मित्रावरुणा विपश्चिता व्रता रक्षेथे असुरस्य मायया। ऋतेन विश्वं भुवनं वि राजथः सूर्यमा धत्थो दिवि चित्र्यं रथं ॥ ७ ॥

धर्मणा । मित्रावरुणा । विपःऽचिता । व्रता । रक्षेथे इति । असुरस्य । मायया ॥ ऋतेन । विश्वं । भुवनं । वि । राजथः । सूर्यं । आ । धत्थः । दिवि । चित्र्यं । रथं ॥ ७ ॥

हे मित्रावरुणा विपश्चिता प्राज्ञौ युवां धर्मणा जगद्धारकेण वृष्ट्यादिलक्षणेन कर्मणा व्रता यज्ञादिकर्माणि रक्षेथे पालयथः । असुरस्य मेघानां निरसितुः पर्जन्यस्य मायया प्रज्ञया च ऋतेनोदकेन यज्ञेन वा निमित्तेन विश्वं भुवनं सर्वं भूतजातं विराजथः । विदीपयथ इत्यर्थः । सूर्यमा सूर्यं च । चित्र्यं पूज्यं रथं रंहणस्वभावं दिवि द्युलोके धत्थः धारयथो जगदुपकारार्थं ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(मं० ५ सू० ७३)

१७.

यद॒द्य स्थः प॑रा॒वति॒ यद॑र्वा॒वत्य॑श्विना । यद्वा॑ पु॒रू पु॑रु-
भु॒जा॒ यद॒॑न्तरि॑क्ष॒ आ ग॑तं ॥ १ ॥

यत् । अ॒द्य । स्थः । प॒रा॒ऽवति॑ । यत् । अ॒र्वा॒ऽवति॑ । अ॒श्वि॒ना ॥
यत् । वा॒ । पु॒रु । पु॒रु॒ऽभु॒जा॒ । यत् । अ॒न्तरि॑क्षे । आ । ग॒तं॒ ॥ १ ॥

हे पुरुभुजा बहुषु यज्ञेषु भोक्तारावधिकं रक्षितारौ वा हे अश्विना यदद्याद्यास्मिन् काले परावत्यत्यंतं दूरदेशे द्युलोके स्थो भवथः । यद्वा अर्वावत्यरणवति गंतुं शक्ये प्रदेशेंऽतिके स्थः । यद्यदि वा अथवा पुरु बहुप्रदेशेषु स्थः । यद्यदि अंतरिक्षे स्थः तस्मात्सर्वस्माद्द्यागतं आगच्छतं ॥

इ॒ह त्या पु॑रु॒भूत॑मा पु॒रू दंसां॑सि॒ बिभ्र॑ता । व॒र॒स्या या॒-
म्यध्रि॑गू हु॒वे तु॒विष्ट॑मा भु॒जे ॥ २ ॥

इ॒ह । त्या । पु॒रु॒ऽभूत॑मा । पु॒रु । दंसां॑सि । बिभ्र॑ता । व॒र॒स्या ।
या॒मि॒ । अध्रि॑गू॒ इत्यध्रि॑ऽगू । हु॒वे । तु॒विः॒ऽत॑मा । भु॒जे ॥ २ ॥

इहास्मिन्यज्ञे त्या तौ पुरुभूतमा पुरूणां बहूनां यजमानानां भावयितृतमौ पुरु पुरूणि दंसांसि कर्माणि बिभ्रता धारयंतौ वरस्या वरणीयावध्रिगू अन्यैरधृतगमनकर्माणौ यामि उपागच्छामि । तुविष्टमा प्रभूततमौ भुजे भोगाय पालनाय वा हुवे आह्वयामि ॥

ई॒र्मान्यद्वपु॑षे॒ वपु॑श्च॒क्रं रथ॑स्य येमथुः । पर्य॒न्या नाहु॑षा
यु॒गा म॒ह्ना रजां॑सि दीयथः ॥ ३ ॥

ई॒र्मा । अ॒न्यत् । वपु॑षे । वपुः॑ । च॒क्रं । रथ॑स्य । ये॒म॒थुः॒ ॥ परि॑ ।
अ॒न्या । नाहु॑षा । यु॒गा । म॒ह्ना । रजां॑सि । दी॒य॒थः॒ ॥ ३ ॥

हे अश्विनौ युवां रथस्य युष्मदीयस्यान्यच्चक्रमीर्मा । अर्तेरीर्मेति रूपं । गंतर्यादित्ये वपुषे तस्य शोभायै वपुर्वपुष्मत् तेजोवत् चक्रं येमथुः नियमितवंतौ स्थः । अन्यान्येन चक्रेण मह्ना महत्त्वेन स्वसामर्थ्येन नाहुषा युगा । नहुषा मनुष्याः तेषां युगा युगोपलक्षितान् कालान् प्रातरादिसवनान् अहोरात्रादिका-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

लान्वा रजांसि लोकांश्च परिदीयथः परिगच्छथः । न्य१घ्न्यस्य मूर्द्धनि चक्रं रथस्य येमथुः । ऋग्वे० १. ३०. १९. । इत्युक्तं ॥

तदू षु वामेना कृतं विश्वा यद्वामनु ष्टवे । नाना जाता-वरेपसा समस्मे बंधुमेयथुः ॥ ४ ॥

तत् । ऊ इति । सु । वां । एना । कृतं । विश्वा । यत् । वां । अनु । स्तवे ॥ नाना । जातौ । अरेपसा । सं । अस्मे इति । बंधुं । आ । ईयथुः ॥ ४ ॥

हे विश्वा व्याप्तौ यत् येन स्तोत्रेण वां युवामनुष्टवे अनुस्तुवे तदु । उ इति पूरणः । एनानेन पौरेण सु सुष्ठु वां युवाभ्यां कृतं संपादितं भवतु । नाना पृथगेव जातौ समृद्धावरेपसाऽपापावस्मे अस्मभ्यं बंधुमन्नं धनं वा समेयथुः सम्यक गमयथः । सम्यक् प्रयच्छतमित्यर्थः ॥

आ यद्वां सूर्या रथं तिष्ठद्रघुष्यदं सदा । परि वामरुषा वयो घृणा वरंत आतपः ॥ ५ ॥

आ । यत् । वां । सूर्या । रथं । तिष्ठत् । रघुऽस्यदं । सदा ॥ परि । वां । अरुषाः । वयः । घृणा । वरंते । आऽतपः ॥ ५ ॥

हे अश्विनौ वां युवयोः सदा सर्वदा रघुष्यदं शीघ्रगं रथं सूर्या युवयोः पत्नी यत् यदातिष्ठत् आस्थितवती तदा वां परिवरंते परितो वृण्वंति । के । अरुषाः अरोचमाना घृणा दीप्ता आतप आतापनाः शत्रूणां वयोऽश्वाः । अथवा तप इति विशेष्यं । वयोगंतार उक्तलक्षणा आतपः सर्वतस्तापयित्र्यो दीप्तयः परिवरंते ॥

युवोरत्रिश्चिकेतति नरा सुम्नेन चेतसा । घर्मं यद्वामरेपसं नासत्यास्ना भुरण्यति ॥ ६ ॥

युवोः । अत्रिः । चिकेतति । नरा । सुम्नेन । चेतसा ॥ घर्मं । यत् । वां । अरेपसं । नासत्या । आस्ना । भुरण्यति ॥ ६ ॥

हे नरा नेतारावश्विनौ युवोर्युवयोः । युवामित्यर्थः । अत्रिरस्मत्पिता ऋषिः सुम्नेन सुखेनाग्निदाहोपशमरूपेण हेतुना चेतसादरयुक्तेन मनसा चिकेतति जानाति । स्तुतवानित्यर्थः । सति दुःखे सुखमुक्ष्यते । दुःखस्य कः प्रसंग इत्यत आह । यद्यस्मात् हे नासत्यौ वां युवयोरास्नास्येन तन्निष्पन्नेन स्तोत्रेण घर्मं दीप्तं दहंतमग्निमसुरैः स्वदाहाय प्रक्षिप्तमरेपसमपापं सुखकरं भुरण्यति प्राप्तवान् ॥ भु-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

रण्यतिर्गतिकर्मा । अत्रेरग्नेः सकाशाद्रक्षणं हिमेनाग्निं घ्रंसं । ऋग्वे० १. ११६. ८ । युवमृबीसमुत तप्तमत्रये । ऋग्वे० १०. ३९. ९. । इत्यादिभिः स्पष्टं प्रदर्शितं ॥

उग्रो वां ककुहो ययिः शृण्वे यामेषु संतनिः । यद्वां दंसोभिरश्विनात्रिर्नरावर्वर्तति ॥ ७ ॥

उग्रः । वां । ककुहः । ययिः । शृण्वे । यामेषु । संऽतनिः ॥ यत् । वां । दंसःऽभिः । अश्विना । अत्रिः । नरा । आऽववर्तति ॥ ७ ॥

उग्र उद्गूर्णबलो वां युवयोः ककुह उच्छ्रितो महान् ययिर्गंता संतनिः सततं गच्छन् रथो यामेषु गमनेषु यज्ञेषु वा शृण्वे श्रूयते । हे अश्विना हे नरा यद्य-स्माद्वां युवां दंसोभिः कर्मभिरत्रिरस्मत्पितावर्वर्तति आवर्तयति ॥

मध्व ऊ षु मधूयुवा रुद्रा सिषक्ति पिप्युषी । यत्समुद्राति पर्षथ पक्वाः पृक्षो भरंत वां ॥ ८ ॥

मध्वः । ऊं इति । सु । मधुऽयुवा । रुद्रा । सिसक्ति । पिप्युषी ॥ यत् । समुद्रा । अति । पर्षथः । पक्वाः । पृक्षः । भरंत । वां ॥ ८ ॥

हे मधूयुवा मधुरस्य सोमादेर्मिश्रयितारौ हे रुद्रा । रुत् स्तुतिः तया द्रव-णीयौ रुद्रपुत्रौ वा वां मध्वो मधुररसेन सु पिप्युषी सुष्ठु प्याययंती स्तुतिरस्म-त्कृता सिषक्ति सेवते । यद्यदा समुद्रा समुद्रवणसाधनान्यंतरिक्षाण्यतिपर्षथः अतिपारयथः । यज्ञं प्राप्नुथ इत्यर्थः । पक्वाः पृक्षोऽन्नादीनि हविर्लक्षणानि वां भरंत भ्रियंते यजमानैः ॥

सत्यमिद्वा उ अश्विना युवामाहुर्मयोभुवा । ता यामन्यामहूतमा यामन्ना मृळयत्तमा ॥ ९ ॥

सत्यं । इत् । वै । ऊं इति । अश्विना । युवां । आहुः । मयःऽभुवा ॥ ता । यामन् । यामऽहूतमा । यामन् । आ । मृळयत्ऽतमा ॥ ९ ॥

हे अश्विना युवां सत्यमित् सत्यमेव । वा इति पादपूरणः । मयोभुवा सुखस्य भावयितारावाहुः पुराविदः । ता तौ सुखकरत्वेन प्रसिद्धौ युवां यामन्यज्ञे याम-हूतमागमनार्थं भृशमाह्वातव्यौ भवतमिति शेषः । यामन्नस्मद्यज्ञेऽस्मदर्थागमने वा मृळयत्तमा चातिशयेन सुखयितारौ भवतं ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

इमा ब्रह्माणि वर्धनाश्विभ्यां संतु शंतमा। या तक्षाम रथाँ इवावोचाम बृहन्नमः॥ १०॥

इमा। ब्रह्माणि। वर्धना। अश्विऽभ्यां। संतु। शंऽतमा॥ या। तक्षाम। रथान्ऽइव। अवोचाम। बृहत्। नमः॥ १०॥

अथ स्तुतिं निगमयति। इमेमानीदानीं कृतानि ब्रह्माणि परिवृढानि स्तोत्राण्यश्विभ्यां वर्धना वर्धनानि समर्धकानि शंतमा सुखतमानि संतु। या यानि तक्षाम संपादयाम रथानिव शिल्पी तद्वत्तक्षाम तानि संतु। वयं बृहत् प्रभूतं प्रभूतफलप्रदं नमो नमस्कारोक्तिमवोचाम॥

(मं० ५ सू० ८०)

१८.

द्युतद्यामानं बृहतीमृतेन ऋतावरीमरुणप्सुं विभातीं। देवीमुषसं स्वरावहंतीं प्रति विप्रासो मतिभिर्जरंते॥ १॥

द्युतत्ऽयामानं। बृहतीं। ऋतेन। ऋतऽवरीं। अरुणऽप्सुं। विऽभातीं। देवीं। उषसं। स्वः। आऽवहंतीं। प्रति। विप्रासः। मतिऽभिः। जरंते॥ १॥

द्युतद्यामानं दीप्तरथां बृहतीं महतीमृतेन सत्येन यज्ञेन वर्तावरीमृतवतीमरुणप्सुमरुणरूपां विभातीं व्युच्छंतीं देवीं द्योतमानामुषसं स्वरावहंतीं सूर्यं गच्छतीं। एवं महानुभावामुषसं विप्रासो मेधाविन ऋत्विजो मतिभिः स्तुतिभिः प्रतिजरंते स्तुवंति॥

एषा जनं दर्शता बोधयंती सुगान्पथः कृण्वती यात्यग्रे। बृहद्रथा बृहती विश्वमिन्वोषा ज्योतिर्यच्छत्यग्रे अह्नां॥ २॥

एषा। जनं। दर्शता। बोधयंती। सुऽगान्। पथः। कृण्वती। याति। अग्रे॥ बृहत्ऽरथा। बृहती। विश्वम्ऽइन्वा। उषाः। ज्योतिः। यच्छति। अग्रे। अह्नां॥ २॥

दर्शता दर्शनीयैषोषा बोधयंती। कं। जनं। प्रसुप्तमित्यर्थः। पथः सुगान् सुगमनान् कृण्वत्यग्रे सूर्यस्य पुरस्ताद्याति गच्छति। कीदृश्युषाः। बृहद्रथा प्रभूत-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

रथा वृहती महती विश्वमिन्वा विश्वं व्याप्नुवाना विश्वतर्पणा वा । ईदृश्युषा अह्नामग्रे ज्योतिस्तेजो यच्छति ॥

एषा गोभिररुणेभिर्युजानास्रेधंती रयिमप्रायु चक्रे। पथो रदंती सुवितायं देवी पुरुष्टुता विश्ववारा वि भाति ॥ ३ ॥

एषा । गोभिः । अरुणेभिः । युजाना । अस्रेधंती । रयिं । अप्रऽआयु । चक्रे ॥ पथः । रदंती । सुवितायं । देवी । पुरुऽस्तुता । विश्वऽवारा । वि । भाति ॥ ३ ॥

एषोषा अरुणेभिररुणवर्णैर्गोभिर्बलीवर्दै रथं युजाना योजयंत्यस्रेधंत्यशुष्यंत्यक्षीणा । किं । रयिं धनमप्राय्वप्रगंतृ अविचलितं चक्रे करोति । किं कुर्वती । पथो मार्गान् रदंती प्रकाशयंती । किमर्थं । सुविताय सुष्ठु गमनाय देवी द्योतमाना पुरुष्टुता वहुभिः स्तुता विश्ववारा सर्वैर्वरणीया विभाति प्रकाशं करोति ॥

एषा व्येनी भवति द्विबर्हा आविष्कृण्वाना तन्वं पुरस्तात् । ऋतस्य पंथामन्वेति साधु प्रजानतीव न दिशो मिनाति ॥ ४ ॥

एषा । विऽएनी । भवति । द्विऽबर्हाः । आविःऽ कृण्वाना । तन्वं । पुरस्तात् ॥ ऋतस्य । पंथां । अनु । एति । साधु । प्रजानतीऽइव । न । दिशः । मिनाति ॥ ४ ॥

एषोषा व्येनी भवति विशेषेण श्वेता भवति द्विबर्हा द्वयोः प्रथममध्यमयोः परिवृढोषाः पश्चात्तन्वं स्वीयां तनूमाविष्कृण्वाना प्रकटीकुर्वती । कुत्र । पुरस्तात् पूर्वस्यां दिशि । किंच ऋतस्यादित्यस्य पंथां पंथानं साधु सम्यगन्वेति । किंच प्रजानतीव विश्वं प्रज्ञापयंती । इवेति संप्रत्यर्थे । न दिशो मिनाति न हिनस्ति । प्रत्युत दिशः प्रकाशयति । अथवा प्रजानतीवानुगंतव्यमिति प्रकर्षेणावगच्छंती चर्तस्य पंथामन्वेति ॥

एषा शुभ्रा न तन्वो विदानोर्ध्वेव स्नाती दृशये नो अस्थात् । अप द्वेषो बाधमाना तमांस्युषा दिवो दुहिता ज्योतिषागात् ॥ ५ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

एषा। शुभ्रा। न। तन्वः। विदाना। ऊर्ध्वाऽइव। स्नाती। दृशये। नः। अस्थात्॥ अप। द्वेषः। बाधमाना। तमांसि। उषाः। दिवः। दुहिता। ज्योतिषा। आ। अगात्॥ ५॥

एषोषाः शुभ्रा न शुभ्रवर्णा निर्मला स्वलंकृता योषिदिव तन्वोंऽगानि विदाना प्रज्ञापयंती स्नाती स्नानं कुर्वाणोर्ध्वेवोन्नतेव स्नानादुत्तिष्ठंतीव नोऽस्मद्दर्शमस्माकं पुरतो वा दृशयें सर्वेषां दर्शनायोदस्थात् पूर्वस्यां दिश्युत्तिष्ठति। किं कुर्वती। द्वेषो द्वेष्याणि तमांस्यपबाधमाना दिवो दुहितोषा ज्योतिषा तेजसा संहागात् आगच्छति॥

एषा प्रतीची दुहिता दिवो नॄन्योषेव भद्रा नि रिणीते अप्सः। व्यूर्ण्वती दाशुषे वार्याणि पुनर्ज्योतिर्युवतिः पूर्वथाकः॥ ६॥

एषा। प्रतीची। दुहिता। दिवः। नॄन्। योषाऽइव। भद्रा। नि। रिणीते। अप्सः॥ विऽऊर्ण्वती। दाशुषे। वार्याणि। पुनः। ज्योतिः। युवतिः। पूर्वऽथा। अकरित्यकः॥ ६॥

एषोषाः प्रतीच्यभिमुखा सती दिवो दुहिता नॄन् सर्वान् प्राणिनः प्रति भद्र योषेव कल्याणवेषा योषिदिवाप्सो रूपं निरिणीते प्रेरयति। किंच दाशुषे हविर्दात्रे यजमानाय वार्याणि वरणीयानि धनानि व्यूर्ण्वती प्रयच्छंती युवतिर्नित्ययौवना सर्वत्र मिश्रयंती वा पुनरद्यापि पूर्वथा पूर्वमिव ज्योतिस्तेजोऽकः करोति॥

(मं० ७ सू० ६१)

१९.

उद्वां चक्षुर्वरुण सुप्रतीकं देवयोरेति सूर्यस्ततन्वान्। अभि यो विश्वा भुवनानि चष्टे स मन्युं मर्त्येष्वा चिकेत १

उत्। वां। चक्षुः। वरुणा। सुऽप्रतीकं। देवयोः। एति। सूर्यः। ततन्वान्॥ अभि। यः। विश्वा। भुवनानि। चष्टे। सः। मन्युं। मर्त्येषु। आ। चिकेत॥ १॥

हे मित्रावरुणा मित्रावरुणौ देवयोर्द्योतमानयोर्वां युवयोश्चक्षुः प्रकाशकं तेजः

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सुप्रतीकं शोभनरूपमेवंरूपः सूर्यस्ततन्वान् तेजो विस्तारयन्नुदेति उद्गच्छति । अथोदितो यो देवो विश्वा सर्वाणि भुवनानि भूतजातान्यभिचष्टे अभिपश्यति स देवो मर्त्येषु प्रवृत्तं मन्युं स्तोत्रं कर्म वा चिकेत आजानाति ॥

प्र वां स मित्रावरुणावृतावा विप्रो मन्मानि दीर्घश्रुदियर्ति । यस्य ब्रह्माणि सुक्रतू अवाथ आ यत्क्रत्वा न शरदः पृणैथे ॥ २ ॥

प्र । वां । सः । मित्रावरुणौ । ऋतऽवा । विप्रः । मन्मानि । दीर्घऽश्रुत् । इयर्ति ॥ यस्य । ब्रह्माणि । सुक्रतू इति सुऽक्रतू । अवाथः । आ । यत् । क्रत्वा । न । शरदः । पृणैथे इति ॥ २ ॥

हे मित्रावरुणौ वां युवयोर्मन्मानि मननीयानि स्तोत्राणि स प्रसिद्धो विप्रो मेधाव्यृतावा यज्ञवान् दीर्घश्रुतं चिरकालं श्रोता एवमुक्तलक्षणो वसिष्ठ इयर्ति प्रेरयति । यस्य ऋषेर्ब्रह्माणि परिवृढानि स्तोत्राणि हे सुक्रतू शोभनकर्माणाववाथो रक्षथः । यत्कर्म शरदो वहून् संवत्सरानापृणैथे आपूरयेथे स उदियर्ति ॥

प्रोरोर्मित्रावरुणा पृथिव्याः प्र दिव ऋष्वाद्बृहतः सुदानू । स्पशो दधाथे ओषधीषु विक्ष्वृधग्यतो अनिमिषं रक्षमाणा ॥ ३ ॥

प्र । उरोः । मित्रावरुणा । पृथिव्याः । प्र । दिवः । ऋष्वात् । बृहतः । सुदानू इति सुऽदानू ॥ स्पशः । दधाथे इति । ओषधीषु । विक्षु । ऋधक् । यतः । अनिऽमिषं । रक्षमाणा ॥ ३ ॥

हे मित्रावरुणा मित्रावरुणौ युवामुरोर्विस्तीर्णायाः पृथिव्या अपि प्र प्ररिरिचाथे । अस्येदेव प्ररिरिचे । ऋग्वे० १. ६१. ९. । इत्यादिषु प्रशब्दस्य रिरिच इत्यनेन सह संबंधदर्शनादत्राप्युचितक्रियाध्याहारेण रिरिच इति योज्यं । तथा ऋष्वाद्गुणैर्महतो बृहतः स्वरूपतोऽतिमहतो दिवो द्युलोकादपि प्ररिरिचाथे हे सुदानू शोभनदानौ । किंचौषधीषु विक्षु प्रजासु निमित्तभूतासु प्रजासु चेति वा स्पशो रूपं दधाथे धारयेथे । किं कुर्वंतौ । ऋधक् सत्येन यतो विवेकात् सत्येन गच्छतो जनाननिमिषमव्यवधानेन सर्वदा रक्षमाणा पालयंतौ ॥

शंसा मित्रस्य वरुणस्य धाम शुष्मो रोदसी बद्बधे महित्वा । अयन्मासा अयज्वनामवीराः प्र यज्ञमन्मा वृजनं तिराते ॥ ४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

शंस । मित्रस्य । वरुणस्य । धाम । शुष्मः । रोदसी इति । बद्बधे । महिऽत्वा ॥ अयन् । मासाः । अयज्वनां । अवीराः । प्र । यज्ञऽमन्मा । वृजनं । तिराते ॥ ४ ॥

हे ऋषे मित्रस्य वरुणस्य च धाम तेजःस्थानं शंस स्तुहि । ययोर्देवयोः शुष्मो बलं रोदसी द्यावापृथिव्यौ सह वर्तमाने महित्वा स्वमहत्त्वेन बद्बधे बध्नाति पृथक्स्थापयति इयं पृथिवीयं द्यौरिति पृथक्करोति । द्यावापृथिवी सहास्तामिति श्रुतेः । अयज्वनामननुष्ठातॄणां मासाः कालावयवा अवीरा अपुत्रा एवायन् यंतु गच्छंतु । तद्विपरीतो यज्ञमन्मा यज्ञार्थं मतिमान्यज्वा वृजनं बलं प्रतिराते प्रवर्धयतु । प्रपूर्वस्तिरतिर्वर्धनार्थः ॥

अमूरा विश्वा वृषणाविमा वां न यासु चित्रं ददृशे न यक्षं । द्रुहः सचंते अनृता जनानां न वां निण्यान्यचिते अभूवन् ॥ ५ ॥

अमूरा । विश्वा । वृषणौ । इमाः । वां । न । यासु । चित्रं । ददृशे । न । यक्षं ॥ द्रुहः । सचंते । अनृता । जनानां । न । वां । निण्यानि । अचिते । अभूवन् ॥ ५ ॥

हे अमूरा अमूढौ हे विश्वा व्याप्तौ हे वृषणौ वर्षितारौ वां युवाभ्यामिमेमानि स्तुतिवचांसि क्रियंते । यासु स्तुतिषु चित्रमाश्चर्यं न ददृशे न दृश्यते न यक्षं न पूजा दृश्यते । युवाभ्यां महिम्नोऽपि महत्त्वात् प्रयत्नेन क्रियमाणमपि स्तोत्रं न चमत्करोतीत्यर्थः । जनानामनृता स्तुत्यविषयाणि स्तोत्राणि द्रुहो दोग्धारः सचंते सेवंते न महांतः । वां युवाभ्यां क्रियमाणानि निण्यान्यंतर्हितानि रहस्यान्यपि स्तोत्राण्यचितेऽज्ञानाय नाभूवन् न भवंति ॥

समु वां यज्ञं महयं नमोभिर्हुवे वां मित्रावरुणा सबाधः । प्र वां मन्मान्यृचसे नवानि कृतानि ब्रह्म जुजुषन्निमानि ॥ ६

सं । ऊं इति । वां । यज्ञं । महयं । नमःऽभिः । हुवे । वां । मित्रावरुणा । सऽबाधः ॥ प्र । वां । मन्मानि । ऋचसे । नवानि । कृतानि । ब्रह्म । जुजुषन् । इमानि ॥ ६ ॥

हे मित्रावरुणौ वां युवयोर्यज्ञं नमोभिर्नमस्कारैः स्तुतिभिः समु महयं संपूजयाम्यहं । तदर्थं हे मित्रावरुणा मित्रावरुणौ वां सबाधो बाधायुक्तोऽहं हुवे आह्व-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यामि बाधापरिहाराय । वां युवामृचसे सेवितुं नवानि नूतनानि स्तुत्यानि वा मन्मानि स्तोत्राणि प्र भवंत्वित्यध्याहारः । कृतानि मया समूहीकृतानीमानीदानीं क्रियमाणानि ब्रह्म परिवृढानि स्तोत्राणि युवां जुजुषन् प्रीणयंतु ॥

इयं देव पुरोहितिर्युवभ्यां यज्ञेषु मित्रावरुणावकारि । विश्वानि दुर्गा पिपृतं तिरो नो यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

इयं । देव । पुरःऽहितिः । युवऽभ्यां । यज्ञेषु । मित्रावरुणौ । अकारि ॥ विश्वानि । दुःऽगा । पिपृतं । तिरः । नः । यूयं । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥

अनया स्तुतिमुपसंहरति । हे देवा देवौ मित्रावरुणौ युवभ्यां युवाभ्यां यज्ञेष्वियं पुरोहितिः पुरस्क्रिया पूजा स्तुतिलक्षणाकारि कृताभूत् । तां सेवित्वा विश्वानि सर्वाणि दुर्गा दुःखेन गंतव्यान्यापदस्तिरस्तिरस्कुरुतं । तथा कृत्वा नोऽस्मान्पिपृतं पारयतं । शिष्टो गतः ॥

(मं० ७ सू० ७१)

२०.

अप स्वसुरुषसो नग्जिहीते रिणक्ति कृष्णीररुषाय पंथां । अश्वामघा गोमघा वां हुवेम दिवा नक्तं शरुमस्मद्युयोतं ॥ १ ॥

अप । स्वसुः । उषसः । नक् । जिहीते । रिणक्ति । कृष्णीः । अरुषाय । पंथां ॥ अश्वऽमघा । गोऽमघा । वां । हुवेम । दिवा । नक्तं । शरुं । असमत् । युयोतं ॥ १ ॥

स्वसुः स्वसृस्थानीयाया उषसः सकाशात् नक् नक्तं रात्रिरपजिहीते अपगच्छति । तस्या अवकाशं दत्वा स्वयमपगतेत्यर्थः । स्वसा स्वस्रे ज्यायस्यै योनिमारैक् । ऋग्वे० १. १२४. ८. । इत्युक्तं । कृष्णीः कृष्णवर्णा रात्रिररुषायारोचमानायाह्वे सूर्याय वां पंथां पंथानं मार्गं रिणक्ति रेचयति । यस्मादेवं तस्माद्युवयोरागमनसमयत्वात् हे अश्वामघाश्वधनौ हे गोमघा गोधनौ । उभयोः प्रदातारावित्यर्थः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

ईदृशौ वां युवां हुवेम स्तुमः आह्वयामः । दिवानक्तं सर्वदा शरुं हिंसकमस्मदस्मत्तो युयोतं पृथक्कुरुतं ॥

उपायातं दाशुषे मर्त्याय रथेन वाममश्विना वहंता । युयुतमस्मदनिराममीवां दिवा नक्तं माध्वी त्रासीथां नः ॥ २ ॥

उपऽआयातं । दाशुषे । मर्त्याय । रथेन । वामं । अश्विना । वहंता ॥ युयुतं । अस्मत् । अनिरां । अमीवां । दिवा । नक्तं । माध्वी इति । त्रासीथां । नः ॥ २ ॥

हे अश्विनौ युवामुपायातं उपागच्छतमस्मदाह्वानं प्रति । किमर्थं दाशुषे हविषां दात्रे मर्त्याय यजमानाय तदर्थं रथेन वामं वननीयं धनं वहंता वहंतौ । अस्मदस्मत्तो युयुतं पृथक्कुरुतं । किं । अनिरां । इरान्नं तद्रहितं दारिद्र्यमित्यर्थः । अमीवां रोगं च । हे माध्वी मधुमंतौ युवां नोऽस्मान् दिवा नक्तं सर्वदा त्रासीथां रक्षतं ॥

आ वां रथमवमस्यां व्युष्टौ सुम्नायवो वृषणो वर्तयंतु । स्यूमगभस्तिमृतयुग्भिरश्वैराश्विना वसुमंतं वहेथां ॥ ३ ॥

आ । वां । रथं । अवमस्यां । विऽउष्टौ । सुम्नऽयवः । वृषणः । वर्तयंतु ॥ स्यूमऽगभस्तिं । ऋतयुक्ऽभिः । अश्वैः । आ । अश्विना । वसुऽमंतं । वहेथां ॥ ३ ॥

अवमस्यामासन्नायां व्युष्टौ व्युच्छन उषसि वां युवयो रथं सुम्नायवः सुखेन योजयंतोऽश्वा वृषणो वर्षका युवामा वर्तयंतु । स्यूमगभस्तिं सुखरश्मिं स्यूतरश्मिं वसुमंतं प्रदेयधनयुक्तं रथं हे अश्विनाश्विनावृतयुग्भिरुदकयुक्तैरश्वैरुदकप्रदैरश्वैरावहेथां ॥

यो वां रथो नृपती अस्ति वोळ्हा त्रिवंधुरो वसुमाँ उस्रयामा । आ न एना नासत्योपयातमभि यद्वां विश्वप्स्न्यो जिगाति ॥ ४ ॥

यः । वां । रथः । नृपती इति नृऽपती । अस्ति । वोळ्हा । त्रिऽवंधुरः । वसुऽमान् । उस्रऽयामा ॥ आ । नः । एना । नासत्या । उप । यातं । अभि । यत् । वां । विश्वऽप्स्न्यः । जिगाति ॥ ४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

हे नृपती नृणां यजमानानां पालकावश्विनौ वां युवयोर्यो रथो वोळ्हा युवयोर्वाहकोऽस्ति सर्वदा संनिहितो वर्तते । कीदृशोऽसौ । त्रिवंधुरः सारथ्यधिष्ठानस्थानत्रयोपेतो वसुमान् धनवानुस्रयामोस्रं दिवसं प्रति गंता एनैनेन रथेन हे नासत्याश्विनौ नोऽस्मानुपायातं । यद्रथो यश्च रथो वां विश्वप्स्न्यो व्याप्तरूपोऽभिजिगाति अभिगच्छति । अथ वा । यद्यस्माद्विश्वप्स्न्यो वसिष्ठो वां जिगाति स्तौति अत उपायातं ॥

युवं च्यवा॑नं ज॒रसो॑ऽमुमुक्तं॒ नि पे॒दव॑ ऊहथुरा॒शुमश्वं॑ ।
निरंह॑स॒स्तम॑सः स्पर्त॒मत्रिं॒ नि जा॑हु॒षं शि॑थि॒रे धा॑तम॒न्तः ॥ ५॥

युवं । च्यवा॑नं । ज॒रस॑ः । अ॒मु॒मु॒क्तं॒ । नि । पे॒दवै॑ । ऊ॒ह॒थुः । आ॒शुं । अश्वं॑ ॥ निः । अंह॑सः । तम॑सः । स्प॒र्तं॒ । अत्रिं॑ । नि । जा॒हु॒षं । शि॒थि॒रे । धा॒तं॒ । अं॒तरिति॑ ॥ ५ ॥

हे अश्विना युवं युवां च्यवानं जरसो जीर्णाद्रूपादमुमुक्तं अमुंचतं । युवं च्यवानमश्विना जरंतं पुनर्युवानं । ऋग्वे० १. ११७. १३. । इति ह्यन्यत्र । तथा पेदव एतन्नामकाय राज्ञ आशुं शीघ्रगामिनमश्वं निरूहथुः न्यवहतं युद्धे । युवं श्वेतं पेदवे। ऋग्वे० १. ११८. ९.।इति निगमः। तथात्रिं महर्षिमंहस ऋवीसादग्नेः सकाशात्तमसश्च गुहांतः स्थिताच्च सकाशान्निष्पर्तं न्यपारयतं । युवमृवीसमुत तप्तमत्रय ओमन्वंतं चक्रथुः । ऋग्वे० १०. ३९. ९. । इति निगमः । तथा जाहुषं शिथिरे शिथिले भ्रष्टे स्वराष्ट्रेऽतर्मध्ये पुनर्निधातं न्यधातं । परिविष्टं जाहुषं विश्वतः सीं । ऋग्वे० १. ११६. २०. । इति ह्युक्तं ॥

इ॒यं म॑नी॒षा इ॒यम॑श्विना॒ गीरि॒मां सु॑वृ॒क्तिं वृ॑षणा जुषेथां ।
इ॒मा ब्रह्मा॑णि युव॒यून्य॑ग्मन्यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः ॥ ६ ॥

इ॒यं । म॒नी॒षा । इ॒यं । अ॒श्वि॒ना । गीः । इ॒मां । सु॒ऽवृ॒क्तिं । वृ॒ष॒णा । जु॒षे॒थां ॥ इ॒मा । ब्रह्मा॑णि । यु॒व॒ऽयूनि॑ । अ॒ग्म॒न् । यू॒यं । पा॒त । स्व॒स्तिऽभि॑ः । सदा॑ । न॒ः ॥ ६ ॥

हे अश्विनाश्विनावियं मनीषा स्तुतिर्युवयोः कृतेति शेषः । तदेवादरार्थं पुनरुच्यते । इयं गीः स्तुतिः कृता । हे वृषणा कामानां वर्षकाविमामस्मत्कृतां सुवृक्तिं शोभनां स्तुतिं जुषेथां सेवेथां । इमेमानि ब्रह्माणि कर्माणि स्तुतिरूपाणि युवयूनि युवां कामयमानानि संत्यग्मन् गच्छंतु । युवां यूयं पातेति सिद्धं ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

(मं० ७ सू० ७७)

२१.

उपो रुरुचे युवतिर्न योषा विश्वं जीवं प्रसुवंती चरायै।
अभूदग्निः समिधे मानुषाणामकर्ज्योतिर्बाधमाना तमांसि॥ १

उपो इति। रुरुचे। युवतिः। न। योषा। विश्वं। जीवं। प्रऽसुवंती। चरायै॥ अभूत्। अग्निः। संऽइधे। मानुषाणां। अकः। ज्योतिः। बाधमाना। तमांसि॥ १॥

इयमुषा उपो समीप एव सूर्यस्य रुरुचे दीप्यते। युवतिर्यौवनोपेता योषा न योषिदिव। सा यथा वस्त्राभरणादिना पत्युः समीपे प्रदीप्यते तद्वत्। किं कुर्वंती। विश्वं सर्वं जीवं जीवसंघं चरायै संचाराय प्रसुवंती प्रेरयंती। किंचाग्निर्मानुषाणां मनुष्याणामर्थाय समिधेऽभूत् समिंधनीयोऽभवत्। कृत्यार्थे केन्। समिद्धः सन् तमांस्यंधकारान्बाधमाना बाधमानं बाधकं ज्योतिस्तेजःसंघमकः अकार्षीत्। अथवौषसं ज्योतिस्तमांसि बाधमाना बाध्यमानान्यकः अकरोत्॥

विश्वं प्रतीची सप्रथा उदस्थाद्रुशद्वासो बिभ्रती शुक्रमश्वैत्। हिरण्यवर्णा सुदृशीकसंदृग्गवां माता नेत्र्यह्नामरोचि २

विश्वं। प्रतीची। सऽप्रथाः। उत्। अस्थात्। रुशत्। वासः। बिभ्रती। शुक्रं। अश्वैत्॥ हिरण्यऽवर्णा। सुदृशीकऽसंदृक्। गवां। माता। नेत्री। अह्नां। अरोचि॥ २॥

विश्वं कृत्स्नं जगत्प्रति प्रतीच्यभिमुखी सप्रथाः सर्वतः पृथुतरोदस्थात् उदगच्छत्। उदिता च रुशद्दीप्तं शुक्रं तेजोमयं वासो वसनीयं तेजःसमूहं बिभ्रती धारयंत्यश्वैत् वर्धते। हिरण्यवर्णा हितरमणीयवर्णोपेता सुदृशीकसंदृक्। संदर्शयतीति संदृक् तेजः। सुष्ठु दर्शनीयं संदृक् तेजो यस्याः सा तादृशी। गवां वाचां गवामेव वा माता निर्मात्री। उषःकाले हि पक्षिमनुष्यादीनां वाचो निर्गच्छंति। गवामपि तस्मिन्काले संचारात्तन्निर्मातृत्वं। अथवा रश्मीनां निर्मात्र्यरोचि रोचतेऽह्नां नेत्री दिवसानां प्रापयित्री॥

देवानां चक्षुः सुभगा वहंती श्वेतं नयंती सुदृशीकमश्वं।
उषा अदर्शि रश्मिभिर्व्यक्ता चित्रामघा विश्वमनु प्रभूता॥३॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

देवानां । चक्षुः । सुऽभगा । वहंती । श्वेतं । नयंती । सुऽदृशीकं । अश्वं ॥ उषाः । अदर्शि । रश्मिऽभिः । विऽअक्ता । चित्रऽमघा । विश्वं । अनु । प्रऽभूता ॥ ३ ॥

देवानां चक्षुश्चक्षुःस्थानीयं तेजो वहंती धारयंती सुभगा शोभनधना सुदृशीकं सुदर्शनमश्वं सर्वदा गंतारमादित्यं नयंती प्रापयंती । किं । श्वेतं श्वेतवर्णोपेतं सूर्यं । प्रकाशयुक्तं कुर्वंतीत्यर्थः । कीदृश्युषाः । रश्मिभिः स्वकीयैर्व्यक्तादर्शि दृश्यते च । चित्रामघा विचित्रधना विश्वमनु सर्वं जगदनुलक्ष्य प्रभूता प्रवृद्धा सर्वजगद्व्यवहारायेत्यर्थः ॥

अंतिवामा दूरे अमित्रमुच्छोर्वीं गव्यूतिमभयं कृधी नः । यावय द्वेष आ भरा वसूनि चोदय राधो गृणते मघोनि ४

अंतिऽवामा । दूरे । अमित्रं । उच्छ । उर्वीं । गव्यूतिं । अभयं । कृधि । नः ॥ यावय । द्वेषः । आ । भर । वसूनि । चोदय । राधः । गृणते । मघोनि ॥ ४ ॥

हे उषोऽतिवामा अंत्यस्मदंतिके वामं वननीयं धनं यस्याः सांतिवामा त्वममित्रमस्मच्छत्रुं दूरेऽस्मत्तो विप्रकृष्टदेशे वर्तमानं कृत्वा व्युच्छ विभाहि । यथा मित्रो दूरे भवति तथा व्युच्छेत्यर्थः । तथोर्वीं गव्यूतिं भूमिमभयं नोऽस्माकं कृधि कुरु । किं च द्वेषोऽस्मद्द्वेष्टॄन्यावय अस्मत्तः पृथक्कुरु । वसूनि शत्रूणां धनान्याभर आहर । राधो धनं चोदय प्रेरय । गृणते स्तुवते मह्यं हे मघोनि धनवति ॥

अस्मे श्रेष्ठेभिर्भानुभिर्वि भाह्युषो देवि प्रतिरंती न आयुः । इषं च नो दधती विश्ववारे गोमदश्वावद्रथवच्च राधः ॥ ५ ॥

अस्मे इति । श्रेष्ठेभिः । भानुऽभिः । वि । भाहि । उषः । देवि । प्रऽतिरंती । नः । आयुः ॥ इषं । च । नः । दधती । विश्वऽवारे । गोऽमत् । अश्वऽवत् । रथऽवत् । च । राधः ॥ ५ ॥

हे उषो देवि अस्मे अस्मभ्यं श्रेष्ठेभिः प्रशस्यैर्भानुभी रश्मिभिः प्रकाशैर्विभाहि प्रकाशय । किं कुर्वंती । नोऽस्माकमायुरायुष्यं प्रतिरंती वर्धयंती । हे विश्ववारे विश्वै संभजनीये देवि नोऽस्मभ्यमिषं च गोमद्गोभिर्बहुभिरुपेतमश्वावदश्वैश्चोपेतं रथवद्रथैरुपेतं राधो धनं च दधती विभाहीति ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

यां त्वा दिवो दुहितर्वर्धयंत्युषः सुजाते मतिभिर्वसिष्ठाः।
सास्मासु धा रयिमृष्वं बृहंतं यूयं पात स्वस्तिभिः सदा नः ६

यां। त्वा। दिवः। दुहितः। वर्धयंति। उषः। सुऽजाते। मतिऽभिः। वसिष्ठाः॥ सा। अस्मासु। धाः। रयिं। ऋष्वं। बृहंतं। यूयं। पात। स्वस्तिऽभिः। सदा। नः॥ ६॥

हे दिवो दुहितरुषः सुजाते शोभनजनने यां त्वा त्वां मतिभिः स्तोत्रैर्वसिष्ठा वर्धयंति सा त्वमस्मासु वसिष्ठेषु ऋष्वं प्रदीप्तं बृहंतं महांतं रयिं धनं धाः धेहि॥

(मं० ७ सू० ८६)

२२.

धीरा त्वस्य महिना जनूंषि वि यस्तस्तंभ रोदसी चिदुर्वी।
प्र नाकमृष्वं नुनुदे बृहंतं द्विता नक्षत्रं पप्रथच्च भूम॥ १॥

धीरा। तु। अस्य। महिना। जनूंषि। वि। यः। तस्तंभ। रोदसी इति। चित्। उर्वी इति॥ प्र। नाकं। ऋष्वं। नुनुदे। बृहंतं। द्विता। नक्षत्रं। पप्रथत्। च। भूम॥ १॥

अस्य वरुणस्य जनूंषि जन्मानि महिना महिम्ना तु क्षिप्रं धीरा धीराणि धैर्यवंति भवंति। यो वरुण उर्वी विस्तीर्णे रोदसी चित् द्यावापृथिव्यावपि वितस्तंभ विविधं स्तब्धे स्वकीये स्थाने स्थिते अकरोत्। यश्च बृहंतं महांतं नाकमादित्यं नक्षत्रं च ऋष्वं दर्शनीयं द्विता द्वैधं प्रनुनुदे प्रेरयति स्म। अहनि सूर्यं दर्शनीयं प्रेरयति रात्रौ नक्षत्रं तथेति द्विप्रकारः। भूम भूमिं च यः पप्रथत् अप्रथयत् विस्तारितवान् तस्यास्य वरुणस्येत्यन्वयः॥

उत स्वया तन्वा३ सं वदे तत्कदा न्वं१तर्वरुणे भुवानि।
किं मे हव्यमहृणानो जुषेत कदा मृळीकं सुमना अभि ख्यं॥२॥

उत। स्वया। तन्वा। सं। वदे। तत्। कदा। नु। अंतः। वरुणे। भुवानि॥ किं। मे। हव्यं। अहृणानः। जुषेत। कदा। मृळीकं। सुऽमनाः। अभि। ख्यं॥ २॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वरुणं शीघ्रं दिदृक्षमाण ऋषिरनया वितर्कयति । उतेति विचिकित्सायां । उत किं स्वया तन्वा स्वीयेनात्मीयेन शरीरेण संवदे सहवदनं करोमि । आहोस्वित् तत्तेन वरुणेन सह संवदे। कदा नु कदा खलु वरुणे देवेंऽतर्भुवानि अंतर्भूतो भवानि । वरुणस्य चित्ते संलग्नो भवानीत्यर्थः । अपि च मे मदीयं हव्यं स्तोत्रं हविर्वाहृणानोऽक्रुध्यन् वरुणः किं केन हेतुना जुषेत सेवेत । सुमनाः शोभनमनस्कः सन्नहं कदा कस्मिन्काले मृळीकं सुखयितारं वरुणमभिख्यं अभिपश्येयं ॥

पृच्छे तदेनो वरुण दिदृक्षूपो एमि चिकितुषो विपृच्छं।
समानमिन्मे कवयश्चिदाहुरयं ह तुभ्यं वरुणो हृणीते ॥ ३ ॥

पृच्छे । तत् । एनः । वरुण । दिदृक्षु । उपो इति । एमि । चिकितुषः । विऽपृच्छं ॥ समानं । इत् । मे । कवयः । चित् । आहुः । अयं । ह । तुभ्यं । वरुणः । हृणीते ॥ ३ ॥

हे वरुण तदेनः पापं पृच्छे त्वां पृच्छामि । दिदृक्षु । छांदसः सुलोपः । द्रष्टुमिच्छन्नहं । येन पापेन हेतुना त्वदीयैः पाशैर्बद्धोऽस्मि पृष्टः सन् तत्पापं कथय । अहं विपृच्छं विविधं प्रष्टुं चिकितुषो विदुषो जनानुपो एमि उपागां । ते कवयश्चित् क्रांतदर्शिनो जनाश्च मे मह्यं समानमित् समानमेवैकरूपमेवाहुः अकथयन् । यदाहुस्तदाह । हे स्तोतस्तुभ्यमयं हायमेव वरुणो हृणीते । क्रुध्यतीति । अतः क्रोधं परित्यज्यास्मान्पाशेभ्यो मोचय ॥

किमाग आस वरुण ज्येष्ठं यत्स्तोतारं जिघांससि सखायं।
प्र तन्मे वोचो दूळभ स्वधावोऽव त्वानेना नमसा तुर इयां ४

किं । आगः आस । वरुण । ज्येष्ठं । यत् । स्तोतारं । जिघांससि । सखायं ॥ प्र । तत् । मे । वोचः । दुःऽदभ । स्वधाऽवः । अव । त्वा । अनेनाः । नमसा । तुरः । इयां ॥ ४ ॥

हे वरुण ज्येष्ठमधिकं किमाग आस । कोऽपराधो मया कृतो बभूव । यद्येनागसा सखायं मित्रभूतं संतं स्तोतारं जिघांससि हंतुमिच्छसि । हे दूळभ दुर्दभ अन्यैर्बाधितुमशक्य स्वधावस्तेजस्विन् हे वरुण तदागो मे मह्यं प्रवोचः प्रब्रूहि । एवं सति तस्य प्रायश्चित्तं कृत्वानेना अपापः सन्नहं तुरस्त्वरमाणः शीघ्रो नमसा नमस्कारेण हविषा त्वा त्वामवेयां उपगच्छेयं ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

अव॑ द्रु॒ग्धानि॒ पित्र्या॑ सृजा॒ नोऽव॒ या व॒यं च॑कृ॒मा त॒नूभिः॑ । अव॑ राजन्पशु॒तृपं॒ न ता॒युं सृ॒जा व॒त्सं न दाम्नो॒ व॒सिष्ठं ॥ ५ ॥

अव॑ । द्रु॒ग्धानि॑ । पित्र्या॑ । सृ॒ज॒ । नः॒ । अव॑ । या । व॒यं । च॒कृ॒म । त॒नूभिः॑ ॥ अव॑ । रा॒ज॒न् । प॒शु॒ऽतृपं॑ । न । ता॒युं । सृ॒ज । व॒त्सं । न । दाम्नः॑ । व॒सिष्ठं ॥ ५ ॥

हे वरुण पित्र्या पितृतः प्राप्तानि नोऽस्मदीयानि दुग्धानि द्रोहान् बंधनहेतुभूतानवसृज विमुंच अस्मत्तो विश्लेषय । वयं च या यानि द्रोहजातानि तनूभिः शरीरैश्चकृम कृतवंतः स्म तानि चावसृज । हे राजन् राजमान वरुण पशुतृपं न तायुं स्तैन्यप्रायश्चित्तं कृत्वावसाने घासादिभिः पशूनां तर्पयितारं स्तेनमिव दाम्नो रज्जोर्वत्सं न वत्समिव च वसिष्ठं मां बंधकात्पापादवसृज विमुंच ॥

न स स्वो दक्षो॑ वरुण॒ ध्रुति॒ः सा सुरा॑ म॒न्युर्वि॒भीद॑को॒ अचि॑त्तिः । अस्ति॒ ज्याया॒न्कनी॑यस उ॒पारे स्वप्न॑श्च॒नेदनृ॑तस्य प्र॒योता ॥ ६ ॥

न । सः । स्वः । दक्षः॑ । व॒रु॒ण॒ । ध्रुतिः॑ । सा । सुरा॑ । म॒न्युः । वि॒ऽभीद॑कः । अचि॑त्तिः ॥ अस्ति॑ । ज्याया॑न् । कनी॑यसः । उ॒प॒ऽअ॒रे । स्वप्नः॑ । च॒न । इत् । अनृ॑तस्य । प्र॒ऽयो॒ता ॥ ६ ॥

हे वरुण स स्वो दक्षः पुरुषस्य स्वभूतं तद्बलं पापप्रवृत्तौ कारणं न भवति । किं तर्हि ध्रुतिः स्थिरोत्पत्तिसमय एव निर्मिता दैवगतिः कारणं ॥ ध्रु गतिस्थैर्ययोरिति धातुः ॥ सा च ध्रुतिर्वक्ष्यमाणरूपा सुरा प्रमादकारिणी मन्युः क्रोधश्च गुर्वादिविषयः सन् अनर्थहेतुः । विभीदको द्यूतसाधनोऽक्षः । स च द्यूतेषु पुरुषं प्रेरयन्ननर्थहेतुर्भवति । अचित्तिरज्ञानमविवेककारणं । अत ईदृशी दैवक्लृप्तिरेव पुरुषस्य पापप्रवृत्तौ कारणं । अपि च कनीयसोऽल्पस्य हीनस्य पुरुषस्य पापप्रवृत्तावुपार उपागते समीपे नियंतृत्वेन स्थितो ज्यायानधिक ईश्वरोऽस्ति । स एव तं पापे प्रवर्तयति । तथा चाम्नातं । एष ह्येवासाधु कर्म कारयति तं यमधो निनीषत इति । एवं च सति स्वप्नश्चन स्वप्नोऽप्यनृतस्य पापस्य प्रयोता प्रकर्षेण मिश्रयिता भवति । इदिति पूरकः । स्वप्ने कृतैरपि कर्मभिर्बहूनि पापानि जायंते किमु वक्तव्यं जाग्रति कृतैः कर्मभिः पापान्युत्पद्यंत इति हे वरुण त्वया क्षंतव्य इति भावः ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अरं दासो न मीळ्हुषे कराण्यहं देवाय भूर्णयेऽनागाः । अचेतयदचितो देवो अर्यो गृत्सं राये कवितरो जुनाति ॥७॥

अरं । दासः । न । मीळ्हुषे । कराणि । अहं । देवाय । भूर्णये । अनागाः ॥ अचेतयत् । अचितः । देवः । अर्यः । गृत्सं । राये । कविऽतरः । जुनाति ॥ ७ ॥

मीळ्हुषे सेक्त्रे कामानां वर्षित्रे भूर्णये जगतो भर्त्रे देवाय दानादिगुणयुक्ताय वरुणायानागास्तत्प्रसादादपापः सन्नहमरमलं पर्याप्तं कराणि । परिचरणं करवाणि । दासो न । यथा भृत्यः स्वामिने सम्यक् परिचरति तद्वत् । अर्यः स्वामी स च देवोऽचितोऽजानतोऽस्मानचेतयत् चेतयतु प्रज्ञापयतु । गृत्सं स्तोतारं च कवितरः प्राज्ञतरो देवो राये धनाय धनप्राप्त्यर्थं जुनातु प्रेरयतु ॥

अयं सु तुभ्यं वरुण स्वधावो हृदि स्तोम उपश्रितश्चिदस्तु । शं नः क्षेमे शमु योगे नो अस्तु यूयं पात स्वस्तिभिः सदा नः ॥ ८ ॥

अयं । सु । तुभ्यं । वरुण । स्वधाऽवः । हृदि । स्तोमः । उपऽश्रितः । चित् । अस्तु ॥ शं । नः । क्षेमे । शं । ऊं इति । योगे । नः । अस्तु । यूयं । पात । स्वस्तिऽभिः । सदा । नः ॥ ८ ॥

हे स्वधावोऽन्नवन्वरुण तुभ्यं त्वदर्थं क्रियमाणोऽयमेतत्सूक्तात्मकः स्तोमः स्तोत्रं हृदि त्वदीये हृदये सु सुष्ठूपश्रित उपगतः समवेतोऽस्तु । चिदिति पूरकः । अप्राप्तस्य प्रापणं योगः । प्राप्तस्य रक्षणं क्षेमः । नोऽस्मदीये क्षेमे रक्षणे शमुपद्रवाणां शमनमस्तु । योगे च नोऽस्मदीये प्रापणे शमु शमनमेवास्तूपद्रवाणां हे वरुणादयो देवा यूयं नोऽस्मान् सर्वदा स्वस्तिभिरविनाशैः पात रक्षत ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

(मं० ७ सू० ९५)

२३.

प्र क्षोदसा धायसा सस्र एषा सरस्वती धरुणमायसी पूः। प्रबाबधाना रथ्येव याति विश्वा अपो महिना सिंधुरन्याः ॥ १ ॥

प्र। क्षोदसा। धायसा। सस्रे। एषा। सरस्वती। धरुणं। आयसी। पूः॥ प्रऽबाबधाना। रथ्याऽइव। याति। विश्वाः। अपः। महिना। सिंधुः। अन्याः॥ १॥

सरस्वत्या एषा नदीवन्निगमा एषा दृश्यमाना नदीरूपा सरस्वत्यायस्ययसा निर्मिता पूः पुरीव धरुणं। लिंगव्यत्ययः। धरुणा धारयित्री धायसा धारकेण क्षोदसोदकेन प्रसस्रे प्रधावति शीघ्रं गच्छति। सिंधुः स्यंदनशीला नदीरूपा सान्या विश्वाः सर्वा अप आपगा महिना महिम्ना प्रबाबधाना भृशं बाधमाना रथ्येव प्रतोलीव विस्तीर्णा सती याति गच्छति। यद्वा रथ्येव रथिनेव यथा रथी रथेन मार्गस्थं तरुगुल्मादिकं चूर्णीकृत्य गच्छति तद्वत् स्वकीयेन वेगेन सर्वं संपिंषती गच्छतीत्यर्थः॥

एकाचेतत्सरस्वती नदीनां शुचिर्यती गिरिभ्य आ समुद्रात्। रायश्चेतंती भुवनस्य भूरेर्घृतं पयो दुदुहे नाहुषाय २

एका। अचेतत्। सरस्वती। नदीनां। शुचिः। यती। गिरिऽभ्यः। आ। समुद्रात्॥ रायः। चेतंती। भुवनस्य। भूरेः। घृतं। पयः। दुदुहे। नाहुषाय॥ २॥

सहस्रवत्सरेण क्रतुना यक्ष्यमाणो नाहुषो नाम राजा सरस्वतीं नदीं प्रार्थयामास सा च तस्मै सहस्रसंवत्सरपर्याप्तं पयो घृतं च प्रददौ। अयमर्थोऽत्र प्रतिपाद्यते। नदीनामन्यासां मध्ये शुचिः शुद्धा गिरिभ्यः सकाशादा समुद्रात्समुद्रपर्यंतं यती गच्छंत्येका सरस्वती नद्यचेतत् नाहुषस्य प्रार्थनामज्ञासीत्। तथा भुवनस्य भूतजातस्य भूरेर्बहुलस्य रायो धनानि चेतंती प्रज्ञापयंती प्रयच्छंती नाहुषाय राज्ञे घृतं पयश्च सहस्रसंवत्सरक्रतोः पर्याप्तं दुदुहे दुग्धवती दत्तवती॥

स वावृधे नर्यो योषणासु वृषा शिशुर्वृषभो यज्ञियासु। स वाजिनं मघवद्भ्यो दधाति वि सातये तन्वं मामृजीत ३

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सः । वव॒धे । नर्यः । योषणासु । वृषा । शिशुः । वृषभः । यज्ञियासु ॥ सः । वाजिनं । मघवत्ऽभ्यः । दधाति । वि । सातये । तन्वं । ममृजीत ॥ ३ ॥

मध्यस्थानो वायुः सरस्वान् । नर्यो नृभ्यो हितो वृषा सेचनसमर्थः शिशुरल्पः प्रादुर्भावसमयेऽल्पतया दृश्यमानो वृषभो वर्षिता । एवंभूतः स सरस्वान् यज्ञियासु यज्ञार्हासु योषणासु योषित्स्वात्मनः कलत्रभूतासु मध्यमस्थानास्वप्सु मध्ये वव्रृधे वर्धते । स तादृशः सरस्वान् मघवद्भ्यो हविष्मद्भ्यो यजमानेभ्यो वाजिनं बलिनं पुत्रं दधाति ददाति । तथा सातये लाभार्थं तन्वं तेषां शरीरं विमामृजीत विमार्ष्टि । लाभार्थं संस्करोतीत्यर्थः । यद्यप्येषा सरस्वतः स्तुतिस्तथापि सरस्वत्याः प्रीणनार्थं तत्स्तवनमिति छांदोगिके सारस्वते तृचेऽस्या उक्तो विनियोगो न विरुध्यते ॥

उत स्या नः सरस्वती जुषाणोप श्रवत्सुभगा यज्ञे अस्मिन् । मितज्ञुभिर्नमस्यैरियाना राया युजा चिदुत्तरा सखिभ्यः ॥ ४ ॥

उत । स्या । नः । सरस्वती । जुषाणा । उप । श्रवत् । सुऽभगा । यज्ञे । अस्मिन् ॥ मितज्ञुऽभिः । नमस्यैः । इयाना । राया । युजा । चित् । उत्ऽतरा । सखिऽभ्यः ॥ ४ ॥

उतापि च जुषाणा प्रीयमाणा सुभगा शोभनधना स्या सा सरस्वती नोऽस्माकमस्मिन्यज्ञ उपश्रवत् अस्मदीयाः स्तुतीरुपश्रृणोतु । कीदृशी सा । मितज्ञुभिः प्रह्वैर्जानुभिर्नमस्यैर्नमस्कारैर्देवैरियानोपगम्यमाना । चिच्छब्दश्चार्थे । युजा नित्ययुक्तेन राया धनेन च संगता सखिभ्य उत्तरोत्कृष्टतरा । ईदृश्यस्मदीयाः स्तुतीरुपश्रृणोत्वित्यन्वयः ॥

इमा जुह्वाना युष्मदा नमोभिः प्रति स्तोमं सरस्वति जुषस्व । तव शर्मन्प्रियतमे दधाना उप स्थेयाम शरणं न वृक्षं ॥ ५ ॥

इमा । जुह्वानाः । युष्मत् । आ । नमःऽभिः । प्रति । स्तोमं । सरस्वति । जुषस्व ॥ तव । शर्मन् । प्रियऽतमे । दधानाः । उप । स्थेयाम । शरणं । न । वृक्षं ॥ ५ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

हे सरस्वति इमेमान्यस्मदीयानि हवींषि जुह्वानास्तुभ्यं जुह्वतो वयं नमोभिस्त्वद्विषयैर्नमस्कारैर्युष्मत्त्वत्सकाशादा। उपसर्गश्रुतेर्योग्यक्रियाध्याहारः। आददीमहिं धनानीति शेषः। स्तोमं चास्मदीयं स्तोत्रं प्रतिजुषस्व प्रतिसेवस्व। वयं च प्रियतमेऽतिशयेन प्रिये तव त्वदीये शर्मन् शर्मणि सुखे दधाना निधीयमानाः संतः शरणं न वृक्षमाश्रयभूतं वृक्षमिवोपस्थेयाम त्वामुपतिष्ठेम। संगच्छेमहि॥

अयमु ते सरस्वति वसिष्ठो द्वारावृतस्य सुभगे व्यावः। वर्ध शुभ्रे स्तुवते रासि वाजान्यूयं पात स्वस्तिभिः सदा नः॥ ६॥

अयं। ऊं इति। ते। सरस्वति। वसिष्ठः। द्वारौ। ऋतस्य। सुऽभगे। वि। आवरित्यावः॥ वर्ध। शुभ्रे। स्तुवते। रासि। वाजान्। यूयं। पात। स्वस्तिऽभिः। सदा। नः॥ ६॥

हे सुभगे शोभनधने सरस्वति अयं वसिष्ठस्ते त्वां यंतुर्ऋतस्य यज्ञस्य संबंधिन्यौ द्वारौ पूर्वापरे व्यावः विवृणोति। उ इति पूरकः। हे शुभ्रे शुभ्रवर्णे देवि वर्ध वर्धस्व। तथा स्तुवते स्तोत्रं कुर्वते वसिष्ठाय वाजानन्नानि रासि प्रदेहि। अन्यद्गतं॥

(मं० ८ सू० २९)

२४.

बभ्रुरेको विषुणः सूनरो युवाञ्ज्यंक्ते हिरण्ययं॥ १॥

बभ्रुः। एकः। विषुणः। सूनरः। युवा। अंजि। अंक्ते। हिरण्ययं॥ १॥

अत्र दशानामृचां किंचित्पदलिंगात्पृथग्देवतं। अत्र प्रथमायां बभ्रुरित्यनेन सोमोऽभिधीयते। सोम्यं बभ्रुमालभेतेत्यादिषु दृष्टत्वात्। बभ्रुर्बभ्रुवर्णः सर्वलतादिषु परिपक्वः। यद्वा डुभृञ् धारणपोषणयोः। कुर्भ्रश्च। उ० १. २२.। इति कुप्रत्ययः। सर्वस्य सुधामयैः किरणैस्तावदुद्गते चंद्रमसि दुःखोपशमनानि पुष्टानि खलु। तादृशो विषुणो विष्वगंचनः सूनरः सुष्ठु रात्रीणां नेता। रात्रयश्चंद्रनेतृकाः खलु। एतादृशो युवा प्रतिदिवसमाविर्भूतत्वात्तरुण एको देवः सोमो हिरण्ययं हिरण्मयमंजि। अभिव्यज्यते प्रकाश्यतेऽनेनेत्यंज्याभरणं। अभिव्यक्तिसाधनं कुंडलमुकुटादिकं स्वशरीरमंक्ते अभिव्यंजयति॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

योनिमेक आ ससाद द्योतनोऽतर्देवेषु मेधिरः ॥ २ ॥

योनिं । एकः । आ । ससाद । द्योतनः । अंतः । देवेषु । मेधिरः २

अत्र योनिमिति लिंगादग्निरुच्यते । अग्नये गृहपतय इत्यादिषु दृष्टत्वात् । देवेषु देवानामंतर्मध्ये द्योतनः स्वतेजसा दीप्यमानो मेधिरो मेधावी । अथवा मेधाकांक्षिणां स्तोतॄणां मेधादातृत्वेन मेधायुक्तः । एवंविध एकोऽग्निर्योनिं स्थानभूतमाहवनीयादिकमाससाद हविःस्वीकरणार्थमासीदति ॥

वाशीमेको बिभर्ति हस्त आयसीमंतर्देवेषु निध्रुविः ॥ ३ ॥

वाशीं । एकः । बिभर्ति । हस्ते । आयसीं । अंतः । देवेषु । निऽध्रुविः ॥ ३ ॥

देवेष्वंतर्देवानां मध्ये द्योतमानो निध्रुविर्निश्चले स्थाने वर्तमानः । यद्वा नितरां गमनमस्यास्तीति निध्रुविः सर्वदा गच्छन् । अथवा संग्रामेषु शत्रूणां पुरतोऽतिशयेन स्थैर्यवान् । एतादृश एकस्त्वष्टृनामको देव आयसीमयोमयधारां वाशीं । वाश्ट शब्दे । शब्दयत्याक्रंदयति शत्रूननयेति वाशी तक्षणसाधनं कुठारः । तं स्वकीये हस्ते बिभर्ति धारयति ॥

वज्रमेको बिभर्ति हस्त आहितं तेन वृत्राणि जिघ्नते ॥४॥

वज्रं । एकः । बिभर्ति । हस्ते । आऽहितं । तेन । वृत्राणि । जिघ्नते ॥ ४ ॥

अत्र वज्रलिंगादिंद्रो देवता । एक इंद्र आहितं स्वकीयहस्ते निहितं वज्रमेतन्नामकमायुधं बिभर्ति धत्ते । स एवेंद्रस्तेन निहितेन वज्रेण वृत्राण्यावरकाणि रक्षांसि पापानि वा जिघ्नते भृशं हंति ॥

तिग्ममेको बिभर्ति हस्त आयुधं शुचिरुग्रो जलाषभेषजः ॥ ५ ॥

तिग्मं । एकः । बिभर्ति । हस्ते । आयुधं । शुचिः । उग्रः । जलाषऽभेषजः ॥ ५ ॥

अत्र जलाषभेषज इत्यनेन रुद्रोऽभिधीयते । शुचिः । शुच दीप्तौ । सर्वतः स्वतेजसा दीप्यमानः । यद्वा शुच शोके । शत्रूणां शोचयिता दुःखयिता अत एवोग्र उद्गूर्णबलो जलाषभेषजो रोगापनयनेन सुखकरभैषज्यवान् । यद्वा स्तोतॄणां दुःखरू-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

पसंसारोच्छेदेन सुखकारिभिषग्रूपः। प्रथमो दैव्यो भिषगित्यादिश्रुतिभिरस्य भिषक्त्वं श्रूयते। तादृश एको रुद्रस्तिग्मं तीक्ष्णधारमायुधं। आयुध्यति संप्रहरति शत्रूननेनेत्यायुधं पिनाकः तं स्वकीये हस्ते बिभर्ति॥

पथ एकः पीपाय तस्करो यथाँ एष वेद निधीनां॥ ६॥

पथः। एकः। पीपाय। तस्करः। यथा। एषः। वेद। निऽधीनां६

पथ इति लिंगेन पूषा निगद्यते। सं पूषन्नध्वनस्तिर। ऋग्वे० १. ४२. १. । इत्यादिषु दृष्टत्वात्। एकः पूषनामको देवः पथो मार्गान् पीपाय। प्यायतिर्वर्धनकर्माप्यत्र रक्षणार्थः। येऽग्निहोत्रादि कर्म कुर्वंति तेषां स्वर्गमार्गं ये दुःकृतं कर्म कुर्वंति तेषां यातनामार्गं च रक्षति। उभयेषां मार्गविपर्ययो यथा न भवति तथा पालयतीत्यर्थः। एष सोऽयं पूषा निधीनां पृथिव्यां निहितानि धनानि वेद वेत्ति। ज्ञात्वा स्तोतॄणां तानि ददातीत्यर्थः। तत्र दृष्टांतः। तस्करो यथा। यथा चोरः पथि गच्छतां पुरुषाणां धनहरणार्थं मार्गं रक्षति तथा च स चोरो गृहे निहितानि ज्ञात्वा तदाहृत्य तस्य सहायेभ्यो यथा तानि ददाति तद्वत्॥

त्रीण्येक उरुगायो वि चक्रमे यत्र देवासो मदंति॥ ७॥

त्रीणि। एकः। उरुऽगायः। वि। चक्रमे। यत्र। देवासः। मदंति॥ ७॥

उरुगायो विचक्रम इति पदलिंगाद्विष्णुरुच्यते। उरुगाय उरुभिर्बहुभिर्गातव्यः। यद्वा बहुषु देशेषु गंता बहुकीर्तिर्वा। सर्वान् शत्रून् स्वसामर्थ्येन शब्दयत्याक्रंदयतीति वोरुगायः। एतादृश एकोऽसहायो विष्णुस्त्रीणि पदानि भुवनानि विचक्रमे साधु पादेन विक्रांतवान्॥ वेः पादविहरणे। पा० १. ३. ४१.। इति क्रमतेरात्मनेपदं। यत्र येषु लोकेषु देवास इंद्रादयो देवा मदंति यजमानदत्तैर्हविर्भिर्माद्यंति तानि विचक्रम इत्यन्वयः॥

विभिर्द्वा चरत एकया सह प्र प्रवासेव वसतः॥ ८॥

विऽभिः। द्वा। चरतः। एकया। सह। प्र। प्रवासाऽइव। वसतः॥ ८॥

एकया सहेति लिंगादश्विनावभिधीयेते। द्वा द्वौ द्वित्वसंख्योपेतावश्विनौ विभिः। वी गत्यादिषु। क्विप्। छांदसो ह्रस्वः। गमनसाधनैरश्वैश्चरतः संचरेते। किंचेमावश्विनावेकया सूर्याख्यया ताभ्यां स्वयं वृतया स्त्रिया सह प्रवसतः प्रवासं सर्वत्र गमनं

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कुरुतः । प्रवासे दृष्टांतः । प्रवासेव । यथा प्रवासिनौ द्वौ पुरुषावेकया स्त्रिया सह प्रवसतस्तद्वत् ॥

सदो द्वा चक्राते उपमा दिवि सम्राजा सर्पिरासुती ॥९॥

सदः । द्वा । चक्राते इति । उपऽमा । दिवि । संऽराजा । सर्पिरासुती इति सर्पिःऽआसुती ॥ ९ ॥

सम्राजाविति लिंगेन मित्रावरुणावभिधीयेते । उपमोपमौ परस्परं स्वकांत्योपमानभूतौ । यद्वोपमीयत आभ्यां सर्वमित्युपमौ । सर्वस्य एतावेव सम्राजा सम्राजौ सम्यग्दीप्यमानौ सर्पिरासुती सर्पिर्घृतमाभ्यामासूयत इति सर्पिरासुती । घृतहविष्कौ द्वा द्वौ मित्रावरुणौ दिवि द्युलोके सदः सीदंत्यत्रेति सदः स्थानं तच्चक्राते अकार्ष्टां ॥

अर्चंत एके महि साम मन्वत तेन सूर्यमरोचयन् ॥ १० ॥

अर्चंतः । एके । महि । साम । मन्वत । तेन । सूर्यं । अरोचयन् १०

एकेऽत्रयो महि महत्साम त्रिवृत्पंचदशादि मन्वत । तदेवार्चंतः पूजयंत एतादृशा अत्रयस्तेनोक्तेन साम्ना सूर्यमरोचयन् अदीपयन् । त एवात्र देवता ॥

(मं० १० सू० ७२)

२५.

देवानां नु वयं जाना प्र वोचाम विपन्यया । उक्थेषु शस्यमानेषु यः पश्यादुत्तरे युगे ॥ १ ॥

देवानां । नु । वयं । जाना । प्र । वोचाम । विपन्यया ॥ उक्थेषु । शस्यमानेषु । यः । पश्यात् । उत्ऽतरे । युगे ॥ १ ॥

अदितिर्दाक्षायण्यनेन सूक्तेन स्वयं यथादित्यानजनयत्तद्ब्रवीति । बृहस्पत्यृषिपक्षे स ऋषिरदितेः सकाशादादित्योत्पत्तिप्रकारमाह । वयं देवानामादित्यानां जाना जन्मानि प्रवोचाम प्रकथयाम । विपन्यया विस्पष्टया वाचा । वयमिति वोचामेति चोभयत्र पूजार्थं बहुवचनं । अथैकवदाह । यो देवानां गणः पूर्वे युग उत्पन्नोऽप्युक्थेषु शस्यमानेषु यागे शस्त्रेष्वनुष्ठीयमानेषूत्तरे युगे वर्तमानं स्तुवंतं स्तोतारं पश्यात् पश्यति । अनेकेष्वपि युगेषु गतेषु कर्मसु स्तूयमानो वर्तत इत्यर्थः ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

ब्रह्मणस्पतिरेता सं कर्मार इवाधमत् । देवानां पूर्व्ये युगेऽसतः सदजायत ॥ २ ॥

ब्रह्मणः । पतिः । एता । सं । कर्मारःऽइव । अधमत् ॥ देवानां । पूर्व्ये । युगे । असतः । सत् । अजायत ॥ २ ॥

ब्रह्मणोऽन्नस्य पतिरदितिरेतैतानि देवानां जन्मानि कर्मार इव स यथा भस्त्रयाग्निमुपधमति प्रज्वलनार्थमेवं समधमत् । उदपादयदित्यर्थः । देवानां पूर्व्ये युगे । आदिसृष्टावित्यर्थः । तेषामुपादानकारणादसतो नामरूपवर्जितत्वेनासत्समानाद्ब्रह्मणः सकाशात्सन्नामरूपविशिष्टं देवादिकमजायत प्रादुरभूत् ॥ असद्वा इदमग्र आसीत्ततो वै सदजायतेति हि श्रुतिः । न सदात्मकस्य प्रपंचस्यासत्कारणत्वं युक्तमिति वाच्यं छंदोगैः कथमसतः सज्जायेतेत्यसत्कारणत्वमाक्षिप्य सदेव सोम्येदमग्र आसीदित्यवधारितत्वात् । छां० उ० ६. २. । तर्ह्यसत्कारणप्रतिपादकवाक्यानां का गतिरिति चेत् तेषामव्याकृतत्वाभिप्रायत्वात् तद्धेदं तर्ह्यव्याकृतमासीदिति श्रुतेः । यद्येवं तर्ह्यदितेः सकाशात्कथं देवाद्युत्पत्तिः । वायोरग्निरित्यादिवत् अधिष्ठानसकाशादुत्पत्तेः । यद्वा देवानां कारणभूतं सदसतो ब्रह्मणः सकाशादुत्पन्नमिति योजनादुक्तन्यायोऽस्मिन्पक्षेऽपि समान एव ॥

देवानां युगे प्रथमेऽसतः सदजायत । तदाशा अन्वजायंत तदुत्तानपदस्परि ॥ ३ ॥

देवानां । युगे । प्रथमे । असतः । सत् । अजायत ॥ तत् । आशाः । अनु । अजायंत । तत् । उत्तानऽपदः । परि ॥ ३ ॥

पूर्वार्धमुक्तं । तदन्वाशा दिशोऽजायंत । तत्परि तदन्वित्यर्थः । उत्तानपदः उत्तानमूर्ध्वतानं पद्यंत इत्युत्तानपदो वृक्षाः । तेऽजायंत प्रादुरभवन् ॥

भूर्जज्ञ उत्तानपदो भुव आशा अजायंत । अदितेर्दक्षो अजायत दक्षाद्वदितिः परि ॥ ४ ॥

भूः । जज्ञे । उत्तानऽपदः । भुवः । आशाः । अजायंत ॥ अदितेः । दक्षः । अजायत । दक्षात् । ऊं इति । अदितिः । परि ॥ ४ ॥

भूरुत्तानपदो वृक्षाज्जज्ञे । तथा भुवः सकाशादाशा अजायंत । तथादितेर्दक्षोऽजायत उत्पन्नः । दक्षादु दक्षादप्यदितिः पर्यजायत । न स्वोत्पन्नं कार्यं स्वस्यैव कारणमपि भवतीति विप्रतिषिद्धमिति वाच्यं । यास्काचार्य इदमेव वाक्यमुदाहृत्य विरो-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

धमाशंक्य पर्यपहरत् । तथा हि अदितेर्दक्षो अजायत दक्षाद्वदितिः परीति च तत्कथमुपपद्येत । समानजन्मानौ स्यातामित्यपि वा देवधर्मेणेतरेतरजन्मानौ स्यातामितरेतरप्रकृति । नि० ११. २३. । इति ॥

अदितिर्ह्यजनिष्ट दक्ष या दुहिता तव । तां देवा अन्वजायंत भद्रा अमृतबंधवः ॥ ५ ॥

अदितिः । हि । अजनिष्ट । दक्ष । या । दुहिता । तव ॥ तां । देवाः । अनु । अजायंत । भद्राः । अमृतऽबंधवः ॥ ५ ॥

हे दक्ष तव या दुहिताभूत्सादितिरजनिष्ट हि पुत्रानादित्यान् । तदेवाह । तां देवा अन्वजायंत भद्राः स्तुत्या भजनीया अमृतबंधवोऽमरणबंधनाः ॥

यद्देवा अदः सलिले सुसंरब्धा अतिष्ठत । अत्रा वो नृत्यतामिव तीव्रो रेणुरपायत ॥ ६ ॥

यत् । देवाः । अदः । सलिले । सुऽसंरब्धाः । अतिष्ठत ॥ अत्र वः । नृत्यतांऽइव । तीव्रः । रेणुः । अप । आयत ॥ ६ ॥

अनयोत्तरेण चादित्याः स्तूयंते । यद्यदा हे देवा अदोऽमुष्मिन्सलिये यूयं सुसंरब्धाः सुष्ठु लब्धात्मानोऽतिष्ठत स्थितवंतः । आपो वा इदं सर्वमप एव ससर्जादाविति श्रुतिस्मृती । अत्रास्मिन्सलिले नृत्यतामिव वो युष्माकं संबंधी तीव्रो दुःसहो रेणुरंशभूत एकोऽपायत अपागच्छत् । दिवं प्रति गत इति सूर्याभिप्रायं । परा मार्तांडमास्यदिति वक्ष्यति ॥

यद्देवा यतयो यथा भुवनान्यपिन्वत । अत्रा समुद्र आ गूळहमा सूर्यमजभर्तन ॥ ७ ॥

यत् । देवाः । यतयः । यथा । भुवनानि । अपिन्वत ॥ अत्र । समुद्रे । आ । गूळ्हं । आ । सूर्यं । अजभर्तन ॥ ७ ॥

यद्यदा हे देवा यतयो यथा । वृष्ट्या नियमयंतीति वा वर्षणेन यातयंतीति वा यतयो मेघाः । ते यथोदकैर्भुवनानि लोकं पूरयंति तद्वत्स्वतेजोभिरपिन्वत पूरितवंतोऽत्र समुद्रेऽप्स्वा गूळ्हं निगूळ्हं सूर्यं प्रातरुदयायाजभर्तन आहृतवंतः ॥

अष्टौ पुत्रासो अदितेर्ये जातास्तन्व१स्परि । देवाँ उप प्रैत्सप्तभिः परा मार्तांडमास्यत् ॥ ८ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

अ॒ष्टौ । पु॒त्रासः॑ । अदि॑तेः । ये । जा॒ताः । त॒न्वः॑ । परि॑ ॥ दे॒वान् । उप॑ । प्र । ऐ॒त् । स॒प्तऽभिः॑ । परा॑ । मा॒र्ता॒ण्डं । आ॒स्य॒त् ॥ ८ ॥

अष्टौ पुत्रासः पुत्रा मित्रादयोऽदितेर्भवंति । येऽदितेस्तन्वः परि शरिराज्जाता उत्पन्नाः । अदितेरष्टौ पुत्रा अध्वर्युब्राह्मणे परिगणिताः । तथा हि ।ताननुक्रमिष्यामो मित्रश्च वरुणश्च धाता चार्यमा चांशश्च भगश्च विवस्वानादित्यश्चेति । तथा तत्रैव प्रदेशांतरेऽदितिं प्रस्तुत्याम्नातं । तस्या उच्छेषणमदधुस्तत्प्राश्नात् सा रेतोऽधत्त तस्यै चत्वार आदित्या अजायंत सा द्वितीयमपचदित्यष्टानामादित्यानामुत्पत्तिर्वर्णिता । तै० सं० ६. ५. ६. १. । सादितिः सप्तभिः पुत्रैर्देवानुपप्रैत् उपागच्छत् । अष्टमं पुत्रं मार्तांडं सूर्यं परास्यत् उपरि प्राक्षिपदित्यर्थः ॥

स॒प्तभिः॑ पु॒त्रैरदि॑ति॒रुप॒ प्रैत्पू॒र्व्यं यु॒गं । प्र॒जायै॑ मृ॒त्यवे॑ त्व॒त्पुन॑र्मा॒र्ता॒ण्डमाभ॑रत् ॥ ९ ॥

स॒प्तऽभिः॑ । पु॒त्रैः । अदि॑तिः । उप॑ । प्र । ऐ॒त् । पू॒र्व्यं । यु॒गं ॥ प्र॒ऽजायै॑ । मृ॒त्यवे॑ । त्व॒त् । पुन॑रिति॑ । मा॒र्ता॒ण्डं । आ । अ॒भ॒र॒त् ॥ ९ ॥

पूर्वमंत्रोक्त एवार्थः पुनरत्रोच्यते सप्तभिर्मार्तांडव्यतिरिक्तैर्मित्रादिभिरदितिः पूर्व्यं पुराणं युगमुपप्रैत् उपगता । अथ प्रजायै प्राणिनामुत्पत्तये मृत्यवे तेषां मरणाय मार्तांडं । मृताद्बृद्धादंडाज्जातं मार्तांडनामानं सूर्यं पुनराभरत् आहरत् द्युलोकेऽधारयत् । प्राणिमरणजननादीनां सूर्योदयास्तमयायत्तता स्फुटा । तस्यै व्यृद्धमांडमजायतेत्यादि ब्राह्मणं । तै० सं० ६. ५. ६. १. ॥

(मं. १० सू. १०८)

२६.

किमि॒च्छंती॑ स॒रमा॒ प्रेदमा॑नड् दू॒रे ह्यध्वा॒ जगु॑रिः परा॒चैः । का॒स्मेहि॑ति॒ः का परि॑तक्म्यासीत्क॒थं र॒साया॑ अतरः॒ पयां॑सि १

किं । इ॒च्छंती॑ । स॒रमा॑ । प्र । इ॒दं । आ॒न॒ट् । दू॒रे । हि । अध्वा॑ । जगु॑रिः । प॒रा॒चैः ॥ का । अ॒स्मेऽहि॑तिः । का । परि॑ऽतक्म्या । आ॒सी॒त् । क॒थं । र॒साया॑ः । अ॒त॒रः॒ । पयां॑सि ॥ १ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अनयागच्छंतीं सरमां दृष्ट्वा पणयो वदंति । सरमा सरणशीलैतन्नामिका देवशुनी किमिच्छंती किं प्रार्थयमाना सतीदमस्मदीयं स्थानं प्रानट् प्राप्नोत् । आङ्पूर्वो नशिर्व्याप्तिकर्मा । तस्य लुङि मंत्रे घसेत्यादिना च्लेर्लुक् । छंदस्यपि दृश्यत इत्याडागमः । पराचैः परांचि पराङ्मुखान्यावृत्तिवर्जितानि यानि गमनानि तैर्जगुरिरुद्गूर्णः । महता प्रयत्नेनापि गंतुं न शक्यत इत्यर्थः । गॄ निगरणे । आदृगमहनेत्यादिना किन्प्रत्ययः । बहुलं छंदसि । पा० ७. १. १०३. । इत्युत्वं । तादृशोऽयमध्वा दूरे हि विप्रकृष्टः खलु । यद्वा । पराचैः परांचनैर्जगुरिरत्यर्थं गंत्री पार्ष्णिभागमनालोकमाना सतीदं स्थानं प्राप्नोति । दूरेऽयमध्वा यदृच्छया गंतुं न शक्यते । अतो वयमेतां पृच्छामः । हे सरमे का कीदृश्यस्मेहितिः । कोऽस्मास्वर्थहितिः । कोऽस्मासु त्वदपेक्षितार्थो निहितः । यद्वा । अस्मासु कोऽर्थो गतः । दधातेर्हिनोतेर्वा क्तिनि रूपं । आगच्छंत्यास्तव का कीदृशी परितक्म्या रात्रिरासीत् । यद्वा तकतिर्गत्यर्थः । परितकनं परितो गमनं भ्रमणं वा कीदृशमासीत् । कथं च रसायाः शब्दायमानाया अंतरिक्षनद्या योजनशतविस्तीर्णायाः पयांस्युदकान्यतरः तीर्णवत्यसि एतद्वद । अत्र किमिच्छंती सरमेदं प्रानडित्यादिकं निरुक्तं द्रष्टव्यं ॥

इंद्रस्य दूतीरिषिता चरामि मह इच्छंती पणयो निधीन्वः । अतिष्कदो भियसा तन्न आवत्तथा रसाया अतरं पयांसि ॥ २ ॥

इंद्रस्य । दूतीः । इषिता । चरामि । महः । इच्छंती । पणयः । निऽधीन् । वः ॥ अतिऽस्कदः । भियसा । तत् । नः । आवत् । तथा । रसायाः । अतरं । पयांसि ॥ २ ॥

अनया तान्सरमा प्रत्युवाच । हे पणय एतन्नामका असुरा इंद्रस्य दूतीः । सुपां सुलुगिति प्रथमैकवचनस्य सुश्छांदसः । अहमिषिता तेनैव प्रेषिता सती चरामि युष्मदीयं स्थानमागच्छामि । किमर्थं । वो युष्मदीयान्युष्मदीये पर्वतेऽधिष्ठापितान्महो महतो निधीन्बृहस्पतेर्गोनिधीनिच्छंती कामयमाना सती चरामि । किंच । अतिष्कदः । स्कंदिर्गतिशोषणयोः । भावे क्विप् । अतिष्कंदनादतिक्रमणाज्जातेन भियसा भयेन तन्नदीजलं नः । पूजायां बहुवचनं । मा मावत् अरक्षत् । तथा तेन प्रकारेण रसाया नद्याः पयांस्युदकान्यतरं तीर्णवत्यस्मि ॥

कीदृङ्ङिंद्रः सरमे का दृशीका यस्येदं दूतीरसरः पराकात् । आ च गच्छान्मित्रमेना दधामाथा गवां गोपतिर्नो भवाति ॥ ३ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

कीदृङ् । इंद्रः । सरमे । का । दृशीका । यस्य । इदं । दूतीः । असरः । पराकात् ॥ आ । च । गच्छात् । मित्रं । एन । दधाम । अथ । गवां । गोऽपतिः । नः । भवाति ॥ ३ ॥

तेषां वाक्यं । हे सरमे तव स्वामींद्रः कीदृक् कियत्पराक्रमवान् । का दृशीका तस्य कीदृशी दृष्टिः । दृष्टिरूपा सेना कियती । यस्य दूतीर्दूती त्वमिदमस्मदीयं स्थानं पराकादतिदूरादसरः आगमः । इति तामुक्त्वेदानीं ते परस्परमाहुः । एषा सरमा गच्छाच्च आगच्छतु च । गमेर्लेट्याडागमः । स्वामी भवाति भवतु । न ह्येकस्या गोः किंतु बहूनां गवां स्वामी भवतु । वृत्त्यवृत्तिभ्यां स्वामित्वं बाहुल्यं च विवक्ष्यते ॥

नाहं तं वेद दभ्यं दभत्स यस्येदं दूतीरसरं पराकात् । न तं गूहंति स्रवतो गभीरा हता इंद्रेण पणयः शयध्वे ॥ ४

न । अहं । तं । वेद । दभ्यं । दभत् । सः । यस्य । इदं । दूतीः । असरं । पराकात् ॥ न । तं । गूहंति । स्रवतः । गभीराः । हताः । इंद्रेण । पणयः । शयध्वे ॥ ४ ॥

सरमा वदति । हे पणयः तमिंद्रं दभ्यं हंतव्यमिति न वेद न जानामि । दभेरचोयत् । कथं । स इंद्रो दभत् सर्वाञ्जनान्दभति हिनस्त्येव । दभेर्लेटि रूपं । वाक्यभेदादनिघातः । यस्य दूतीर्दूत्यहमिदं युष्मदीयं स्थानं पराकादतिदूराद्देशादसरं प्राप्ताभूवं । इंद्रो हिंसितव्यो न भवतीत्यत्र युक्तिमाह । स्रवतः स्रवणं स्रवः । तमाचरंति । आचारार्थे क्विप् । तुगागमः । जसि रूपं स्रवणशीला गभीरा गंभीरा नद्यस्तमिंद्रं न गूहंति न संवृण्वंति नाच्छादयंति । किं त्वाविष्कुर्वंति । वयं यस्य महिम्ना समुद्रं प्रतिसरामः । तस्मादहिंस्य इत्येनं प्रकटीकुर्वंति । गुहू संवरणे । भौवादिकः । तस्माद्धे पणयो यूयमिंद्रेण तादृशपराक्रमेण हताः संतः शयध्वे । शीङ् स्वप्ने । बहुलं छंदसीति शपो लुगभावः ॥

इमा गावः सरमे या ऐच्छः परि दिवो अंतान्त्सुभगे पतंती । कस्त एना अव सृजादयुध्व्युतास्माकमायुधा संति तिग्मा ॥ ५ ॥

इमाः । गावः । सरमे । याः । ऐच्छः । परि । दिवः । अंतान् । सुऽभगे । पतंती ॥ कः । ते । एनाः । अव । सृजात् । अयुध्वी । उत । अस्माकं । आयुधा । संति । तिग्मा ॥ ५ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

क्रुद्धाः पणयः प्रत्यूचुः। हे सुभगे शोभनसौभाग्यवति हे सरमे दिवो द्युलोकस्यांतान्पर्यंतान्परि पतंती कुत्र गावस्तिष्ठंतीति परितो गच्छंती त्वमिमाः परिदृश्यमाना या गावः। सुब्व्यत्ययः । गा ऐच्छः कामयसे ता एना गास्ते त्वदीयः कोऽयुध्व्ययुद्ध्वावसृजात् अस्मात्पर्वतादवसृजेत् विनिर्गमयेत् । सृजेर्लेटि रूपं । अयुध्वी युधेः क्त्वाप्रत्यये स्नात्व्यादयश्चेति निपातितः । नञ्समासत्वाल्ल्यबादेशाभावः । नञः प्रकृतिस्वरत्वं । उतापि च । अस्माकं तिग्मा तीक्ष्णान्यायुधायुधानि संति तस्मादस्माभिर्युद्धमकृत्वा को नाम गा आहरति ॥

असे॒न्या वः॑ पणयो॒ वचां॑स्यनिष॒व्यास्त॒न्वः॑ संतु पा॒पीः ।
अधृ॑ष्टो व॒ एत॒वा अ॑स्तु पंथा॒ बृह॒स्पति॑र्व उभ॒या न मृ॑ळात् ॥६॥

अ॒से॒न्या । व॒ः । प॒ण॒यः॒ । वचां॑सि । अ॒नि॒ष॒व्याः॑ । त॒न्वः॑ । सं॒तु॒ । पा॒पीः ॥ अधृ॑ष्टः । व॒ः । ए॒त॒वै । अ॒स्तु॒ । पंथाः॑ । बृह॒स्पतिः॑ । व॒ः । उ॒भ॒या । न । मृ॒ळा॒त् ॥ ६ ॥

सा तान्निराह । हे पणयो वो युष्माकं वचांसि पूर्वोक्तानि वचनान्यसेन्याऽसेन्यानि सेनार्हाणि न भवंति। सेनाशब्दात्तदर्हतीत्यर्थे छंदसि चेति यत्प्रत्ययः। नञा समासः। ययतोश्चातदर्थ इत्युत्तरपदांतोदात्तत्वं । तथा तन्वो युष्मदीयानि शरीराण्यनिषव्या इष्वर्हाणि न संतु पराक्रमराहित्येन । पूर्ववत्प्रत्ययः। ओर्गुण इति गुणः। स्वरश्च तादृक् । यतः पापीः पापपुक्तानि खलु । छंदसीवनिपाविवितीप्रत्ययः । जसः शः । किंच। वो युष्मदीयः पंथा मार्ग एतवै गंतुमधृष्टोऽसमर्थोऽस्तु । इण् गतावित्यस्य तुमर्थे तवैप्रत्ययः तवै चांतश्च युगपदिति धातोः प्रत्ययांतस्य च युगपदुदात्तत्वं। तत्र हेतुमाह। वो युष्मदीयानुभयोभयविधान्पूर्वोक्तांस्तन्वो देहान्बृहस्पतिरिंद्रप्रेरितो न मृळात् न सुखयतु किंतु बाधेत । मृड सुखने । लेट्यडागमः ॥

अ॒यं नि॒धिः स॑रमे॒ अद्रि॑बुध्नो॒ गोभि॒रश्वे॑भि॒र्वसु॑भि॒र्न्यृ॑ष्टः ।
रक्षं॑ति॒ तं प॒णयो॒ ये सु॑गो॒पा रेकु॑ प॒दमल॑क॒मा ज॑गंथ ॥ ७ ॥

अ॒यं । नि॒ऽधिः । स॒र॒मे॒ । अद्रि॑ऽबुध्नः । गोभिः॑ । अश्वे॑भिः । वसु॑ऽभिः । निऽऋ॑ष्टः ॥ रक्षं॑ति । तं । प॒णयः॑ । ये । सु॒ऽगो॒पाः । रेकु॑ । प॒दं । अल॑कं । आ । ज॒गं॒थ॒ ॥ ७ ॥

ते पुनराहुः।हे सरमे अयं निधिरस्मदीयः कोशोऽद्रिबुध्नः। बंध बंधने। बंधेर्ब्रधिबुधी चेति नप्रत्ययः । बुध इत्यादेशः । अद्रिर्बंधको यस्य तादृशः । तथा हृतैर्गोभिरश्वेभिरश्वैश्च वसुभिरात्मीयैर्धनैश्च न्यृष्टो नितरां प्राप्तो भवति । ऋषी गतौ । क्तप्रत्यये श्वी-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

दितो निष्ठायामितीट्प्रतिषेधः। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। सुगोपाः गुपू रक्षणे आयप्रत्ययांतात्क्विप्यातोलोपयलोपौ। सुष्ठु गोपायितारो ये पणयस्तेऽसुरास्तं निधिं रक्षंति पालयंति। रेकु। रेकृ शंकायां। औणादिक उप्रत्ययः। शंकितं गोभिः शब्दायमानं पदमस्माभिः पालितं स्थानमलकं व्यर्थमेवाजगंथ आगतवत्यसि। गमेर्लिटि रूपं॥

एह गमन्नृषयः सोमशिता अयास्यो अंगिरसो नवग्वाः।
त एतमूर्वं वि भजंत गोनामथैतद्वचः पणयो वमन्नित्॥८॥

आ। इह। गमन्। ऋषयः। सोमऽशिताः। अयास्यः। अंगिरसः। नवऽग्वाः॥ ते। एतं। ऊर्वं। वि। भजंत। गोनां। अथ। एतत्। वचः। पणयः। वमन्। इत्॥ ८॥

सरमा पुनःप्रत्युवाच। हे पणयः सोमशिताः सोमेन तीक्ष्णीकृताः सोमपानेन मत्ताः। शिञ् निशाने। कर्मणि क्तप्रत्ययः। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। तादृशा नवग्वा नवगतयः। यद्वा। अंगिरसां सत्रमासीनानां मध्ये केचन नवसु माःस्वध्यतिष्ठन् ते नवग्वाः। अनेन दशग्वा अप्युपलक्ष्यंते। उभयविधास्तेंऽगिरस ऋषयः। तेषां प्रथमोऽयास्य एतन्नामा च। त एत इह युष्मदीये स्थान आ गमन् आगच्छेयुः। गमेश्छंदसि लुङ्लङ्लिट इति सार्वकालिको लुङ्। लृदित्त्वाच्छेरङ्। आगत्य च ते गोनां। गोः पादांत इति छंदसि नुडागमः। गवामूर्वं तं समूहं वि भजंत विभागं कुर्युः। अत्रापि पूर्ववत्सार्वकालिको लुङ्। अथानंतरं पणयो यूयमेतद्वचः पूर्वं यद्यर्थमागतासीति यद्वाक्यमवोचत तद्वाक्यं तदा वमन्निद्वमंतः परित्यजंत एव भवथ। वमु उद्गिरणे। शतरि सुपां सुलुगिति जसो लुक्। नुमागमः। संयोगांतस्य लोपः। यद्वा लङि रूपं स्वरश्छांदसः॥

एवा च त्वं सरम आजगंथ प्रबाधिता सहसा दैव्येन।
स्वसारं त्वा कृणवै मा पुनर्गा अप ते गवां सुभगे भजाम ९

एव। च। त्वं। सरमे। आऽजगंथ। प्रऽबाधिता। सहसा। दैव्येन॥ स्वसारं। त्वा। कृणवै। मा। पुनः। गाः। अप। ते। गवां। सुऽभगे। भजाम॥ ९॥

तथैवमुक्ते सति पणयः प्रणयवाक्यमाहुः। हे सरमे त्वं दैव्येन देवसंबंधिना सहसा बलेन प्रबाधिता यथा तथा बलपुरं प्राप्य तत्र स्थिता गा दृष्ट्वा पुनरागच्छेति तेन

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रपीडिता त्वमेवं चेदाजगंथागतवत्यसि ॥ चशब्दश्चेदर्थे । निपातैर्यद्यदिहंतेति तिङो निघाताभावः । गमेर्लिटि थलि रूपं । सह सुपेत्यत्र सहेति योगविभागात्समासः । तिङि चोदात्तवतीति गतेर्निघातः । लित्स्वरः ॥ तर्हि त्वा त्वां स्वसारं भगिनीं कृणवै करवै । समूहापेक्षैकवचनं । त्वं तु पुनर्मा गाः इंद्रादीन्मागच्छ । अपि तर्हि हे सुभगे सरमे ते त्वदीयानां गवां समूहं पर्वतादपगमय्य भजाम । त्वं च वयं च विभजाम । विभागं करवामेत्यर्थः ॥

नाहं वेद भ्रातृत्वं नो स्वसृत्वमिंद्रो विदुरंगिरसश्च घोराः । गो कामा मे अच्छदयन्यदायमपात इत पणयो वरीयः १०

न । अहं । वेद । भ्रातृऽत्वं । नो इति । स्वसृऽत्वं । इंद्रः । विदुः । अंगिरसः । च । घोराः ॥ गोऽकामाः । मे । अच्छदयन् । यत् । आयं । अप । अतः । इत । पणयः । वरीयः ॥ १० ॥

सा तान्प्रत्याचष्टे । हे पणयः अहं भ्रातृत्वं न वेद न जानामि । तथा स्वसृत्वं च नो वेद नैव जानामि । के जानंति तानाह । इंद्रो घोराः शत्रूणां भयंकरा अंगिरसश्च विदुः जानंति । किंच । अस्मात्स्थानादहं यद्यदायमिंद्रादीन्प्राप्नवं । अय पय गतौ । लङि रूपं । तदा मे मदीया गोमा युष्माभिरपहृता गाः कामयमाना इंद्रादय अच्छदयन् युष्मदीयं स्थानमाच्छादयंति । छद अपवारणे । अतःकारणाद्धे पणयो वरीय उरुतरं गवां वृंदं परित्यज्यापेत अन्यत्स्थानं प्रति गच्छत । यद्वा वरीयः प्रभूतमतिदूरं देशं गच्छत इत । इण् गतौ । लोटि रूपं । वरीयः । उरुशब्दादीयसुनि प्रियस्थिरेत्यादिना वरादेशः ॥

दूरमित पणयो वरीय उद्गावो यंतु मिनतीर्ऋतेन । बृहस्पतिर्या अविंदन्निगूळ्हाः सोमो ग्रावाण ऋषयश्च विप्राः ११

दूरं । इत । पणयः । वरीयः । उत् । गावः । यंतु । मिनतीः । ऋतेन ॥ बृहस्पतिः । याः । अविंदत् । निऽगूळ्हाः । सोमः । ग्रावाणः । ऋषयः । च । विप्राः ॥ ११ ॥

हे पणयः यूयं वरीय उरुतरं दूरं दूरदेशमित गच्छत । युष्माभिरपहृता गाव ऋतेन सत्येन मिनतीर्मिनत्यो द्वारस्य पिधायकं पर्वतं हिंसंत्यो विदारयंत्य उद्यंतु तस्मादुद्गच्छंतु । यदा मिनतीः । व्यत्ययेन कर्मणि शतृ । मीयमाना युष्माभिर्वाध्यमानास्ता गावः । सुब्व्यत्ययः । गा ऋतेन स्तुतिभिर्गंतव्येनेंद्रेण सहायेन बृहस्प-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

त्यादय उद्यंतु पर्वतादुद्गमयंतु । निगूढा नितरां स्थापिता या गा बृहस्पतिरविंदत् लप्स्यते । तथा सोमस्तदभिषवकारिणो ग्रावाणश्च विप्रा मेधाविन ऋषयोंऽगिरसश्च लप्स्यंते । विद्लृ लाभे । तौदादिकः । तस्माच्छंदसि लुङ्लङ्लिट इति भविष्यदर्थे लङ् । शे मुचादीनामिति नुगागमः ॥

(मं० १० सू० १३९.)

२७.

सूर्यरश्मिर्हरिकेशः पुरस्तात्सविता ज्योतिरुदयाँ अजस्रं । तस्य पूषा प्रसवे याति विद्वान्त्संपश्यन्विश्वा भुवनानि गोपाः ॥ १ ॥

सूर्यऽरश्मिः । हरिऽकेशः । पुरस्तात् । सविता । ज्योतिः । उत् । अयान् । अजस्रं ॥ तस्य । पूषा । प्रऽसवे । याति । विद्वान् । संऽपश्यन् । विश्वा । भुवनानि । गोपाः ॥ १ ॥

सूर्यरश्मिः । उषसः प्रादुर्भावानंतरं सूर्यस्योदयात्पूर्वं यः कालस्तस्य कालस्याभिमानी देवः सवितेत्युच्यते । सूर्यरश्मिः सूर्यस्य सर्वस्य प्रेरकस्यादित्यस्य रश्मिरेव रश्मिर्यस्य स तथोक्तः । हरिकेशः । हरयो हरणशीला हरितवर्णा वा केशाः केशस्थानीयाः प्रकाशमाना वा दीप्तयो यस्येदृशः सविता सर्वस्य प्रेरको देवः पुरस्तात्पूर्वस्यां दिश्यजस्रमनवरतं ज्योतिस्तेज उदयान् उद्याति उद्गमयति । यातेरंतर्भावितण्यर्थाच्छांदसो लङ् । व्यत्ययेन बहुवचनं । संहितायां दीर्घादटि समानपाद इति नकारस्य रुत्वं । आतोऽटि नित्यमिति सानुनासिक आकारः । तस्य सवितुः प्रसवे प्रेरणेऽनुज्ञायां सत्यां विद्वाञ्जानन्गोपायिता रक्षिता पूषा पोषको देव आदित्यो याति नभसि गच्छति । किं कुर्वन् विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि संपश्यन् सम्यक् प्रकाशयन् ॥

नृचक्षा एष दिवो मध्य आस्त आपप्रिवान्रोदसी अंतरिक्षं । स विश्वाचीरभि चष्टे घृताचीरन्तरा पूर्वमपरं च केतुं ॥ २ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नृऽचक्षाः । एषः । दिवः । मध्ये । आस्ते । आपप्रिऽवान् । रोदसी इति । अंतरिक्षं ॥ सः । विश्वाचीः । अभि । चष्टे । घृताचीः । अंतरा । पूर्वं । अपरं । च । केतुं ॥ २ ॥

नृचक्षा नॄन्मनुष्यान्पश्यन्. यद्वा नृभिर्नेतृभी रश्मिभिः प्रकाशमान एष सविता दिवो द्युलोकस्य मध्य आस्ते निषीदति । किं कुर्वन् । रोदसी द्यावापृथिव्यावंतरिक्षं चापप्रिवान् स्वतेजसापूरयन् । प्रा पूरणे । अस्माच्छांदसो लिट् । क्वसुश्चेति तस्य क्वसुरादेशः । वस्वेकाजाद्घसामितीडागमः । स देवो विश्वाचीर्विश्वमंचंतीः सर्वव्यापिनीः प्राच्यादिमहादिशोऽभिचष्टे प्रकाशयति । तथा घृताचीर्घृतं दीप्तं रूपमंचंतीराग्नेय्यादिविदिशश्च प्रकाशयति । अंचतेः क्विन्नंतादंचतेश्चोपसंख्यानमिति ङीप् । ततो भसंज्ञायामच इत्याकारलोपे चाविति दीर्घत्वं । उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वे प्राप्ते चाविति पूर्वस्याच उदात्तत्वं । तथा पूर्वं पूर्वभागं केतुं प्रज्ञापनीयमपरं पृष्ठभागं चांतरांतरालं चाभिचष्टे प्रकाशयति ॥

रायो बुध्नः संगमनो वसूनां विश्वा रूपाभि चष्टे शचीभिः । देव इव सविता सत्यधर्मेंद्रो न तस्थौ समरे धनानां ॥ ३ ॥

रायः । बुध्नः । संऽगमनः । वसूनां । विश्वा । रूपा । अभि । चष्टे । शचीभिः ॥ देवःऽइव । सविता । सत्यऽधर्मा । इंद्रः । न । तस्थौ । संऽअरे । धनानां ॥ ३ ॥

रायो धनस्य बुध्नो बंधको मूलभूतो वा । ऊडिदमित्यादिना रैशब्दाद्विभक्तेरुदात्तत्वं । तथा वसूनां धनानां संगमनः संगमयिता प्रापयितेदृशः सविता शचीभिर्दीप्तिभिर्विश्वा रूपा सर्वाणि रूपाणि निरूपणीयानि पदार्थजातान्यभि चष्टे अभिपश्यति । प्रकाशयति । अपि च देव इवायं सविता सावको देवः सत्यधर्मा सत्यमवितथं धर्मधारणं धारणहेतुभूतं कर्म वा यस्य तादृशो भवति । तथेंद्रो न इंद्र इव धनानां समरे संग्रामे सम्यक्प्रापणे तस्थौ । अयं सवितोद्युक्तः सन् तिष्ठति ॥

विश्वावसुं सोम गंधर्वमापो ददृशुषीस्तदृतेना व्यायन् । तदन्ववैदिंद्रो रारहाण आसां परि सूर्यस्य परिधींरपश्यत् ४

विश्वऽवसुं । सोम । गंधर्वं । आपः । ददृशुषीः । तत् । ऋतेन । वि । आयन् ॥ तत् । अनुऽअवैत् । इंद्रः । ररहाणः । आसां । परि । सूर्यस्य । परिऽधीन् । अपश्यत् ॥ ४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

हे सोम त्वया सहितं गंधर्वं गीतरूपं गां शब्दं धारयंतं विश्वावसुमेतत्संज्ञं मां । उत्तरत्र तच्छब्दश्रुतेर्यच्छब्दाध्याहारः । यदापो वसतीवर्योख्या दद्दशुषीर्दृष्टवत्यः । दृशेर्लिटः क्वसुः । उगितश्चेति ङीप् । वसोः संप्रसारणमिति संप्रसारणं । जसि वा छंदसीति पूर्वसवर्णदीर्घः । तत्तदानीमृतेन यज्ञेन हेतुना व्यायन् । विविधमगच्छन्यष्टृजनाः । तद्गमनमासामपां ररहाणो गमयितेंद्रोऽन्ववैत् अन्वबुध्यत । बुद्ध्वा च कुत्र यज्ञः प्रवृत्त इति सूर्यस्य परिधीन्परितो धीयमानान्प्राच्यादिदिग्विभागान्पर्यपश्यत् परितो दृष्टवान् ॥

विश्वावसुरभि तन्नो गृणातु दिव्यो गंधर्वो रजसो विमानः । यद्वा घा सत्यमुत यन्न विद्म धियो हिन्वानो धिय इन्नो अव्याः ॥ ५ ॥

विश्वऽवसुः । अभि । तत् । नः । गृणातु । दिव्यः । गंधर्वः । रजसः । विऽमानः ॥ यत् । वा । घा । सत्यं । उत । यत् । न । विद्म । धियः । हिन्वानः । धियः । इत् । नः । अव्याः ॥ ५ ॥

विश्वावसुर्गंधर्वो नोऽस्माकं तदभि गृणातु अभिमुखं ब्रवीतु । गॄ शब्दे । क्रैयादिकः । प्वादित्वाद्ध्रस्वः । कीदृशः । दिव्यः दिवि भवः । तथा रजस उदकस्य विमानो निर्माता । किं पुनस्तत् । यद्वा घ यच्च खलु सत्यमवितथं यथार्थफलं कर्मजातं । उतशब्दश्चार्थे । यच्च न विद्म न जानीमस्तदुभयं ब्रवीत्वित्यर्थः । ऋचि तुनुघेत्यादिना घशब्दस्य सांहितिको दीर्घः । शिष्टः पादः प्रत्यक्षकृतः । हे विश्वावसो धियः कर्माणि हिन्वानः सोमेन प्रवर्धयन् । हि गतौ वृद्धौ च । यद्वा धियः स्तुतीर्हिन्वानः प्राप्नुवन् नोऽस्माकं धिय इत्कर्माण्येव बुद्धीरेव वाव्याः रक्ष ॥

सस्निमविंदच्चरणे नदीनामपावृणोद्दुरो अश्मव्रजानां । प्रासां गंधर्वो अमृतानि वोचदिंद्रो दक्षं परि जानादहीनां ६

सस्निं । अविंदत् । चरणे । नदीनां । अप । अवृणोत् । दुरः । अश्मऽव्रजानां । प्र । आसां । गंधर्वः । अमृतानि । वोचत् । इंद्रः । दक्षं । परि । जानात् । अहीनां ॥ ६ ॥

सस्निं । अद्भिः संस्नातं प्रकर्षेण सर्वस्य जगतः स्नापयितारं मेघं । ष्णा शौचे । आदृगमहन इति किन्प्रत्ययः । लिड्वद्भावाद्द्विर्वचनं । नदीनां शब्दकारिणीनामपां चरणे संचरणस्थानेंऽतरिक्षेऽविंदत् इंद्रोऽलभत । लब्ध्वा चाश्मव्रजानां । अश्मा

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

व्याप्तो मेघः तत्र व्रजंतीनां । यद्वा मेघो व्रजो गोष्ठं निवासस्थानं यासां तादृशीनामपां दुरो द्वाराणि मेघान्निर्गमनप्रदेशानपावृणोत् अपावृतवान् । यद्वा । अश्मसु शिलासु व्रजंतीनां गच्छंतीनां व्याप्तगमनानां वा नदीनां गंगायमुनादीनां चरणे संचरणे प्रवहणे निमित्तभूते सति तदर्थमिंद्रः सद्मि मेघमविंदत् । अलभत । लब्ध्वा चांतर्गतानामपां निर्गमसाधनानि मेघस्य दुरो द्वाराण्यपावृणोत् अपावृतवान् । तथासां नदीनाममृतान्यमरणसाधकान्युदकानि गंधर्वो गोर्वज्रस्य धर्ता विश्वावसुरूपेण वर्तमान इंद्रः प्रावोचत् प्रब्रवीति । प्रवोढुमनुजानाति । तथा दक्षं । दक्षत्युदकं प्रयच्छतीति दक्षो वर्षणसमर्थो मेघः । तादृशं मेघमहीनां मेघानांमध्ये परिजानात् परितः सर्वतो जानाति । ज्ञा अवबोधने । लेट्यडागमः । ज्ञाजनोर्जेति जादेशः ॥

संपूर्णः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

NOTES.

सूक्तं 1–25.

ऋक् 1.

1 द्यविद्यवि = 'Every day' for दिवि दिवि 'day by day.'

2 मिनीमसि = 'We violate or break;' from मी. In Ṛig-Veda the first pers. plural termination of the present is मसि as well as मस्. The root मी shortens its final in the Veda मीनातेर्निगमे (7-3-81). The general rule about the accent of verbs is—The verb in an independent clause is unaccented except when it stands at the beginning of a पाद. Here मिनीमसि is accented as it is the verb of a subordinate clause.

3 व्रत = 'Order.' Cf. L. Ordo = I order.

4 यच्चिद्धि—is a compound conjunction which means *Although* or *notwithstanding* but सायण following the पदपाठ takes यत् चित् and हि separately interpreting यदेव, तदेव, by the usual rule of यत्तदोर्नित्यसंबंधः. In this मंत्र, सायण has to supply तदेव सांगं कुरु, by his taking यत् चित् and हि separately. If यच्चिद्धि is taken as a compound conjunction this मंत्र may be taken as a subordinate clause depending upon the next ऋक्.

5 विशः—from विद् =*people*. The word विश् means 'a man.' विशः = 'People.' This word we find is rarely found in classical literature used by itself; but in विशांपतिः we have this word as the first member of a compound; विशांपतिः = king. It is akin to "Wight" (Saxon).

6 प्र—is a prefix to the verb मिनीमसि. The permissive rules about prefixes in Vedic literature छंदसि परेपि (पा. 1-4-81) व्यवहिताश्च (1-4-82) are opposed to the usual practice of prefixing them immediately to the roots. The general rule is तेप्राग्धातोः; while in Veda they can come even after the root; and also at a distance from it, *i. e.*, one or more words may intervene as हरिभ्यां याहि ओक आ, आ मंद्रैरिंद्रहरिभिर्याहि.

ऋक् 2.

1 जिहीळान = 'angry,' from हेळ (हेड्). It is the perfect participle of हेळ, ए being irregularly changed to ई. Note here that in Ṛig-Veda ड् when it comes between two vowels, is changed to ळ; as in अग्निमीळे पुरोहितम्.

ऋक् 3.

1 मृळीक = 'Favour;' from मृड् 'to take pity on.'

2 न—It has the sense of a particle of comparison like यथा, इव; वा. नेति प्रतिषेधार्थीयो भाषायाम् उभयमन्वध्यायं. It is the negative particle in ordinary

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

language, but in the Veda it is both a negative and a comparative particle. In the negative sense, its position is before the word of which the negation is meant; while it is placed after the noun, with which a comparison is made.

3 विसीमहि—The meaning of विसीमहि cannot be definitely determined. Dr. Peterson and the वेदार्थयत्न join in interpreting this word as *Loose* the mind of वरुण; while सायण takes it to mean *Bind fast*, evidently understanding the prefix वि in its usual sense विशेषेण. वि can be interpreted, as giving the contrary sense to the root to which it is applied, on the analogy of वियुज् and विस्मृ. Dr. Peterson's interpretation seems preferable but it is too much to say that सायण's meaning is beneath consideration. A fatigued horse is refreshed by his groom after being tied.

ऋक् 4.

1 विमन्यवः='Affectionate feelings.' By simply solving the compound which is used as an independent noun 'free from anger or malice.' The word 'feelings' may therefore be supplied. This is what सायण has done. In the absence of any other authority it is better to follow सायण than Roth who renders the word, as Dr. Peterson tells us by 'desires, longings.' This rendering seems to have been accepted by the वेदार्थयत्न.

2 वस्य इष्टये='With a view to obtain superior wealth.' वस्यस् is according to सायण only Vedic for वसीयस्ः, which is comparative of वसु.

3 वसतीः उप—उप is used in the sense of *upto* or *towards.*

ऋक् 5.

1 आकरामहे='May we bring hither.' कृ is of the 8th conjugation, and this is the Subjunctive form of the root.

2 उरुचक्षसं='of far-reaching sight.' It was believed by the pious ऋषिs that no act of theirs escaped वरुण's keen observation. They were therefore always to suppose themselves watched by this god.

3 नरम्—This word though usually rendered by सायण as नेतारं seems to imply strength as the male sex is proverbially stronger than that of the female (अबला).

ऋक् 6.

1 वेनन्ता—Nominative dual. It means 'desirous of,' longing for. The dual refers to मित्र and वरुण who are generally praised together. If in the course of a hymn addressed to one of these we abruptly light upon a dual form, it should not be difficult to understand who the other god might be.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

2 धृतव्रत—This compound can be solved in two ways. धृतं व्रतं यस्य or धृतं व्रतं येन 'whose order is obeyed' or 'who obeys the order.' The word is used here in the latter sense. But the usual construction of this word is with the god and not with the worshipper.

3 We have to notice इति in the पदपाठ after आशाते. It directs our attention to the dual form. छंदसि लुङ् लङ् लिटः (पा. 3-4-6) *i. e.* In the Veda the Aorist, the Imperfect and the perfect are used for almost any tense. = देवो देवेभिरागमत्, where Aorist is used in the sense of Imperative.

4 दाशुषे—दाश्वान् is a present participle meaning 'one who gives,' formed by adding वस् to the root. cf. विद्वान्, साह्वान्, मीढ्वान्.

ऋक् 7.

1 समुद्रियः—It is better to construe this word with नावः rather than with यः so as to balance this word with the expression अन्तरिक्षेण पतताम्. It will not then be necessary to supply जले गच्छन्त्याः. It is a feminine form of समुद्री in the genitive.

2 We have to note here that वरुण has his power over the physical world. He is supposed to guide the fight of birds in the sky and the course of ships on the sea. He is elsewhere praised as chalking out the path of the sun. He is also described as observing the good as well as the bad ways of men सत्यानृतेऽव पश्यञ्जनानां. Thus it seems that वरुण is invested with very great power over the mental as well as the physical universe. He preserves the uniformity of natural phenomena and exercises moral supervision over the inhabitants of the world. In the पौराणिक ages we notice the sphere of his power much circumscribed. He is allowed to be supreme over the waters, but of all authority otherwise he is completely deprived. वरुण of the पौराणिक age corresponds to Neptune of the western mythology as we find ships in danger offer up prayers to this latter god for rescue.

ऋक् 8.

1 य उपजायते = 'That is born (along with them). That comes up to bring the lunar year into accordance with the solar year = The intercalary month अधिकमास coming every third year. उपजन is used by Yâska in the sense of 'augment, that which is superadded.'

2 प्रजावतः = सायण's explanation of this word appears satisfactory in the absence of any better suggestion. We know काल is one of the साधारण कारणs of all things and so every thing coming into being during

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

the months may be allowed to be their offspring. Even events may be included in the category of this offspring. The expression *'womb of futurity*, will also help us to take the same view. प्रजावतः thus means "*With the life born in them.*"

ऋक् 9.

1 उरु, ऋष्व and बृहत्—These are words meaning 'great;' but since they are used together they may either be understood to intensify the sense of greatness or they may be distinguished in some such way as सायण does. उरु may be translated by '*wide*' from वृ to cover. 'Covering a large space.' ऋष्व is paraphrased as उत्तुंग = 'High' by the वेदार्थयत्न and this is better than 'lovely' of सायण. धातुपाठ has the root ऋषीगतौ but यास्क derives ऋषि a sage from दृश् 'to see.' बृहत्, from बृह् to *increase, expand*, may be translated by *vast, expansive.*

3 अध्यासते—तम् referring to वर्तनि should be supplied as an accusative, to अध्यासते.

4 ये—Refers to the मरुत्s the storm gods whose abode and scene of activity is the region of the wind.

ऋक् 10.

1 पस्त्यासु—It seems better to take this word to mean *in his abodes, in his houses*, as सायण interprets the word elsewhere, than दैवीषु प्रजासु as he paraphrases here.

2 सुक्रतुः—This word is not uniformly translated by सायण. In this very hymn he translates it once by शोभनकर्मा and once by शोभनप्रज्ञः, see verse 12. क्रतु means 'talent' and we have this epithet सुक्रतु applied to many gods. In later Sanskrit this word means a sacrifice. This fact has worked an amount of mischief in interpreting the epithet शतक्रतु applied to Indra. It really means 'one of a hundred talents." But it has been made to mean 'one who has made a hundred sacrifices.' Thus giving rise to the mythical belief that the performance of hudred sacrifices leads to the attainment of the enviable position, of Indra. Indra of the पौराणिक age is represented as the jealous god never allowing anybody to complete hundred sacrifices. Numberless tales are told of his coming in the way of the hundredth sacrifice for fear of being dislodged. How natural, on the other hand is it to take the word to mean 'one of hundred talents' *viz.* 'one of superior intellect.' We have the Greek word 'Kratos = power' and the Zend word 'Khratush = wisdom, intellect,' and also the Surname Sahasrabuddhe;' all these proving the naturalness of 'talent or power' as the meaning of क्रतु.

3 साम्राज्य—For the sovereignty of वरुण see note verse 7.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ऋक् 11.

1 चिकित्वान् = 'Learned.' From कित् 'to know.' Perf. part.

2 कर्त्वा—Sâyaṇa notices that त्वा is a termination applied in the sense of कृत्य 'to be done.' करत्—may or may not be a form of लेट् as सायण argues but it is better to take it to be so. There is no doubt about तारिषत् Vedic subjunctive (लेट्) of तॄ. See Whitney. 563. लिङर्थे लेट्. There is a peculiar model form in Veda which पाणिनि calls लेट् and European scholars style the Vedic subjunctive. This लेट् is used generally in the sense of लिङ् or the Potential.

3 कृतानि या च &c. 'those that are done and those that are to be done."

4 विश्वाहा—from विश्व and अहन्: meaning 'always.'

ऋक् 13.

1 द्रापि = कवच 'armour.' Sâyaṇa always renders this word by 'armour;' but European Scholars prefer to translate it by 'cloak' or 'mantle' as allied to L. 'drap'—drapery, draper &c.

2 वस्त—The augment अ is dropped even though there is no मा preceding.

3 निर्णिजम्—This is indeed a difficulty. Sâyaṇa endeavours to stick to the meaning of this word given in the Nighaṇṭu and therefore we find him reluctant to stray far away from रूप as the meaning of this word. Until there is philological light thrown on the word it would not be safe to take it to mean 'ornament.' We may supply the word 'brilliant' to qualify the word 'form' and understand by निर्णिजं वस्त 'he bears or has brilliant form or appearance.' The root निज् means to 'cleanse, to purify;' hence निर्णिज् may mean 'clear, clean, pure.' The other meaning 'to nourish' (निजिर् शौचपोषणयोः) would not do here. Our commentator however likes to translate 'well nourished body.'

4 परि स्पशो निषेदिरे—सायण no doubt elsewhere takes the word स्पश to mean 'a spy.' Cf. L. Specio=I spy. Again it is difficult to believe that he should forget everything about the spies of Varuṇa. But here he evidently means to perceive a description of the person of वरुण. It is really a forced and even unauthoritative explanation of the word स्पश that he has given here. It is certainly better to take the common meaning of the word 'spy.' Altogether his gaudy dress, his sitting in the midst of spies, and much else that is said about वरुण in these Mantras, all this goes to describe his supremacy and sovereignty. Here Sâyaṇa takes it for 'rays.' निघंटु III. 7.

ऋक् 14.

1 दिप्सवः = 'Wishing to harm,' hence 'enemies.'

१४

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

2 अभिमाति—In his gloss on VIII. 3–2 Sâyaṇa says अभिमन्यत इति अभिमातिः शत्रुः. We have this word used once at least as an abstract noun in the sense of 'vanity.' दिप्सवः means 'desirous of harming.' द्रुह्वाणः = 'Those that hate;' and अभिमातयः may mean 'those that think or make too much of themselves.' All these are likely to injure any mortal king but God वरुण is free from all such fear.

ऋक् 15.

1 असामि = 'Full, not half.' Cf. L. semi. Gr. hemi.

2 यशस्—Sâyaṇa elsewhere allows the word to mean 'glory.' But that meaning would not suit here, as the worshipper means to say that वरुण satisfies the hunger of men by giving them food to their heart's content.

3 The same verb चक्रे refers both to मानुषेषु and उदरेषु.

ऋक् 16.

1 गव्यूतीः अनु—Sâyaṇa takes this word to mean गोष्ठ, but it is better to take it to mean 'pasture-ground.' It is however not unnatural that cows may seek their pen as they might be eager to see their calves.

ऋक् 17.

1 वोचावहै—The base वोच is familiar to students of classical grammar as being that of Aorist according to the second variety. This is the Vedic Subjunctive. It is not clear who the parties of the conversation are. It is not however unusual for poets thus to suppose themselves holding conversation with the deity in their imagination. Poets have in their imagination joined birds in their flights, or otherwise been identified with the subjects they talk about. In the same way we may suppose that the present poet expects to enjoy the company of वरुण. Vide VII. 88-3.

2 आभृतं = आहृतं. Sâyaṇa quotes Pâṇini to tell us that in the वेद the ह in हृ and ग्रह् is changed to भ्. *e. g.* जभार for जहार and ग्रभाय for ग्रहाय. It deserves to be noted that we have this tendency to substitute a simple aspirate for a compound one belonging to older languages. These older forms do not totally disappear. Thus we find the compound aspirates remaining in Zend in cases where we have our ह् in Sanskrit. Z. dazh. S. दह् = to burn. Z. Rudh. S. रुह् = to grow. We see however that compound aspirates reappear in several forms of these roots in Sanskrit, as धोक्षि, धक्ष्यति, जिघृक्षा &c. Note also Gr. Ophis. S. अहिः = snake.

3 होतेव क्षदसे प्रियम्—It is not clear what is meant by "you eat what you like as the होता." Perhaps we are to perceive a comparison with

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

Agni who, we know, is sometimes called होता *e. g.* होतारं रत्नधातमम्. The ऋषि thus says 'I have got मधु for you. You eat like Agni.'

ऋक् 18.

1 दर्शम् = अदर्शम् Aorist of दृश्, the augment is dropped.

2 विश्वदर्शतं = सर्वैर्दशनीयम्. दर्शत is used by itself when it means 'lovely to behold.'

3 Here the poet supposes himself actually in sight of वरुण. All this is in his inspired imagination. This testifies to the pure and exquisite devotion of the ऋषिs.

ऋक् 19.

1 श्रुधी—We have two instances in this मन्त्र of the lengthening of the final vowels in श्रुधी and अद्या both archaic for शृणु and अद्य.

2 = आचके 'I sing' from कै just as we have जगे from गै. We have सायण explaining this word by अभिष्टौमि = 'I praise' in तव धामान्याचके in I. 117-23. Sâyaṇa paraphrases आचके by अभिमुख्येन प्रार्थये. He notices there that the root though परस्मैपद is conjugated in आत्मनेपद.

ऋक् 20.

1 राजसि—The root is राज्. It is here explained by Sâyaṇa as दीप्यसे; but it undoubtedly means ईशिषे. Sâyaṇa elsewhere himself gives this meaning by the word अमृतस्य राजसि.

